Linga Puran

No. 45

(552 Leaves)

15

LIBRARY OF THE BOMBAY BRANCH OF THE ROYAL ASIATIC SOCIETY

॥श्रीगणेशाय नमः। शिवाय नमः॥ नमो रुद्राय हरये ब्रह्मणे पर
मात्मने। प्रधानपुरुषेशाय सर्गस्थित्यंतकारिणे। नारदोभ्यर्च्य
लिंगेशं शंकरं संगमेश्वरे। हिरण्यगर्भे स्वर्लीने ह्यविमुक्ते हिमाल
ये। रौद्रेगोपेक्षके चैव ज्येष्ठे पाशुपते शुभे। व्याघ्रेश्वरे च केदारे त
था गोमायुकेश्वरे। हिरण्यगर्भे चंडेशे ईशाने चैव विष्टपे। शुक्रे
श्वरे यथान्यायं नैमिषं प्रययौ मुनिः। नैमिषेयास्तदा विप्रा नार
दं हृष्टमानसाः। समभ्यर्च्यासनं तस्मै तद्योग्यं समकल्पयन्। लिं ५
सोपि हृष्टो मुनिवरैर्दत्तं जग्राहे सदासनं। संपूज्यमानो मुनिभि
ः सुखासीनो महामुनिः। चक्रे कथां विचित्रार्थां लिंगमाहात्म्यमा

LIBRARY OF THE BOMBAY BRANCH OF THE ROYAL ASIATIC SOCIETY

LIBRARY OF THE BOMBAY BRANCH OF THE ROYAL ASIATIC SOCIETY

श्रितां। एतस्मिन्नेव काले तु सूतः पौराणिकः स्वयं। जगाम नैमिषं धीमान्मु
नीनां मार्गतपस्विनां। तस्मै सामं च पूजां च यथावच्चक्रिरे तदा। नैमिषेयास्त
च्छिष्याय कृष्णद्वैपायनस्य तु। अथ तेषां पुराणस्य शुश्रूषा समपद्यत। दृष्ट्वा
तमतिविश्वस्तं विज्ञं तं श्वस्यमानसं। अपृच्छंश्च ततः सूतमृषिं सर्वे त
पोधनाः। पुराणसंहितां पुण्यां लिंगमाहात्म्यसंयुतां॥ ॥नैमिषेया ऊचु
त्वया सूत महाभाग कृष्णद्वैपायनो मुनिः। उपासितः पुराणार्थं लब्धा
तस्माच्च संहिता। तस्माद्भवंतं पृच्छाम सूत पौराणिकोत्तम। पुराण
संहितां पुण्यां लिंगमाहात्म्यसंयुतां। २। नारदोप्यस्य देवस्य रुद्रस्य
परमात्मनः। क्षेत्राण्यासाद्य चाभ्यर्च्य लिंगानि मुनिपुंगवः। इह संप्रा
प्तः श्रीमान्नारदो ब्रह्मणः सुतः। तव तत्कालं तवाश्चैव त्वयैव नारदः
स्तथा। अस्माय तानुनः पुण्यं पुराणं वक्तुमर्हसि। सफलं साधितं सर्वं

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

मवतोप्यखिलंश्रेयः।।एवमुक्तःसहृष्टात्मासूतःपौराणिकोत्तमः।
अभिवंद्याग्रतोधीमान्नारदंब्रह्मणःसुतं।नैमिषेयांश्चपुण्यात्म
पुराणमाजहारसः।।सूतउ।। ।।नमस्कृत्यमहादेवंब्रह्माणंच्चजगद्गु जनार्दनं१
रुं।मुनिश्वरंतथाव्यासंमिहाव्यक्तंस्मराम्यहं।शब्दब्रह्मतनुंसाक्षा लिंगं४
ब्रह्म५ च्छब्दब्रह्मप्रकाशकं।वर्णानामधिमव्यक्तंबहुधागुणमव्ययं।अ लक्षितं५
कारोकारमकाराख्यंस्थूलंसूक्ष्मंपरावरं।ॐकाररूपमृग्वक्त्रंसाम
जिह्वासमन्वितं।यजुर्वेदमहाग्रीवमथर्वहृदजंविभुं।प्रधानपु
वर्जितं१ रुषातीतंप्रलयोत्पत्तिसंयुतं।तामसंकालरुद्राख्यंराजसंकनका
ण्डजं।सत्वेनसर्वगंविष्णुंनिर्गुणंपरमेश्वरं।प्रधानतोव्ययंव्याप्य
सप्तधाधिष्ठितंक्रमात्।द्विधाषोडशधाचैवषड्विंशकमजोद्भवं

सर्गप्रतिष्ठासंहारलीलार्थंलिंगरूपिणं।प्रणम्यचयथान्यायंव
क्ष्येलिंगोद्भवंशुभं।। ।।इतिश्रीमहापुराणेलिंगकल्पेप्रथमा
ध्यायः।। ।।सूतउ।। ।।ईशानकल्पवृत्तांतमधिकृत्यमहात्म
ना।ब्रह्मणाकथितंपूर्वंपुराणंलिंगमुत्तमं।ग्रंथकोटिप्रमाणंतु
शतकोटिप्रविस्तरं।चतुर्लक्षेणसंक्षिप्तेव्यासैःसर्वांतरेशुवै।व्या
स्तेष्टादशधाचैवब्रह्माद्यैर्द्वापरादिषु।लिंगमेकादशंप्रोक्तंमया हं५
व्यासात्श्रुतंचतत्।अस्यैकादशसाहस्रंग्रंथमानमिहद्विजाः।
तस्मात्संक्षेपतोवक्ष्येश्रुतंविस्तरशोमया।चतुर्लक्षेणसंक्षिप्तेकृ
ष्णद्वैपायनेनतु।ग्रंथैकादशसाहस्रेकथितोलिंगसंभवः।सर्गप्र
धानिकःपश्चात्प्रकृतोवैकृतस्तथा।अंडस्यास्यचसंभूतिरंड

स्या। वरणो ४ कं। अंडोद्भवत्वं सर्वस्य रजोगुणसमाश्रयात्। विष्णु
त्वं कालरुद्रत्वं शयनं चाप्सु तस्य वै। प्रजापतीनां सर्गस्य दृष्टि
मुद्धरणं तथा। ब्रह्मणश्च दिवारात्रौ मायुर्वर्षायतः पुनः। सवनं २वै आग्रतपुन
ब्रह्मणश्चैव युगाकल्पश्च तस्य तु। दिव्यं च मानुषं वर्षमार्षं ध्रौ
व्यारव्यमेव च। पितृणां संभूतिधर्मभाश्रमिणां तथा। आहादि
र्जुगतां जूपादेव्यापां क्षुद्भवस्तथा। स्त्रीपुंभावो विरिंचेश्च पुनर्लिंगस्य ध्यार्थना४
४त्तादे संभवः। रिलादस्य तपश्चैव वृत्रार्थे दर्शनं तथा। अनार्ये हि निजस्या ३
थ दुर्जनत्वं सुतस्य तु। त्रिलादशक्रसंवादः पञ्चयोनित्वमेव वा। न
वस्य दर्शनं चैव तिष्ठेषाचार्यशिष्ययोः। व्यासावताराश्च सहावास्य
मन्वंतराणि वा। कल्पत्वं चैव कल्पस्य नामाख्याने दस्तुनुक्रमात्। क
आख्याष्टकं हि रुद्राय कथितं मोदनोतरे। ब्रह्मविष्णोर्विवादश्च सर्गो मैथुनसंज्ञाः॥८

ल्पे तु कल्पे वाराहे वराहत्वं हरेस्तथा। मेघवाहनकल्पस्य वृत्तांतरुद्र
गौरवं। पुनर्लिंगोद्भवश्चैव ऋषिमध्ये पिनाकिनः। लिंगस्याराधनं
स्नानं विधानं शौचजं कृतं। वाराणस्याश्च माहात्म्यं क्षेत्रमाहात्म्य
वर्णनं। रुद्रविरुद्रालयानां तु संख्या विभोर्गृहस्य चांतरिक्षे तथा तु
स्मिन् देवायतनवर्णनं। दक्षस्य यतनं भूमा पुनः स्वारोचिषे नरे। दक्ष
दैं शापश्च दक्षस्य शापमोक्षस्तथैव च। कैलासवर्णनं चैव योगप
श्च पतनस्तथा। चतुर्युगप्रमाणं तु युगधर्मस्य विस्तरः। संध्यांशकप्रमा
णं च संध्यावृत्तेन वस्य च। मैथुनादिप्रसंगेन। श्मशाननिलयं चैव
योगपाश्च पतस्तथा। मैथुनादिप्रसंगेन चंद्रलेखासमुद्भवः। उद्वा
ह शंकरस्याथ पुत्रोत्पादनमेव च। मैथुनादिप्रसंगेन विनाशो जगतां न

यं। शापसंत्यक्तो देवान्ध्वरां विध्वंसनं च पानकं। शुक्रोत्सर्गश्च संज्ञ
स्य गांगेयोद्भवश्चैव च। ग्रहणादिषु कालेषु स्थाप्य लिंगफलं तथा
रूपदधीचविवादश्च दधीचोपेंद्रयोस्तथा। उत्पत्तिर्नंदिनाम्नस्तु
पाशुपता ४ देवदेवस्य धीमतः। पतिव्रतायाश्चाख्यानं पशुपाशविचारणा।
प्रवृत्तिलक्षणं ज्ञानं निवृत्त्याधिकता तथा। वशिष्ठस्य तथोत्पत्तिः वा
शिष्ठानं महात्मनां। मुनीनां वंशविस्तारो राज्ञानुक्रैर्विनाशनं दै
~~शिष्ठस्य तथोत्पत्तिः~~ रात्नयं कौशिकस्याथ सुरभीबंधनं तथा। परा ४
शरस्यावतारो व्यासस्य च शुकस्य च। विनाशो राक्षसानां च विहित शं
क्रसूनुना। देवतापरमार्थं तु विज्ञानं च प्रसादनं। पुराणकरणं चैव
पुलस्त्यस्याज्ञया गुरोः। भुवनानां प्रमाणं च ग्रहाणां ज्योतिषां गतिं।

जीवश्राद्धविधानं च श्राद्धार्हश्राद्धमेव च। नांदीश्राद्धविधानं च
तथाध्यायनलक्षणं। पंचयज्ञप्रभावश्च पंचयज्ञविधिस्तथा। र
जस्वलानां वृत्तिश्च वृत्त्या पुत्रविशिष्टता। मैथुनस्य च संगस्य प्राति विधिश्चैव ३
वर्णमनुक्रमात्। भोज्याभोज्यविधानं च सर्वेषामेव वर्णिनां। प्राय
श्चित्तमन्त्रास्य पापौघस्य च विस्तरात्। नरकाणां स्वरूपं च दंडक
र्मानुरूपतः। स्वर्गनारकिणं पुंसां चिह्नं जन्मांतरेषु च। नानाविधानि
दानानि ४ कं मांणि प्रेतराजपुरं तथा। कल्पे पंचाक्षरस्याथ रुद्रमाहात्म्यमेव
च। वृत्रेंद्रयोस्तथा युद्धं विश्वरूपविमर्दनं। श्वेतस्य मृत्योः संवादः
देव २ श्वेतार्थं कालनाशनं। देवदारुवने शंभोः प्रवेशः शंकरस्य च। सु
दर्शनस्य चाख्यानं क्रमसंज्ञासलक्षणं। ब्रह्मसाध्यो हि रुद्रे हेतुक

कली २

र्थं तो ब्रह्मणा तदा। मधुना कैटभेनैव पुरा हत्यागते र्विनो। ब्रह्मणश्च
रमं ज्ञानमादात्तु मीनता हरेः। सर्गविसर्गेषु विष्णोश्च जननं लीलया च
तु। विष्णोः प्रसादात् द्विष्णोः श्च जिष्णोः श्चैव तु संभव। मंथानधरणं च
य हरेः कूर्मत्वमेव च। संकर्षणस्य चोत्पत्तिः कौशल्याश्च पुनर्भवः।
५६ यद्वै नां सेव संभूतिर्यादवत्वे हरेः स्वयं। भोजराजस्य दौरात्म्यमातु
लस्य हरेर्विभोः। बाजनावे हरेः क्रीडा पुत्रार्थं शंकरार्चनं। नरस्य
तथोत्पत्तिः कपाले वैश्म वात्करात्। भूभार निग्रहार्थं तु रुद्रस्याराध ५
नं हरेः। वैन्येन पृथुना भूमेः पुरा दोहं प्रवर्त्तनं। देवासुरैः पुरा लब्धा
भृगुशापश्च विष्णुना। कृष्णत्वे द्वारकायां तु निलयं माधवस्य तु। ज्ञ
क्षोहितायशापास्तु दुर्वाससा नना द्वरेः। वृष्णंधकविनाशाय

शापः पिंडारवासिनां। एरकस्य तथोत्पत्तिः तोमरस्योद्भवस्तथा। ए
लोन्नतो योन्यं रकासंभवौन्येन विवादे ह्यास्ति विग्रह। लीलया चैव कृष्णेनस्व कुल
स्य च संहृतिः। एरकास्त्र बलेनैव गमनं स्वेच्छयैव तु। ब्रह्मणश्चैव मानं
च मोक्षज्ञानं सविस्तरं। पुरांधकाग्नि दह्यणं शक्रे शृंगस्त्वपिणा। मद
नस्यादिदेवस्य ब्रह्मणश्चामरारिणां। हालाहलस्य देवस्य कृताव
ज्ञा पिनाकिना। जालंधर वधश्चैव सुदर्शन समुद्भवं। विष्णोर्वरायु
धवाप्तिः तथा रुद्र विचेष्टितं। तथान्यानि च रुद्रस्य चरितानि सह
स्रशः। हरेः पितामहस्याथ शक्रस्य च महात्मनः। प्रभावोऽनुत्त्वणश्चै
व शिवलोकस्य वर्णनं। भूमौ रुद्रस्य लोकं च पाताले हाटकेश्वरं। त
पसां लक्षणं चैव द्विजानां वैभवं तथा। अधिकं सर्वमूर्त्तीनां लिंगमू

र्विशेषतः॥ लिंगेस्मिन्नानुपूर्व्येण विस्तरेणानुकीर्त्यते। एतन्न् ज्ञात्वापु
राणस्य संक्षेपं कीर्तयेत्तु यः। सर्वपापविनिर्मुक्तो ब्रह्मलोकं स गच्छति
॥ ॥इत्यादि महापुराणे श्रीलिंगे संक्षेपानुकारिणिके द्वितियोध्या
यः॥ ॥सूत उ॥ ॥अलिंगो लिंगमूलंतु अव्यक्तं लिंगमुच्यते। अ
लिंगः शिव इत्युक्तो लिंगं शैवमिति स्मृतं। प्रधानं प्रकृतिश्चेति यदाहु
र्लिंगमुत्तमं। गंधवर्णरसैर्हीनं शब्दस्पर्शादिवर्जितं। अगुणं ध्रुवम
क्षय्यमलिंगं शिवलक्षणं। गंधवर्णरसैर्युक्तं शब्दस्पर्शादिलक्षितं। ६ लक्षणं
जगद्योनिं महाभूतं स्थूलं सूक्ष्मं द्विजोत्तमाः। विग्रहं जगतां लिंगम
लिंगादभवत्स्वयं। सप्तधा चाष्टधा चैव तथैकादशधा पुनः। लिंगा
न्यलिंगस्य तथा मायया वितता नितु। तेभ्यः प्रधानदेहानां त्रयमासी

त्शिवात्मकं। एकस्मात्रिष्वभूद्विश्वमेकेन परिरक्षितं। एकेन
च हृतं विश्वं व्याप्तं त्वेवं शिवेन तु। अलिंगं चैव लिंगं च लिंगालिंगा
नि मूर्तयः। यथावत्कथितान्येतं तस्माद्ब्रह्ममयं जगत्। अलिंगी
भगवान्बीजी स एव परमेश्वरः। बीजं योनिश्च वै लिंगं निर्बीजा योनि
रुच्यते। बीजयोनी प्रधानानामात्माख्या वर्तते त्विह। परमात्मा मुनि
र्ब्रह्मा नित्यो बुधस्वभावतः। विशुद्धो यस्त रुद्रः पुराणे शिव उच्य तेथ
ते। शिवेन दृष्टा प्रकृतिः शैवी समभवद्द्विजाः। सर्गादौ सा गुणैर्युक्ता
पुराव्यक्ता स्वभावतः। अव्यक्तादि विशेषांतं विश्वं तस्याः समुत्थितं।
विश्वधात्री त्वजाख्या च शैवी च प्रकृतिः स्मृता। तामजां लोहितां शु
क्लां कृष्णामेकां बहुप्रजां। जनित्रीमनुशेते च जुषमाणां स्वरूपिणीं॥

तंमेवाजानजोव्यक्तं तु क्तोगोऽजहाति च। अजा जनित्री जगतां म
जेनस्म मधिष्ठिता। प्रादुर्बभूव स महान् पुरुषाधिष्ठितस्य च।
अजाख्याया प्रधानस्य सर्गकाले गुणैस्त्रिभिः॥ सिसृक्षया ब्रह्मा
नः प्रविश्याव्यक्तमव्ययं। व्यक्तसृष्टिं विकुरुते नात्मनाधिष्ठितो म
हान्। महांस्तस्य तथा वृत्तिः संकल्पाध्यवसायिका। महतस्त्रिगुण
स्तस्मादहंकारो रजोधिकः। महता भूततन्मात्रं सर्गकृद्वै बभूव ह।
अहंकाराच्छब्दमात्रं तस्मादाकाशमव्ययं। शब्दमा वृणोत्सश्वादाका
शं शब्दकारणं। तन्मात्राभूतसर्गश्च द्विजास्त्वेवं प्रकीर्त्तितां। सशब्द
मात्रस्त्वाकाशस्तस्माद्वायुर्महामुने। तस्माच्च रूपमात्रं तु ततोग्निश्चैर
सत्ततः। रसादापः श्रुतास्ताभ्यो गंधमात्रा धरा तथा। आवृणोद्धिमदा

काशं स्पर्शमात्रं द्विजोत्तमाः। आवृणोद्रूपमात्रं तु वायुर्वै निःक्रियात्म
कः। आवृणोद्रसमात्रं तु देवाः साक्षाद्विजावसुं। स्तासां पंचगुणा तस्मा
दिकोनो रससंभवः। त्रिगुणेन गवान्वक्तोर्द्विगुणस्य शूनात्मकः। अहं
कारस्ततो देवस्त्वेकमात्रस्तु निष्कलः। तन्मात्राभूतसर्गश्च विज्ञेयः
सपरस्परात्। वैकारिकः सात्विको वै युगपत्संप्रवर्त्तते। सर्गस्तथाप्य
हंकारादेवमात्र प्रकीर्त्तिते। पंचबुद्धिंद्रियाण्यत्र पंचकर्मेंद्रियाणि
च। शब्दादीनामवाप्त्यर्थं मनश्चैवोभयात्मकं। महदादयो विशेषांता
ह्यंडमुत्पादयंति च। जलबुद्बुदवत्तस्मादवतीर्णः पितामहः। स एव भ
गवान् रुद्रो विष्णुर्विश्वजगत्प्रभुः। तस्मिन्नंडे त्विमे लोका अंतर्विश्व
मिदं जगत्। अंडं दशगुणेनैव बाह्यतो नलसावृत्तं। नलसोदश

गुणेन वारिणा चावृतं बहिः। आपो दशगुणेनैव बाह्यतस्तेजसावृ
ताः। तेजो दशगुणेनैव बाह्यतो वायुनावृतं। वायुर्दशगुणेनैव बा
ह्यतो नभसावृतः। आकाशेनावृतो वायुरहंकारेण शब्दजः। महता
शब्दहेतुर्वै प्रधानेनावृतः स्वयं। सप्ताण्डावरणान्याहुस्तस्यात्मक
मलासनः। कोटिकोटियुतान्यत्र चाण्डानि कथितानि तु। तत्र तत्र
चतुर्वक्त्रा ब्रह्माणो हरयो भवाः। सृष्टाः प्रधानेन तदा लब्ध्वा शंभोस्तु
सन्निधिं। लयश्चैव तथान्योन्यमाद्यंतमिति कीर्त्तितं। सर्गस्य प्रतिस
र्गस्य स्थितेः कर्त्ता महेश्वरः। सर्गे च रजसा युक्तः सत्वस्थः परिपालने
प्रतिसर्गे तमोद्रिक्तः स एव त्रिविधः क्रमात्। आदिकर्त्ता च भूतानां
संहर्त्ता परिपालकः। तस्मान्महेश्वरो ब्रह्मा ब्रह्मणोऽधिपतिः शिव

सदाशिवो भवो विष्णुः ब्रह्मा सर्वात्मको यतः। एतदण्डे तथा लोका
स्मेकर्त्ता पितामहः। प्राकृतः कथितो ह्येष पुरुषाधिष्ठितो मया। स
र्गश्च बुद्धिपूर्वस्य द्विजाः प्राथमिकः शुभः॥ ॥इत्यादिपुराणे लिंगे
प्राकृतप्राथमिकसर्गाध्यायस्तृतीयः॥ ॥अथ प्राथमिकस्येह
यः कालस्तदहः स्मृतः। सर्गस्य तादृशी रात्रिः प्राकृतस्य समासत
ः। दिवा सृष्टिं विकुरुते रजन्यां प्रलयं विभुः। औपचारिकमस्येत
दहोरात्रं न विद्यते। दिवा विकृतयः सर्वे विकारा विश्वदेवताः। प्रजा
नां पतयः सर्वे तिष्ठन्त्येव महर्षयः। रात्रौ सर्वे प्रलीयंते निस्यांते संभ
वंति च। अहश्च तस्य वै कल्पो रात्रिस्तादृग्विधा स्मृता। चतुर्युगस
हस्रांते मनवस्तु चतुर्दश। चत्वारि तु सहस्राणि वत्सराणां कृते द्विजाः

तांश्चछतीचवेसंध्यासंध्यांशश्च कृतस्यतु। त्रिशतिद्विशतीसंध्यात
स्यावेकाशती क्रमात्। अंशकः षट्छतंतस्मात् कृतंसंध्यांशकेविना
त्रिद्वेकसाहस्रमतो विनासंध्यांशकेनतु। त्रेताद्वापरतिष्याणां कृत
स्यकथयामिवः। निमेषपंचदशाकाकाष्ठास्वस्थस्यसुभ्रता। मूर्द्धस्य
चाक्षिणस्तस्याश्च ततःत्रिंशत्कलाकलाः। कलात्रिंशतिकोविप्रा मुहू
र्त्त इतिकथितः। मुहूर्त्तपंचदशाका रजनीतादृशोत्वहः। पित्र्येरात्र्यह
नीमासः प्रविभागस्तयोःपुनः। कृष्णपक्षस्त्वहस्तेषांशुक्लस्वप्नायश
र्वरी। त्रिंशद्येमानुषामासाः पित्र्योमासस्सस्मृतः। शतानेत्रीणिमा
सानांषष्ट्याचाप्यधिकानिवै। पित्र्यसंवत्सरोह्येषमानुषेणविजानता
। मानुषेणैवमानेनवर्षाणांयच्छतंभवेत्। पितृणांत्रीणिवर्षाणिसंख्या

तानिहतानिवै। दशचैवाधिकामासाः पितृसंख्येहसंज्ञिताः। लौकि
केनैवमानेनअब्दोयोमानुषःस्मृतः। एतद्दिव्यमहोरात्रमितिलिंगेत्रप
ठ्यते। दिव्येरात्र्यहनीवर्षंप्रविभागस्तयोःपुनः। अहस्तत्रोदगयनंरा
त्रिःस्याद्दक्षिणायनं। एतेरात्र्यहनीदिव्येप्रसंख्यातेविशेषतः। त्रिंश
दन्यानिवर्षाणिदिव्योमाससस्मृतः। मानुषंतुशतंविप्रादिव्यामा
सास्त्रयस्तुते। दशचैवतथाहानिदिव्योह्येषविधिःस्मृतः। त्रीणिवर्ष
शतान्येवषष्टिवर्षाणियानिच। दिव्यसंवत्सरोह्येषमानुषेणप्रकी
र्त्तितः। त्रीणिवर्षसहस्राणिमानुषाणिप्रमाणतः। त्रिंशदन्यानिव
र्षाणिततःसमर्षिवत्सरः। नवयानिसहस्राणिवर्षाणांमानुषा
णिच। अन्यानिनवतिश्चैवध्रौवःसंवत्सरस्तुसः। षट्त्रिंशत्तुसहस्रा

णि वर्षाणां मानुषाणि च। वर्षाणां चतुः तज्ज्ञेयं दिव्यो ह्येष विधिः स्मृतः
त्री एयेव नियुतान्याहु वर्षाणां मानुषाणि च। षष्टिश्चैव सहस्राणि
संख्यातानि ह संख्यया। दिव्यं वर्षसहस्रं तु प्राहुः संख्याविदो जना ज २
ः। दिव्येनैव प्रमाणेन युगसंख्या प्रकल्पिता। पूर्वं कृतयुगं नाम तत
स्त्रेता विधीयते। द्वापरश्च कलिश्चैव युगान्येतानि सुव्रत। अथ
संवत्सरा द्दृष्टा मानुषेण प्रमाणतः। कृतस्याद्यस्य विप्रेन्द्रा दिव्यमाने
न कीर्तितं। सहस्राणां शतान्यासंश्चतुर्दश च संख्यया। चत्वारिंशत्स १९
हस्राणि तथान्यानि कृतयुगे। तथा शतसहस्राणां वर्षाणां द्वादश सं
ख्यया। अशीतिश्च सहस्राणि कालस्त्रेतायुगस्य तु। सप्तैव नियुतान्या
हुः वर्षाणां मानुषाणि च। विं[illegible]। सहस्राणि काल स द्वापरस्य तु

हि २

एवं चतुर्युगाख्यानां साधिका ह्येकसप्ततिः। कृतत्रेतादियुक्तानां मनोरन्तरमुच्यते ५

ः युगान्त सहस्राणि वर्षाणि [illegible]णि संख्यया। षष्टिश्चैव सहस्रा
णि कालः कलियुगस्य तु। एवं चतुर्युगः कालो कृते संध्यांशका
त्मास्मृतः। नियुतान्येव षट्त्रिंशत्त्रिंशानि युतानि वै। चत्वारिंश
त यात्रीणि नियुतानीह संख्यया। विंशतिश्च सहस्राणि संध्यांशा
स्तु विज्ञायते। मन्वन्तरस्य संख्यातु वर्षाग्रेहैव कीर्तिता। विंश
त्को द्वस्तु वर्णानां मानुषेण द्विजोत्तमाः। सप्त षष्टिस्तथान्यानि नियु
तान्यधिकानि तु। विंशतिश्च सहस्राणि कालोयमधिकं विना। मन्व
न्तरस्य संख्येयं शालिना स्मिन्कीर्तिता द्विजाः। चतुर्युगस्य तु तथा त्वर्ष
संख्या प्रकीर्तिता। चतुर्युगसहस्रं तु कल्पश्चैव द्विजोत्तमाः।
तौ च्युते लोककृत्य ये ने[illegible]जे तदा। तत्र वैमानिकानां तु अष्टादि श

त्रिकोटयः। मन्वन्तरेषु संख्यातान्तरेषु यथा तथा॥ एकाविंश
त्यासान्कोट्यो दिनवतीस्तथा॥ कल्पनीते च वै विप्राः सहस्राणि
च सप्तति। पुनः स्तथाष्टसाहस्रा सर्वत्रैव समासतः। कल्पावसानिकं
स्यक्ताप्रलये समुपस्थिते। महर्लोकात्प्रयांत्येते जनलोकं जनास्ततः
कोटीनां द्वे सहस्रे तु अष्टौ कोटिशतानि च॥ द्विषष्टिश्च तथा कोट्या
नियुतानीच सप्तति। कल्पार्धसंख्या दिव्या वै कल्पमेवं तु कल्पयेत्
कल्पानां वै सहस्रं तु वर्षमेकमजस्य तु॥ वर्षाणामष्टसाहस्रं ब्राह्मं
वै ब्राह्मणो युगं। सवनं युगसाहस्रं सर्वदेवोद्भवस्य तु॥ सवनानां
सहस्रं तु त्रिगुणं त्रिविधं तथा॥ ब्रह्मणस्तु तथा प्रोक्तः कालः काला
त्मनः प्रभोः॥ नवो हवस्तपश्चैव नाम्नो रेत्नः क्रतुः पुरः॥ क्रतुर्वह्निर्

स्ववाहः सावित्रः शुद्ध एव च। उशिकः कुशिकश्चैव गांधारो मुनिसं
तमा। ऋषभश्च तथा खड्गो मज्जालीयश्च मध्यमः। वैराजो वै निषा
दश्च मुख्यो वै मेघवाहनः। पंचमश्चित्रकश्चैव आकूतिर्ज्ञानमेव
च। मनः सुदर्शो हृंहश्च तथा वैश्वेन लोहिता रक्तश्च पीतवासाश्च
असितः सर्वरूपकः। एवं कल्पास्तु संख्याता ब्रह्मणोऽव्यक्तजन्मनः
कोटिकोटिसहस्राणि कल्पानां मुनिसत्तमाः। गतानि तावच्छेषाश्च अ
हृता निवै पुरः। परांते वै विकाराणि विकारं यांति विश्वतः। अविका
रस्य देवस्य शिवस्याष्टतनोस्तु। संहृत्यैव विकारांस्तु प्रधाने चात्म
नि स्थिते। साधर्म्येणावतिष्ठेते प्रधानपुरुषावुभौ। गुणानां चैव
वैषम्ये विप्राः सृष्टिरिति स्मृता। साम्ये लयो गुणानां तु तयोर्हेतुर्म

हेश्वरः। लीलया देवदेवेन ... द्विविधाः कृता॥ असंख्यग
ताः कल्पसंक्षेपात्प्रधानतः ... प्रतिष्ठिताः। असंख्यातास्च कल्पाः ख्या
असंख्याता पितामहा। हरयश्चाप्यसंख्याता। एक एव महेश्वरः।
अथानादिप्रवृत्तानि लीलया प्राकृतानि तु। अप्राकृतस्य तस्यादिम
ध्यान्तं नास्ति चात्मनः। पितामहस्यायुः परः परार्धद्वयसंमतः। दिवा
सृष्टं तु यः सर्वं नश्यते निशि चास्य तत्। भूर्भुवः स्वर्महस्तत्र न नश्यते वै
ध्रुवतो न च। रात्रौ चैकार्णवे ब्रह्मा नष्टे स्थावरजंगमे। सुष्वापांभसि १२
यस्तस्मान्नारायण इति स्मृतः। शर्वर्यन्ते प्रबुद्धो वै दृष्ट्वा शून्यं चराचरं।
स्रष्टुं तदा मतिं चक्रे ब्रह्मा ब्रह्मविदां वरः। जलमाप्लुतां क्ष्मां तां स
मादाय सनातनः। पूर्ववत्स्थापयामास तद हैं रूपमास्थितः। नदी

नदसमुद्रांश्च पूर्ववच्चाकरोत्प्रभुः। कृत्वा धरां प्रयत्नेन निम्नोन्न
तविवर्जितां। धरायां सोऽचिनोत्सर्वान् गिरीन् दग्धान् पुराग्निना। भूरा
द्यांश्चतुरो लोकान् कल्पयामास पूर्ववत्। सृष्टिं च भगवांश्चक्रे त
दा ऋषुमुनिर्मितं॥ ॥इत्यादिपुं लिंगे चतुर्थोऽध्यायः॥ ॥सूत उ०
यदा सृष्टुं मतिं चक्रे मोहश्चासीन्महात्मनः। विद्यांश्चाबुद्धिपूर्वस्तु
स्य लोकस्य जन्मनः। तमो मोहो महामोहस्तामिस्रश्चान्धसंज्ञितः।
अविद्या पंचपर्वैषा प्रादुर्भूता स्वयंभुवः। अविद्ययामुनेरस्तः स
र्गो मुख्य इति स्मृतः। असाधक इति स्मृत्वा सर्गं मुख्यं प्रजापतिः। अ
भ्यमन्यत सोऽन्यं वै नाभ्यमुख्योद्भवा स्मृता। त्रिधा कंठो मुनेस्त ...
यत्तौ स्य वर्ध्वितः। प्रवर्तनस्य ... तिर्यक्स्रोतो ह्यवर्ध्वतः ...

स्रोतो परस्तस्य सात्विकः स इति स्मृतः। अर्वाक्स्रोतानुग्रहश्च त
थाभूतादिकः परः। ब्रह्मणो महतस्त्वाद्यो द्वितीयो ज्ञातिकस्तथा
सर्गः स्तृतीयश्चैंद्रीयकस्तुर्यो मुख्य उच्यते। तैर्यग्योन्यः पंचमो वै प
ष्ठो वै देवतः स्मृतः। सप्तमो मानुषो विप्रा अष्टमोनुग्रहः स्मृतः। नव
मश्चैव कौमारः प्राकृता वैकृतास्त्विमे। पुरस्तादसृजद्देवः सनंदं स
नकं तथा। सनातनं मुनिश्रेष्ठा नैष्कर्म्येण गताः परां। मरीचिमत्र्यंगिर
सः पुलस्त्यं पुलहं क्रतुं। दक्षमत्रिं वसिष्ठं च सोसृजद्योगविद्यया।
नवैते ब्रह्मणः पुत्रा ब्रह्मज्ञा ब्रह्मणो समाः। ब्रह्मवादिन एवैते ब्रह्मण
स्तदृशाः स्मृताः। संकल्पश्चैव धर्मश्च अधर्मोधिर्मसंनिधिः। द्वादशे
ह प्रजास्त्वेताः ब्रह्मणोव्यक्तजन्मनः। ऋभुं सनत्कुमारं च ससर्जादौ

सनातनः। तौ चोर्ध्वरेतसौ दिव्यौ चाग्रजौ ब्रह्मवादिनौ। कुमारौ ब्र
ह्मणस्तुल्यौ सर्वज्ञौ सर्वगामिनौ। वक्ष्येहमार्यकि त्वेतेषां मुनीनां गृ
हमेधिनां। समासतो मुनिश्रेष्ठाः प्रजासंभूतिमेव च। शतरूपा तु वै
राज्ञी विराजमसृजत्प्रभुं। स्वायंभुवात्तु वै राज्ञी शतरूपा त्वयोनि
जा। लेभे पुत्रद्वयं पुण्यं तस्मात्कन्याद्वयं च सा। उत्तानपादो ह्यवरो
धीमान् ज्येष्ठः प्रियव्रतः। ज्येष्ठा वरिष्ठा त्वाकूतिः प्रसूतिश्चानुजा
स्मृता। अपयेमे तदाकूतिं रुचिर्नाम प्रजापतिः। प्रसूतिं भगवान्
दक्षो लोकधात्री तु योगिनी। दक्षिणासहितं यज्ञमाकूतिः सुषु
वे तदा। दक्षिणा जनयामास दिव्यान्द्वादश पुत्रकान्। प्रसूतस्तु
सुमेदस्य दक्षा नर्मनरावहा। श्रद्धां लक्ष्मीं धृतिं तुष्टिं पुष्टिं मेधां क्रि

बुद्धिर्लज्जा वपुः शान्तिः सिद्धिः कीर्त्तिर्महातपाः । ख्यातिं सतीं त्वसंभूतिं प्रीतिं स्मृतिं क्षमां तथा ॥ ८
थां तथा ॥ संनतिं चानुसूयां च ऊर्जां स्वाहां सुरारणीं । स्वधां चैव
महाभागां प्रददौ च यथाक्रमं । श्रद्धाद्याश्चैव कीर्त्यन्तास्त्रयोदश कु
मारिकाः । धर्मं प्रजापतिं जग्मुः पतिं परमदुर्लभं । अपरे ये भृगुर्धी
मान् ख्यातिं तां भार्गवारिणीं । संभूतिं तु मरीचिस्तु स्मृतिं चैवांगिरा
मुनिः । प्रीतिं पुलस्त्यः पुण्यात्मा क्षमां तां पुलहो मुनिः । क्रतुश्च संनतिं
धीमान् अत्रिश्चाथानसूयिकां । ऊर्जां वसिष्ठो भगवान् वरिष्ठो वारि
जेक्षणां । विभावसुस्तथा स्वाहां स्वधां वै पितरस्तथा । पुत्री कृता स १४
ती या सा मानसी शिवसंभवा । दक्षेण जगतां धात्री रुद्रमेवाश्रिता
पतिं । अर्धनारीश्वरं दृष्ट्वा सर्गादौ कनकांडजः । विभजस्वेति चाहादि
यदा जाता तदाभवत् । तस्याश्चैवांशजाः सर्वाः स्त्रियः त्रिभुवने तु याः

एकादशविधा रुद्रास्तस्य चांशोद्भवाः स्मृताः । स्त्रीलिंगमखि
लं सा वै पुल्लिंगं नीललोहितः । तां दृष्ट्वा भगवान् ब्रह्मा दक्षमालो
क्य मुक्तवान् । भज स्वधात्रीं जगतां ममापि च तवापि च । महद्दुःखन
कात्त्रात्री दुःखात्सुत्रीति होक्तिता । तस्मात्पुत्री सती नाम्ना तवैषा
च भविष्यति । एवमुक्तस्तदा दक्षो नियोगाद्ब्रह्मणो मुनिः । तथा पु
त्रीं ददौ साक्षात् सतीं रुद्राय सादरं । धर्मस्य पत्न्यः श्रद्धाद्याः कीर्तिता
वै त्रयोदश । तासु धर्मप्रजां वक्ष्ये यथाक्रममनुत्तमां । कामो दर्पो
य नियमः संतोषो लोभ एव च । श्रुतस्त्वथ दंडः समयो बोधश्चैव महा
द्युतिः । अप्रमादश्च विनयो व्यवसायो द्विजोत्तमाः । क्षेमं सुखं य
शश्चैव धर्मपुत्राश्च तासु वै । धर्मस्य वै क्रियायास्तु दंडः समय एव च

ऽश्र्श्रमादस्तथा लोहमेलं केऽग्मैस्तानौ सुतौ॥ तस्मात्पंडरीकोवैतेनातां सु
धर्मा त्मजा स्तिहा [illegible] वरव्या तिर्विष्णुप्रियां श्रियं। धाता
रं च विधातारं मेरोर्जामातरा[illegible]। संभूतिर्नामयापत्नीमरीचेसुषुवे
सुतौ। पौर्णमासं कुमारी च [illegible] कन्याश्चतुष्टयी। सृष्टिर्ज्येष्ठा च वै दृष्टिः स
ष्वा विध्नौ पचितिस्तथा॥ क्षमा तु सुषुवे पुत्रान् पुत्रीश्च पुलहात्मजा। क
र्दमं चार्वरीयांसं सहिष्णुं मुनिसत्तमा॥ तथा कनकपीवासं पीवरी पृ
थिवीसमा। प्रीतां पुलस्त्यश्च तथा जनयामास वै सुतान्। दत्तोर्लि वेद
बाहुं च पुत्री चान्यां दृषद्वतीं। पुत्राणां षष्टिसाहस्रं संनतिः सुषुवे श्र १५
मा। क्रतोस्ते न्यायार्तिसर्वे वालखिल्या इति स्मृता। सिनीवाली कुहूं
चैव राका मनुमतीरपि। स्मृतिश्च सुषुवे पत्नी मुनेश्चांगिरसः स्तथा॥ ल

लब्धानुभावमग्निं च कीर्तिमंतं च सुव्रता। अत्रेर्भार्यानुसूयात्र
सुषुवे च प्रजाश्च सा॥ ता स्वेका कन्यकानाम्ना श्रुतिसा सूनु पंच वै
सत्यनेत्रो मुनिर्जम्यो मूर्तिरापः शनैश्चरः। सोमश्च सुषुवे श्रुति षष्ठो
पेर्वस्थिश्च सूनवः। ऊर्जा वसिष्ठा दैतेभे सुतान् सुनव [illegible]
यसी पुंडरीकाख्यात् वासिष्ठां वर जोवना॥ रजः सुहोत्रो धर्म
बाहुः सवनश्चानघस्तथा। सुतपाः शुक्र इत्येते मुनेर्वै सप्त सून
वः। यस्त्वानिमानि नगवान् महात्मा पौर्तमिं वह्नि रसुप्रजानां। हे४
न१ स्वाहार्चस्मा सुषुवे [illegible] सुतान् त्रयाणां जगतां हिताय॥ ॥६॥
इत्यादिश्रि लिं[illegible] पंचमोध्याय॥ ॥सूतो उ०:॥
[illegible] कः पवमानश्च शुचिरग्निश्च ते स्मृताः॥ निर्मथ्यः पवमानः

पवमानस्तु वै दक्षः पावकः स्मृतः । शुचिः सौरस्तु विज्ञेयः स्वाहापु
त्राः त्रयश्च ते । पुत्रैः पौत्रैश्च विह्नेस्तेषां संख्या संप्रकल्प्यते । विसृज्य
सप्तकं चाद्यौ चत्वारिंशत् नवैव तु । इत्येते वह्नयः प्रोक्ताः प्रणीयन्तेऽध्व
रेषु ये । सर्वे तपस्विनस्त्वेते सर्वे व्रतभृतस्तथा । प्रजानां पतयः सर्वे स
पका र्वे रुद्रात्मजाः स्मृताः । अयज्वानश्च यज्वानः पितरः प्रीतमानसाः । अग्नि
ष्वात्तास्त्वयज्वानः शेषा बर्हिषदः स्मृताः । मेनां तु मानसीं तेषां जनया
मास वै स्वधा । अग्निष्वात्तात्मजा मेना मानसी लोकविश्रुता । असूत मे २८
३ नामैनाकं क्रौञ्चेन सह चानुजाम् । गङ्गा हिमवतो यज्ञे नगात्रो पार्वती
धारिणी जनयामास मानसी यज्ञभाजिनी । स्वधा त्वाः मेरुराजस्य
पुत्री पत्नी पद्मसमानना । पितर यो रिव प्रोक्ता स्तेषां चैव तु विस्तरः स्तु

ज्ञो मरणेऽनिमुक्ते तस्मात्ह रुद्रानुपितामह ॥ नमोऽस्तु वो महादेवा स्त्रीनेत्रानीललोहिता ७
वीणां वक्तुं तं सर्वं सानुबंधं सविस्तरं । वदामि प्रथमाध्याय सोऽसृज
ते वस्तद ध्यनः । तां ध्यात्वा सृजन्तु दौ दाक्षायणी सतीयाता पार्श्व
रुद्रस्य पार्वती । पश्चाद् दक्षं विनिंद्यैषा पतिं लेभे भवं तदा । तां ध्यात्वा
सृजन्तु द्रांस्त्वनेकान्नीललोहितः ॥ ऽमनस्तु समानान् सर्वान् सर्व
लोकनमस्कृतान् । या वितो मुनिश्रा ईजा ब्रह्मणा प्रहसन् रुषा ता
ते स्तु संस्थादि ते सर्वं च तर्दन्नाविधं जगत् । तान् दृष्ट्वा विविधान् रु
द्रान् निर्मलान् नीललोहितान् सर्वज्ञा सर्वगा दीर्घा ह्रस्वा वामनकाः शु
भाः । हरिकेशाश्च दृष्टिघ्ना नित्या बुद्धाश्च निर्मला । निर्द्वन्द्वा वीतरागा ग्रा
श्च विश्वात्मानो भवात्मजा । एवं स्तुत्वा तदा रुद्रान् रुद्रमाह भवं शिवा
परि क्रियौ कृत्वा तदा भगवान् कनकाण्डजः ॥ नमोऽस्तु ते महादे-

प्रज्ञो नाहं सि शंकरः। सूक्ष्मत्वदुहीनो विज्ञो सर्वमृत्युमुक्तः प्रभो। तत्स्त
मा हं नानावान् नहि मे तादृशी स्थितिः। सत्वं स्त्रनायथाकामं मृत्युयुक्ता प्रजा
प्रभो। तब्रूनुक्तः स स्रज्यामि शंकराः ब्रनुरानन। निकलस्यात्मनः शंभोस्त
छाध्वतशरीरिणां शंशोरु द्रःसर्वभूतानां करोतीघृणायायतः। शंकर
श्चाप्रयत्नेन तदात्मा योगविद्यया। वैराग्यात् नोविरक्तस्य विमुक्तिर्यच्छ
मुच्यते। अरणोक्तविषयत्यागो विज्ञानस्य विचारितः मुच्यते न यतः क्रमा
त्। वैराग्याज्जायते मोक्षो विरागो दर्शनांतरे। विमुख्यो वै गुणत्यागो वि
ज्ञानस्या विचारनः। तस्य चास्य च संधाने प्रसादात्परमेष्ठिनः। धर्मो ज्ञा १७
नं च वैराग्यं सैश्वर्यं शंकरादिह। स एव शंकरः साक्षात्पिनाकी नीललो
हितः। यश्शंकराश्रिताः सर्वे मुच्यंते ते न शंकरः। नगच्छेत्वन नरकं पापि

ष्ठा अपि दारुणे। आश्रितां शंकरं तस्मां दाश्रयं ते च शाश्वते॥ ॥ऋ
षय ऊचुः॥ ॥मोहोतास्त्रैव घोराद्या ह्यष्टाविंशतिरेव ता। कोटयो
नरकाणां तु पच्यंते तासु पापिनः। अनाश्रिताः शिवं रुद्रं शंकरं नील
लोहितं। आश्रयं सर्वभूतानामनामयमजापतिं। पुरुषं परमात्मा
नं पुरुहूतं पुरुष्टुतं। तमसा कालरुद्राख्यं रजसा कनकांडजं। स
त्वेन सर्वगं विष्णुं निर्गुणत्वे महेश्वरं। केन गच्छंति नरकं नराः केन
महामते। कर्मणा कर्मणा वापि श्रोतुं कौतूहलं हि नः॥ ॥इत्या
दि पुराणे श्री लिंगे सृष्टिक्रमे रुद्राणां सृष्टो पष्ठोऽध्यायः॥ ॥
सूत उ॥ ॥रहस्यं वः प्रवक्ष्यामि भवस्यामिततेजसः। प्रभावं शंक
रस्याद्यं संक्षेपात्सर्वदर्शिनः। योगिनः सर्वतत्वज्ञाः परं वैराग्यमा

श्रिताः। प्राणायामादिभिश्चाष्ट साधनैः सहचारिणा। करुणादिगुणोपे
ताः कृत्वापि विविधानिते। कर्माणि नरकं स्वर्गं न गच्छस्यदकर्मणा।
प्रसादाज्जायते ज्ञानं ज्ञानान्नु योगः प्रवर्त्तते। योगेन जायते मुक्तिः
प्रसादात्सर्वमेव तः॥ ॥ऋषय ऊचुः॥ ॥प्रसादाद्यदि वै ज्ञानं स्व
रूपं वक्तुमर्हसि॥ दिव्यं माहेश्वरं चैव योगं योगविदां वरः। कथं क
रोति भगवान्चिंतया सहितः शिवः। प्रसादं योगमार्गेण कस्मिन्का
ले नृणां विभुः॥ ॥सूत उ॥ ॥देवानां दानवानां च पितॄणां सन्निधौ
पुरा। शैलादिना तु कथितं ह्य एवं ते ब्रह्मसूनवे। व्यासावतारा
न्था द्वापरांते तु सुव्रता। योगाचार्यावताराणि तथा तिष्यंतु शूलिनः
तत्र तत्र विभो शिष्याश्चत्वारः शमजा जनाः। प्रशिष्या बहवः तेषां प्रसी

दत्येनमीश्वरः। एवं क्रमागतं ज्ञानं मुखादेवं नृणां विभोः। वैश्यांते
ब्राह्मणांतं हि घृणया चानुरूपतः॥ ॥ऋषय उ॥ ॥द्वापरे द्वापरे
व्यासाः के नु कीचांतरेषु वै। कल्पेषु कस्मिन्कल्पे नो वक्तुमर्हसि चा
न्तरान्॥ ॥रोमहर्षण उवाच॥ ॥शृएवं तु कल्पे वाराहे द्विजा वैव
स्वतांतरे। व्यासांश्च सांप्रतं रुद्रान् तथा सर्वांतरेषु ते। वेदानां
च पुराणानां तथा ज्ञानप्रदर्शकान्। यथाक्रमं प्रवक्ष्यामि सर्वा
वर्त्तेषु सांप्रतं। क्रतुः सत्यो भार्गवश्चांगिराः सविता द्विजाः। मृत्युः श
तक्रतुर्धीमान् वसिष्ठो मुनिपुंगवः। सुमतेजाः स्वधर्मश्च नारदश्चैव
इति स्मृतः। तरक्षुस्त्र्यारुणिर्धीमान् तथा चैव कृतंजयः। ऋतंज
यो भरद्वाजो गौतमः कविसत्तमः। वाचःश्रवा मुनिः साक्षात् तथा शु

स्मायणीं श्रुचिः। रुण बिंदुमुनीरिकुः शाक्रीशाक्रेयवं तमः। जातू
कर्णो हरिः साक्षात् कृष्णः द्वैपायनः प्रभुः। व्यासास्त्विते चक्षुण्यंतनक्
जोयोगीश्वरान् क्रमात्। असंख्याता हि कल्पेषु विष्णोः सर्वांतरेषु च
कलौ रुद्रावताराणि व्यासानां कलिगौरवान्। वैवस्वतांतरे कल्पे
वाराहे ये च तान् पुनः। अवतारान् प्रवक्ष्यामि तथा सर्वांतरेषु वै।
कृष्णयज्ञ॥ ॥मन्वंतराणि वाराहे वक्तुमर्हसि सांप्रतं। तथैव चोर्ध्व ५९
कल्पेषु सिद्धान् वैवस्वतांतरे॥ ॥रोमहर्षण उवाच॥ ॥मनुः स्वायंभुव
श्चाद्यास्ततः स्वारोचिषो द्विजाः। उत्तमस्तामसश्चैव रैवतश्चाक्षुषस्तथा
वैवस्वतश्च सावर्णिर्धर्मसावर्णिकः परः। पिशंगश्चापिशंगाभः शबल
लो वर्णकः स्तथा। औकारांतास्त्वकारांता ह्यामनवः परिकीर्तिताः। श्वे

म

तः पांडुस्तथा रक्तस्ताम्रपीतश्च कापिलः। कृष्णः श्यामस्तथा धूम्र
ः सुधूम्रश्च द्विजोत्तमाः। अपिशंगपिशंगश्च त्रिवर्णः शबलस्तथा। कर्बु
धुरिछं कथिता वर्णतो मनवः शुभाः। नमितो वर्णतश्चैव वर्णतः पु
नरेव च। स्वरात्मानः समाख्याताश्चांतरे शासमासतः। वैवस्वतस्तु क
रस्य मनुकृष्णस्सुरेश्वरः। सप्तमस्तस्य वक्ष्यामि युगावर्तेषु योगिनः।
समतीतेषु कल्पेषु तथा चानागतेषु च। वाराहे सांप्रते ज्ञेया सप्त चांत
रे वक्रमात्। योगावताराश्च विभोः शिष्याणां संततिस्तथा। संप्रवक्ष्ये स
र्वकालेषु तेषावर्तेषु योगिनां। आद्ये श्वेतकारो रुद्रः सुताराभवे
नस्तथा पुत्त्वगोत्र कंकनश्चैव लोकाक्ष्यामुनिसत्तमाः। जैगीषव्य
महातेजा भगवान् दधिवाहनः। ऋषभश्चा मुनिर्धीमान् उग्रश्चात्रिः

शुवालिकः। गौतमश्चैवगोकर्णे गुहावासशिखंडधृक्। जटामा
ल्यट्टहासश्च दारुको लांगलीतथा। महाकायोमुनिः शूली। डिंडिमु
डीश्वरः स्वयं। सहिष्णुः सोमशर्मा च नकुलीशोजगद्गुरुः। वै..
तेतरे सम्यक् प्रोक्ताहि परमात्मनः। योगाचार्यावतारायेसर्वा
वर्त्तेषु सुव्रताः। व्यासास्त्वेवंमुनिः श्रेष्ठा द्वापरे द्वापरे त्विमे। योगी
श्वराणां चत्वारः शिष्याः प्रत्येकमव्ययाः। श्वेतः श्वेतशिखश्चैव श्वे
ताश्वश्वेतलोहितः। दुंदुभिः शतरूपश्च ऋचीकः केतुमांस्तथा। वि २०
शोकश्च विकेशश्च विपाशः पाशनाशनः। सुमुखो दुर्मुखश्चैव दु
र्दमो दुरतिक्रमः। सनकः सनातनश्चैव प्रभुर्यश्च सनंदनः। ऋभुः
सनत्कुमारश्च सुधामा विरजास्तथा। शंखपाद्विनतश्चैव मेघः सा

रस्वतस्तथा। सुवाहनो मुनिः श्रेष्ठो मेघवाहो महाद्युतिः। कपिला
श्चासुरिश्चैव तथा पंचशिखो मुनिः। वल्कलश्च महायोगी धर्मात्मा
महौजसः। पराशरश्च गर्गश्च भार्गवश्चांगिरास्तथा। बलबंधुर्नि
रामित्रः केतुशृंगस्तपोधनः। लंबोदरश्च लंबश्च लंबाक्षो लंबके
शरः। सर्वज्ञः समबुद्धिश्च साध्यः साध्यस्तथैव च। सुधामा काश्यपश्चैव
वसिष्ठो विरजास्तथा। अत्रिरुग्रस्तथैव च श्रवणोथ श्रविष्टकः। का
श्यपो ह्युशनाश्चैव च्यवनोथ बृहस्पतिः। उतथ्यो वामदेवश्च महा
कायो महानिलः। वाचश्रवा सुधीकश्च सुवाकः स्वयमीश्वरः। [illegible]श्या
नाभः कौशल्यो लौकाक्षः कुथुमिस्तथा। सुमंतुर्बर्बरी विद्वान् क
बंधः कुशिकंधरः। प्लक्षो दार्भायणिश्चैव केतुमान् गोपकस्तथा।

त्रापी पृथुपिंगाश्च श्वेतकेतुस्तथैव च। कपिंजो दृढहुश्च देवला
कविरेद। शालिहोत्राग्निवेश्यश्च युवनाश्वशरद्वसुः। छगलः कुं-
कुंडकश्चैव कुंतश्चैव प्रवाहकः। उलूको विद्युतश्चैव मंडूको ह्याश्व-
लायनः। अक्षपादः कुमारश्च कूर्णको वत्स एव च। कुशिकश्चैव गर्गश्च
मित्रको रुष्य एव च। शिष्यास्त्वेते महात्मानः सर्वावर्त्तेषु योगिनां। वि-
मला ब्रह्मभूयिष्ठा ज्ञानयोगपरायणाः। एते पाशुपताः सिद्धा भस्मोद्धू-
लितविग्रहाः। शिष्याः प्रशिष्यास्त्वेतेषां शतशोथ सहस्रशः। प्राप्य पाशु- २१
पतं योगं रुद्रमूर्त्तिमयाः स्थिताः। देवादयः पिशाचांताः पशवः परिकी-
र्त्तिताः। तेषां पतित्वात्सर्वेषां भवः पाशुपतिः स्मृतः। तेन प्रणीतो रुद्रे-
ण पशूनां पतिना द्विजाः। योगः पाशुपतो ज्ञेयः परापरविभूतये॥ ॥

इत्यादि महापुराणे लिंगे रुद्रात्मावतीर्थकरोत्पत्तौ च सप्तमोध्यायः
॥ ॥सूत उ॥ ॥संक्षेपतः प्रवक्ष्यामि योगस्थानानि सांप्रतं। कल्पि-
तानि शिवेनैव हिताय जगतां द्विजाः। गलादधो वितस्त्या यन्नाभेरु-
परि चोत्तमं। योगस्थानमधो नाभेरावर्त्तं मध्यमं भ्रुवोः। सर्वार्थज्ञान-
निष्पत्तिरात्मनो योग उच्यते। एकाग्रता भवेच्चैव सर्वदा तत्प्रसा-
दतः। प्रसादस्य स्वरूपं यत् स्वसंवेद्यं द्विजोत्तमाः। वक्तुं न शक्यं ध-
र्मज्ञैः क्रमशो जायते नृणां। योगशब्देन निर्वाणं महेशपदमश्नुते। त-
स्य हेतुर्ऋषेर्ज्ञानं ज्ञानं तस्य प्रसादतः। ज्ञानेन निर्दहेत्पापं निरुध्य वि-
षयान्सदा। निरुद्धेंद्रियवृत्तिस्तु योगसिद्धिर्भविष्यति। योगः संरु-
द्धे वृत्तिश्चित्तस्य द्विजसत्तमाः। साधनान्यष्टधा चास्य कथितानीह सिद्धये

क्रमात्स्मृतयमः प्रोक्तो द्वितीयो नियमस्तथा। तृतीयमासनं प्रोक्तं
प्राणायामश्चतुर्थकः। प्रत्याहारः पंचमो वै धारणा च षष्ठकं। ध्यानं
ध्यानं सप्तममित्युक्तं समाधिस्त्वष्टमः स्मृतः। तपःसुपरमस्यैव अय
मइत्यभिधीयते। अहिंसा प्रथमो हेतुर्यमस्य यमिनां वरा। सत्यमस्ते
यमपरं ब्रह्मचर्यापरिग्रहौ। नियमस्यापि वै मूलं यम एव न संशयः।
आत्मवत्सर्वभूतानां हितायैव प्रवर्तते। अहिंसैषा समाख्याता या चा
त्मज्ञानसिद्धिदा। दृष्टं श्रुतं चानुमितं स्वानुभूतं यथार्थतः। कथनं स
त्यमित्युक्तं प्राणिपीडाविवर्जितं। नाश्लीलं कीर्तयेद्दैवं ब्राह्मणानामि २२
ति श्रुतिः। परदोषान्परिज्ञाय न वदेदिति चापरं। अनादानं परस्वा
नामापद्यपि विचारतः। मनसा कर्मणा वाचा तदस्तेयं समासतः। मै

थुनीस्यापवृत्तिर्हि मनोवाक्कायकर्मणा। ब्रह्मचर्यमिति प्रोक्तं
यतीनां ब्रह्मचारिणां। इहाविशानस्तानां च विदाराणां विशेषत
सदाराणां गृहस्थानां गृहस्थानां वदामि वा। स्वदारे विधिवत्कृत्वा
निवृत्तिश्चान्यतः सदा। कर्मणा मनसा वाचा ब्रह्मचर्यमिति स्मृतं
मेध्यस्वनारीसंभोगं कृत्वा स्नानं समाचरेत्। एवं गृहस्थो युक्ता
त्मा ब्रह्मचारी न संशयः। अहिंसाप्येवमेवैषा द्विजगुर्वग्निपूजने
विधिना यादृशी हिंसा सा त्वहिंसा इति स्मृता। स्त्रियः सदा परि
त्याज्याः संगं नैव च कारयेत्। कुणपेव यथा विष्टं तथा कुर्वी
त सर्वदा। विण्मूत्रोत्सर्गकाले तु बहिर्भूमौ यथा नरः। तथा का
र्यं कृतौ चापि स्वदारे नान्यकं ततः। अंगारसदृशी नारी घृतकुंभ
ततः

पुनचान्यतः

ग्रमः पुमान्। तस्मान्नारीप्रसंसर्गं दूरतः परिवर्जयेत्। न भोगेन तृप्तिर्वै
नास्ति विषयाणां विचारतः। तस्माद्विरागः कर्तव्यो मनसा कर्मणा गिरा।
न जातु कामः कामानामुपभोगेन शाम्यति। हविषा कृष्णवर्त्मेव भूय
एवाभिवर्धते। तस्मात्त्यागः सदा कार्यस्त्वमृतत्वाय योगिना। अविरक्ता
यतो मर्त्यो नानायोनिषु वर्तते। त्यागेनैवामृतत्वं हि इति वेदविदो वराः
कर्मणा प्रजया नास्ति द्रव्येण मुनिसत्तमाः। तस्माद्विरागः कर्तव्यो म २३
नोवाक्कायकर्मणोः। कृताकृतौ नि[illegible] ब्रह्मचर्यमिति स्मृतं। यमाः
संक्षेपतः प्रोक्ता नियमांश्च वदामि वः। शौचमिज्या तपो दानं स्वाध्यायो
पस्थनिग्रहः। व्रतोपवासमौनं च स्नानं च नियमा दश। नियमस्या
दनीहा च शौचं तुष्टिस्तपस्तथा। जपः शिवप्रणिधानं पद्मकाद्यं तथा

सनं। बाह्यमाभ्यंतरं प्रोक्तं शौचमाभ्यंतरं वरं। बाह्यशौचेन संयुक्तः
सदैवाभ्यंतरं चरेत्। आग्नेयं वारुणं ब्राह्मं कृत्वा शौचं समाचरेत्
स्नानं विधानतः सम्यक् पश्चादाभ्यंतरं चरेत्। आदेहांतं मृदालि
प्य तीर्थतोयेषु सर्वदा। अवगाह्यापि मलिनो ह्यंतःशौचविवर्जि
तः। शैवलाः झषकाः मत्स्याः सत्वा मत्स्योपजीविनः। सदावगाह्य
सलिले विशुद्धाः किं द्विजोत्तमाः। तस्मादाभ्यंतरं शौचं सदा कार्यं वि
धानतः। आत्मज्ञानांभसि स्नात्वा सकृदालिप्य भावतः। सुवैराग्य
मृदा शुद्धः शौचमेवं प्रकीर्तितं। शुद्धस्यासिद्धयो नैव यदा शुद्धस्य
सिद्धयः। अध्यायेनागतया वृत्त्या संतुष्टो यस्तु सुव्रतः। स संतोषस्त मत
तं प्रतीतः र्थस्य चास्पृहता। चांद्रायणादौ निपुणः तपांसि व्रत[illegible]

इनस्तु तपः प्रोक्तः प्रणवश्च त्रिधा स्मृतः। वाचिकस्त्वधमो मुख्यो
उपांशुः श्रोत्रमोत्तमः। मानसो विस्तरेणैव कल्पे पंचाक्षरे स्मृतः। नि
ध्या शिवप्रणीधानं मनोवाक्कायधर्मणा। शैवे ज्ञाने गुरौ भक्तिरचला
सुप्रतिष्ठिता। निग्रहे दपहृत्याशु प्रसक्तानींद्रियाणि च। विषयेभ्यः स
मासेन प्रत्याहार प्रकीर्तितः। चित्तस्य धारणा प्रोक्ता स्थानबंधः समास
तः। तस्यां त्ववस्थितिर्ध्यानं समाधिस्तद्विचारता। तत्रैकतानता ध्याने.
प्रत्ययांतरवर्जिता। चिन्मात्रमर्थमात्रस्य देहशून्यमिवस्थितः। समा २८
धिः सर्वदेवस्य प्राणायाम इतिस्मृतः। प्राणः स्वदेहजो वायुः यमस्तस्य
निरोधनं। त्रिधा द्विजैर्यमः प्रोक्तो ह्यधमो मध्योत्तमस्तथा। प्राणापाननि
रोधस्तु प्राणायाम इतिस्मृतं। प्राणायामस्यमानं तु मात्राद्वादशकं स्मृतं।

नीचो द्वादशमात्रस्तु यनो द्वादशकः स्मृतः। मध्यमस्तु विनिर्घातश्च
तुर्विंशतिमात्रकः। मुख्यस्तु यः त्रिरुद्घातः षट्त्रिंशन्मात्र उत्तमः। प्रस्वे
दकंपनोत्थानजनकश्च यथाक्रमं। आनंदोद्भवयोगार्थे निद्रायोग्य
स्तथैव च। नेत्रयोरंधकारं स्यात् रोमांचध्वनिकंपनं। भ्रमणं स्वेदजा
ल्पो गात्र संधिमूर्छादयोपि च। तदोत्तमोत्तमः प्रोक्तः प्राणायामस्तु योगि
नः। सगर्भो गर्भ इति प्रोक्तः सजयो विजयक्रमात्। इभो वा शरभो वापि
दुराधर्षोथ केसरी। गृहीतः सेव्यमानस्तु सस्वाभ्यासतो व्रजेत्
यथा स्वस्थस्तु जायते। तथा समीरणः स्वस्थो दुराधर्षस्तु योगिना।
त्यायतः सेव्यमानस्तु स एतास्यः स्वर्तं व्रजेत्। सचैवं मृगराट् नाग शा
र्दूलो वापि दुर्दमः। कालांतरवशाद्योगा दृश्यते परमादरात्। स्वै

स्विद्यान् स्वस्थे समत्वे चाधिगच्छति। योगादस्य समानस्के श्च मुन
श्च हृज्जयते। एवमभ्यस्यमानस्तु मुनेः प्राणो विनिर्दहेत्। मनोवाक्काय
जान् दोषान् कर्तुर्देहं च रक्षति। संयुक्तस्य तथा सम्यक् प्राणायामेन धी
मता। दोषास्तस्य प्रणश्यन्ति निष्ठासत्वे च जायते। प्राणायामेन सिध्यन्ति
दिव्याः शान्त्यादयनुक्रमात्। शान्तिः प्रशान्तिर्दीप्तिश्च प्रसादश्च यथाक्रमात्
आदौ चतुष्टयस्येह प्रोक्ता शान्तिरिह द्विजाः। सहजागन्तुकानां च पाप
ानां शान्तिरुच्यते। प्रशान्तिः संयमः सम्यक् वचसामिति संस्मृता। प्रका २५
शो दीप्तिरित्युक्तः सर्वदिक्सर्वदा पुनः। सर्वेन्द्रियप्रसादश्च बुद्धेर्वै मारु
तामपि। प्रसाद इह संप्रोक्तः शान्तिरिह चतुष्टये। प्राणोपानः समानश्च
उदानो व्यान एव च। नागः कूर्मश्च कृकरो देवदत्तो धनंजयः। एतेषां यः

शो° १

प्रसादस्तु मरुतामिति संस्मृतः। प्रयाणं कुरुते यस्माद्वायुः प्राण इति
स्मृतः। अधो नयत्यपानस्तु आहारादीन् क्रमेण तु। व्यानो व्यानसं
व्यानां गंधादीनां प्रकोपनः। उद्वेजयति मर्माणि उदानोयं प्रकीर्ति
तः। समानयति गात्राणि समानः पंचवायवः। उद्गारे नाग आख्यातः
कूर्म उन्मीलने स्मृतः। कृकरः क्षुतकश्चैव देवदत्तो विजृम्भणे। धनंज
यो महाघोरः सर्वगः सम्मृतेपि हि। इति यो दशवायूनां प्राणायामेन सि
ध्यति। प्रसादोस्य तुरीयान्तः संज्ञो विप्राश्चतुष्टये। विस्वरस्तु महान् प्र
ज्ञा प्रज्ञानो ब्रह्म चितिः स्मृतिः। ख्यातिः संवित्ततः पश्चादीश्वरो मतिरेव च।
६ ऐते वैरेते द्विजाः संज्ञा महतः परिकीर्तिताः। अस्य बुद्धेः प्रसादस्तु प्राणा
यामेन सिध्यति। विस्वरो विपूरी त्वानां द्वंद्वानां मुनिसत्तमाः। अयं

ॐ सर्वसत्वानां महान्यत्परिमाणतः। यस्मान्मोणगुहाद्युत्पन्नं
संस्तनुते पतः। देहणत्वाद् हत्वाच्च ब्रह्म ब्रह्मविदांवराः। सर्वकर्मा
णि ...गार्थयाश्चिनोति चितिस्मृतिः स्मरते यः स्मृतिः सर्वसंविद्वे वि
द ...यतः। रूयायते त्वितयस्माति ज्ञानादिभिरनेकशः। सर्वतत्वाधि
पः सर्वबीजान्मतियदीश्वरः। मनुते मन्यते यस्मान्मतिर्मतिमतां
वरा। अवबोधयते यच्च बुध्यते बुद्धिरुच्यते। अस्यास्तु द्वेप्रसादस्तु
प्राणायामेन सिध्यति। दोषान् विनिर्दहेत् सर्वान् प्राणायामाद् सौ २६
यमी। पातकं धारणाभिस्तु प्रत्याहारेण निर्जयेत्। विषयान् विषव
द्ध्यात्वा ध्यानेनानीश्वरान् गुणान्। समाधिना यतिश्रेष्ठः प्रज्ञावृद्धिं वि
वर्धयेत्। स्थाने जेष्ठेव कुर्वीत योगाष्टांगानि वैक्रमात्। वध्वासनानि
६।

विधिवद्योगसिद्ध्यर्थमात्मवित्। अदेशकाले योगस्य दर्शनं हि न वि
द्यते। अग्न्यभ्यासे जले वापि शुष्कपर्णचये तथा। जंतुव्याप्ते श्मशाने च।
जीर्णगोष्ठे चतुष्पथे। सशब्दे सभये वापि चैत्यवल्मीकसंचये। अ
शुभे दुर्जनाक्रांते मशकादिसमन्विते। न चरेद् देहबाधायां दौर्मनस्य
स्यादिसंभवे। सुगुप्ते सुशुभे रम्ये गुहायां पर्वतस्य तु। भवहे त्रे सुगु
प्ते वाथवा रामे वने पि वा। गृहे शुचौ शुभे देशे विजने जंतुवर्जिते।
अत्यंतनिर्मले सम्यक् सुप्रलिप्ते विचित्रिते। दर्पणोदरसंकाशे हृ
ष्णागुरुसुधूपिते। नानापुष्पसमाकीर्णे वितानोपरिशोभिते। फ
लपल्लवमूलाद्यैः कुशपुष्पोपशोभिते। समासनस्थो योगांगान
भ्यसेत् हर्षितः स्वयं। प्रणिपत्य गुरुं पश्चात् भवं देवीं विनायकं। योगी

श्वरान् सशिष्यांश्च योगं युंजीत योगवित्। आसने स्वस्तिकं बद्ध्वा पं-
अमर्धासनं तु वा। समजानुरथो धीमान् एकजानुरथापि वा। सुसं-
स्थि[illegible]नासनो भूत्वा संहृत्य चरणावुभौ। संवृतास्योपबद्धाक्ष उरो विष्ट-
भ्य चाग्रतः। पार्ष्णिभ्यां वृषणौ रक्षन् तथा प्रजननं बुधः। किंचिदुन्नामि-
तशिरा दंतैर्दंतान्न संस्पृशेत्। संप्रेक्ष्य नासिकाग्रं स्वं दिशश्चानवलो-
कयन्। तमः प्रच्छाद्य रजसा सत्वेन छादयन् रजः। ततः सत्वस्थितो भू- २७
त्वा शिवध्यानं समभ्यसेत्। ॐकारवाच्यं परमं शुद्धं दीपशिखाकृति।
ध्यायेद्वै पुंडरीकस्य कर्णिकायां समाहितः। नाभेरधस्ताद्वा द्वि-
न् ध्यात्वा कमलं सुमनोरमं। अंगुलं चाष्टपत्रं तु गुणाष्टकमयं परं। त्रि-
कोणं च तथाग्नेयं सौम्यं सौरं स्वशक्तिभिः। सौरं सौम्यं तथाग्नेयमथवा

नुक्रमेण तु। आग्नेयं च तथा सौरं सौम्यमेवं विधानतः। अग्नेरधः प्र-
कल्प्यैवं धर्मादीनि च तुष्टये। गुणत्रयक्रमेणैव मंडलोपरि भावये-
त्। सत्वस्थं चिंतयेद्रुद्रं स्वशक्त्या परिमंडितं। नाभौ वाथ गले वापि
भ्रूमध्ये वा यथाविधि। ललाटफलिकायां वा मूर्ध्नि ध्यानं समाचरे-
त्। द्विदले षोडशारे वा द्वादशारे क्रमेण तु। दशारे वा षडस्रे वा चतु-
रस्रे स्मरेत्। तत्रिवे। कनकाभेन तथांगारसन्निभे सुसिते पि वा। द्वाद-
शादित्यसंकाशे चंद्रबिंबसमे पि वा। विद्युत्कोटिनिभे स्थाने चिंत-
ये[illegible]श्वरं। अग्निवर्णमथवा विद्युद्वलयाभं समाहितः। वज्रकोटि-
प्रभे स्थाने पद्मरागनिभे पि वा। नीललोहितबिंबं वा योगी ध्यानं समा-
चरेत्। महेश्वरं हृदि ध्यायन् नाभिध्ये सदाशिवं द्विमध्ये शांभुं ते स्थाने

अतींद्रियमनाभासं परं तत्वं परात्परं ५५

शिवध्यानं समभ्यसेत्॥ निर्मलं निष्कलं ब्रह्म प्रशांतं ज्ञानरूपिणं॥ अलक्ष
णमनिर्देश्यं मणोरल्पतरं शुभं॥ निरालंबमतर्क्यं च विनाशोत्पत्तिवर्जितं॥
कैवल्यं चैव निर्वाणं निःश्रेयसमनामयं॥ अमृतं चाक्षरं ब्रह्म अपुनर्भवम
द्भुतं॥ महानंदं परानंदं योगानंदमनामयं॥ हेयोपादेयरहितं सूक्ष्मात् सू
क्ष्मतरं शुभं॥ स्वसंवेद्यमवेद्यं तत् शिवं ज्ञानमयं परं॥ सर्वोपाधिविनिर्मुक्तं
ध्यानगम्यं विचारतः॥ अद्वयं तमसश्चैव परस्तात्संस्थितं परं॥ मनस्येवम
हादेवं हृत्पद्मे चापि चिंतयेत्॥ नाभौ सदाशिवं चापि सर्वदेवात्मकं प्रभुं॥ २८
देहमध्ये शिवं देवं शुद्धः ज्ञानमयं विभुं॥ कन्यसेनैव मार्गेण सोद्घाते
नैव शंकरं॥ कुंभकं कन्यसेनापि मध्यमेनापि सुव्रताः॥ उत्तमेनापि वि
द्वान् कुंभकेन समभ्यसेत्॥ द्वात्रिंशद्रेचयेद्विद्वान् रुद्रादीनां समाहितः॥

रेचकं पूरकं त्यक्त्वा कुंभकं च द्विजोत्तमाः॥ साक्षात्समरसेनैव देहमध्य
स्थितं शिवं॥ एकीभावं समित्येकं तत्र यद्रससंभवं॥ आनंदं ब्रह्म
णो विद्वान् साक्षात्समरसे स्थितः॥ धारणा द्वादशायामा ध्यानं द्वाद
शधारणं॥ ध्यानं द्वादशकं यावत् समाधिरभिधीयते॥ अथवा ज्ञानि
नां विप्राः संपर्कादेव जायते॥ प्रयत्नाद्वा तयोस्तस्य चिराद्वाप्यचि
राद्द्विजाः॥ योगांतरायास्तस्याथ जायंते युंजतः पुनः॥ नश्यंतेभ्यास
तस्तेपि प्रणिधानेन वै गुरोः॥ ॥इत्यादिमहापुराणे लिंगे पाशु
पते योगनिर्णयो ऽष्टमोध्यायः॥ ८॥ सूत उवाच॥ ॥आलस्यं प्रथमं
पश्चात् व्याधिपीडा प्रजायते॥ प्रमादः संशयश्चैव चित्तस्येहानवस्थि
तिः सदा॥ अश्रद्धा दर्शनं भ्रांतिर्दुःखं च त्रिविधं ततः॥ दौर्मनस्यमयो

ग्येषु विषयेष्वतिलोलता। द्वन्द्वाधा हि प्रजायन्ते मुनेर्योगान्तरायकाः।
आलस्यं चाप्रवृत्तिः स्यात् गुरुत्वात्कायचित्तयोः। व्याधयो धातुवैषम्या
त् कर्मजा योगजास्तथा। प्रमादश्च समाधेस्तु साधनानामभावनं
इदं वेत्त्युभयप्रोक्तं विज्ञानं स्यात्संशयात्। अनवस्थितचित्तत्वम
प्राप्तौ हि योगिनः। लब्धायामपि भूमौ च चित्तस्यानवबन्धनात्।
अश्रद्धा भावरहिता वृत्तिर्वै साधनेषु च। साध्ये चित्तस्य हि गुरौ ज्ञा
नाचारशिवादिषु। विपर्ययाज्ञानमिति भ्रान्तिदर्शनमुच्यते। अ
नरू नात्मन्यात्मज्ञानं किं ज्ञानमज्ञानात्। सत्यं दुःखमध्यात्मिकं प्रोक्तं तथा चैवा
८ धिभौतिकम्। आधिदैवतमित्युक्तं त्रिविधं सहजं पुनः। इच्छाविघातात्सं
क्षोभश्चेतसस्तदुदाहृतम्। दौर्मनस्यं निरोधव्यं वैगुण्येन परेण तु

हठस्त्री २

तमसा रजसा चापि संस्पृष्टं दुर्मनं स्मृतं। तदा मनसि यज्जातं दौ
र्मनस्यमिति स्मृतं। दृढीकरणं कृत्वा योग्यायोग्याविवेकतः।
विषयेषु विचित्रेषु जन्तोर्विषयलोलता। अन्तराया इति ख्याता योग
स्य ते हि योगिनः। अथ सन्तोषहयुक्तस्य नश्यन्ति च न संशयः। प्रन
ष्टेषु तरायेषु द्विजा पश्चाद्धि योगिनः। उपसर्गाः प्रवर्तन्ते सर्वे ते
सिद्धिसूचकाः। प्रतिभा प्रथमा सिद्धिर्द्वितीया श्रावणा स्मृता। वा
र्ता तृतीया विप्रेन्द्रा तुरीया चेह दर्शना। आस्वादः पंचमः प्रोक्तो
वेदना षष्ठिका स्मृता। स्वल्पषट्सिद्धिसंत्यागे सिद्धयः सिद्धयोगि
नः। प्रतिभा प्रतिभावृत्तिः प्रतिभा वितिसं। स्थिता बुद्धिर्विवेचनावे
द्यं बुध्यते बुद्धिरुच्यते। सूक्ष्मं व्यवहितं नीतं च विप्रकृष्टं त्वनागतं।

सर्वत्र सर्वदा ज्ञानेप्रतिज्ञानुक्रमेण तु। श्रावणं सर्वशब्दानां मंप्र
यत्नेन योगिनः। ह्रस्वदीर्घप्लुतादीनां गुह्यानां श्रवणादिषि। पर्श
यः। गान न्साधिगमो यस्त्र वेदनामुपपादितो। दर्शनात् दिव्यरूपाणां दर्श
नं चाप्रयत्नतः। सावित्र्यादि व्यरसेष्वस्मिन्नास्वादो ह्यप्रयत्नतः। वा
र्तानो दिव्यगंधानां तन्मात्रा बुद्धिसंविदः। विंदति योगिनः स्तस्मा
दाब्रह्मभुवने द्विजाः। सं त्याज्यं सर्वदा सर्वं। जगत्यस्मिन्न संदेह
ः चतुःषष्टिगुणं समं। औपसर्गिकमेतेषु गुणेषु गुणितं द्विजाः। ३०
सं त्याज्यं सर्वदा सर्वमौपसर्गिकमात्मना। पैशाचं पार्थिवं नाप्य
राक्षसानां पुरे द्विजाः। याक्षं तु तैजसं प्रोक्तं गांधर्वं श्वसनात्मकं
ऐंद्रं व्योमात्मकं सर्वं सौम्यं चैव तु मानसं। प्राजापत्यं त्वहंकारो

ब्राह्मे बौद्धमनुत्तमं। आद्ये चाष्टौ द्वितीये च तथा षोडश सिद्ध
यः। चतुर्विंशः तृतीये तु द्वात्रिंशच्च चतुर्थके। चत्वारिंशत्तं च भ
तु भूतमात्रात्मकं स्मृतौ। तथाष्टचत्वारिंशच्च षट्पंचाशत्तथैव
चा। चतुःषष्टिगुणं ब्राह्म्यं गुणितं द्विज सत्तमा। औपसर्गिकमाब्र
ह्मन्नवनेषु परित्यजेत्। लोकेष्वालोक्य योगेन योगवित् परमं
सुखं। स्थूलतां ह्रस्वतां बाल्यं बाधिक्यं यौवनं तथा। नानाजाति
स्वरूपं च चतुर्णां देहधारणं। पार्थिवांश विना नित्यं सुरभिगंध
संग्रहः। एतदष्टगुणं प्रोक्तं ऐश्वर्यं पार्थिवं महत्। जले निवसनं य
द्भूम्या-- मिव निर्गमं। इच्छेच्छक्तः स्वयं पातुं समुद्रमपि नातुरः। ऐ
यत्रेच्छति जगामस्मिं स्तत्रस्य जलदर्शनं। यद्यद्वस्तु समुद्दाय नोक्तुमि
गंधो रसश्च घा रूपं स्पर्शशब्दस्तथैव वा प्रत्येकमष्टधा सिद्धं एवमन्यत् क्रताः ८

ष्ठन्ति कामतः। तत्रैश्वर्यान्वितेनैतस्य त्रयाणां देहधारणं तु विना
पि हस्तेन जलपिंडस्य धारणम्। अत्रणत्वं शरीरस्य पार्थिवेन सम
न्वितं। एतत् षोडशकं प्रोक्तमाप्यमैश्वर्यमुत्तमं। देहाद्वह्निर्विनि
र्गमो। तत्रापत्रयवर्जितं। लोकं दग्धुमपीच्छन्वै शक्यं तस्य विधान
तः। जलमध्ये हुतवहं स्थाप्य तस्याभिरक्षणं। अग्निग्रहणे हस्तेन
स्मृतिमात्रेण पाचनं। भस्मीभूतविनिर्माणं यथापूर्वं च कामतः।
[illegible] रूपविनिष्पत्तिं विना नैस्त्रिंशात्मनो। चतुर्विंशात्मकं ह्येत
त्तैजसं मुनिपुंगवाः। मनोगतित्वं भूतानां अंतर्निर्विज्ञानं तथा। प ३१
र्वतादि महाभारस्कंधेनोद्वहनं पुनः। लघुत्वं गौरवत्वं च पाणिभ्यां
वायुधारणं। अंगुल्यग्रनिपातेन भूमेः सर्वत्र कंपनं। एकेन देहनि

निष्पत्तिः वा नैश्वर्यं स्मृतं बुधैः। छायाविहीना निष्पत्तिरिंद्रियाण
मदर्शनं। आकाशगमनं नित्यं इंद्रियार्थैः समंततः। दूरे च शब्दग्रहणं।
सर्वशब्दावगाहनं। तन्मात्रलिंगग्रहणं सर्वप्राणिनिदर्शनं। ऐन्द्रमै
श्वर्यमित्युक्तं एतैरुक्तैः पुनः पुनः। यथाकामोपलब्धिश्च यथाका
मविनिर्गमं। सर्वत्राभिभवश्चैव सर्वगुह्यनिदर्शनं। संसारदर्शनं
चैव मानसं [illegible] करणं। छेदनं ताडनं बंधं संसारपरिवर्तनं। सर्वभू
४५ तप्रसादश्च मृत्युकालजयस्तथा। प्राजापत्यमिदं प्रोक्तमाहंकारिकमु
त्तमं। अकारणजगत्सृष्टिस्तथानुग्रह एव च। प्रलयं साधिकारं च लो
कवृत्तप्रवर्तनं। एतावत्तत्त्वमित्युक्तं प्राधान्यं वैष्णवं परं। ब्रह्मणोऽन्ये
कृत्स्नं शक्यं वेत्तुमन्यैर्न शक्यते। विद्यतेतत्परं शैवं विष्णुनानावगम्यते।

असंख्येयगुणश्चैव कोजानीयाच्छिवात्मकं ।। बुद्धाने सिद्धयश्चैवा
णुपसर्गाः प्रकीर्तिताः । निरोधव्याप्त्रयं लेन वैराग्येण परेण तु । नाशं
विनाशयतां गत्वा निःस्पृयेषु जवेषु च । असद्दीर्यस्त्यजे सर्वं विमुक्त इति की
र्तितः । वैतृष्ण्यं पुरुषे ख्यातं गुणवैतृष्ण्यमुच्यते । वैराग्येणैव तत्त्याज्य
सिद्धयश्चौपसर्गिकाः । औपसर्गिकमाब्रह्मभुवनेषु परित्यजेत् । नि
रुध्य तत्त्यजेत्सर्वं प्रसीदति महेश्वरः । प्रसन्ने विमला मुक्तिः सोप्येवं
हि सुखी भवेत् । कश्चित्भूमिं परित्यज्य आकाशे क्रीडतीच्छया । उद्गिरेच्च ३२
कश्चिद्वेदानर्थान् सूक्ष्मानर्थान् समासतः । कश्चित्श्रुतिसमर्थेन श्लोकबंधं
करोति वा । कश्चिद्दंडकबंधेश्च कुर्याद्वेतु सहस्रशः । मृगपक्षिसमूहस्य
रुतज्ञानं च विंदति । ब्रह्माद्यं स्थावरांतं च हस्तामलकवद्भवेत् । बहुनात्र
वैराग्येण परेणैव । अथवानुग्रहार्थं च लीलार्थं वा तदा मुनेः । अनेकधा विवेष्टे ।

किं मुक्तेन विज्ञानानि सहस्रशः । पातालतलसंस्थांश्च समाधिस्थः स
पश्यति । आत्मविद्यानुबोधेन स्वस्थेनाचेतलेन तु । प्रसादामृतपू
र्णेन सत्वपात्रस्थितेन तु । तमो निहत्य पुरुषः पश्यते स्वात्मनीश्वरं
तस्य प्रसादाद्धर्मश्च ऐश्वर्यं ज्ञानमेव च । वैराग्यमपवर्गश्च नात्र कार्या
विचारणा ।। ।।इत्यादिमहापुराणे श्रीलिंगे योगानुष्ठानगुणख्या
पनो नाम नवमोध्यायः ।। ।।छ।। ।।सतां जितात्मनां साक्षाद्द्विजा
तीनां द्विजोत्तमाः । धर्मज्ञानां च साधूनां आचार्याणां शिवात्मनां । दया नां
वतां द्विजश्रेष्ठास्तथा चैव तपस्विनां । ~~अलुब्धानां च योगीनां~~ ह्यमात्म
नां विरक्तानां संज्ञानीनां नुज्ञानिनां । दाक्षिण्यमत्स्यादीनां अलुब्धानां
च योगिनां । श्रो तस्मान्नविदधातां प्रसीदति महेश्वरः । सद्भिति ब्राह्मणाः श्रद्ध

सदंतायेनं वंत्सुतः। सा श्रुत्यं ब्रह्म विंदंति तेन संतः प्रवक्ष्यते। दशा
त्मके यो विषये साधने चाष्टलक्षणे। नं कुर्वंति न तृष्यंति यतात्मानः
स्कृ तेस्मृताः। सामान्ये प्रवदन्त्येषु तथा वैशेषिकेषु च। ब्रह्मकृत्रं वि
शोयस्मात् प्रभुक्तास्तस्माद्द्विजा यते। वर्णाश्रमेषु युक्तस्य स्वर्गानोसुख
वारिणः। श्रौतस्मार्तस्य धर्मस्य ज्ञानान् धर्मज्ञ उच्यते। विद्यानां साधना
त्साधु ब्रह्मचारी गुरोर्हितः। क्रियाणां साधनात्साधुर्गृहस्थः साधुरुच्यते।
साधनात्तपसोरण्ये साधुर्वैखानसः स्मृतः। यतमानो यतः साधुः स्मृतो
योगस्य साधनात्। विप्राः क्रियातपेभ्यो न साधनाः साधवः स्मृताः। ३३
गृहस्थो ब्रह्मचारी च वानप्रस्थोय भिक्षुको। यश्चौ धर्मा विहिता केशि
ष्टौ वेतो क्रियात्मको कुशलाकुशलं धर्माधर्माविति स्मृतो। धारणा

अधारणे महत्वे च अधर्मे इति कीर्तितः १

द्धर्मं धत्ति सेवधातुराश्चप्रकीर्तितः। तत्रैषु प्रापको धर्म आचार्यै
श्चास्त्रदिष्यते। वृद्धास्त्वलोलुपाश्चैव आत्मवंतो ह्यदांभिकाः सम्य
क् विनीता ऋजवः स्तानाचार्यान् प्रचक्षते। स्वयमाचरते यस्मादाचा
रं स्थापयत्यपि। आचिनोति च शास्त्रार्थान् आचार्यस्तेन उच्यते। वि
ज्ञेयं श्रवणाच्छ्रौतं स्मरणात्स्मार्तमुच्यते। इज्यावेदात्मकं श्रौतं स्मार्तं
वर्णाश्रमात्मकं दृष्टानुभूतमर्थं यः प्रपद्ये चैवात्र विज्ञापयेत्। यथा
भूत प्रवादस्तु सत्यं लिंगैस्त्रपमते। ब्रह्मचर्येण तथा मौनं निराहार
त्वमेव वा। अहिंसा सर्वतः शांतिस्तपः परिधीयते। आत्मवत्सर्व
भूतेषु यो हिते प्राहितेषु च। वर्तते युसकृद्दृष्टिः कृत्स्नासौ दयस्मृता षार
यान्यानि ८ तमाम्नु द्रव्याणि न्यायेनैवागतानि क्रमात्। तोस्तान् गुण

वनेयछन् दातुस्तद्दानलक्षणं। त्रिविधं दानमाख्यातं ज्येष्ठमध्यकनी
यसां का क्रणयाश्च वर्तते सः स क्लिष्टः स मध्यमः। श्रुतिस्मृतिभ्यां विहि
तो धर्मो वर्णाश्रमात्मका त्रिष्ठाचारश्च विरुद्धाश्च साधुस्ते साधुसत्तमा
माया कर्मफलत्यागी त्रिवात्मा परिकीर्तितः। निवृत्तः सर्वसंगेभ्यो यु
क्तो योगी प्रकीर्तितः। असक्तो नयतो यस्तु विषयेषु विचारतः। अलुब्धः
संयमी प्रोक्तः यार्थितो पि समं ततः। आत्मार्थं च परार्थं च इंद्रियाणि
हयस्य वै। न मिथ्या संप्रवर्तेत शमस्येतत्तु लक्षणं। अप्रद्वेषो ह्यनिष्टेषु ३८
तथेष्टे नाभिनंदनं। प्रीतितापविषादेभ्यो विनिवृत्तिर्विरक्तता। संन्या
सः कर्मणां न्यासः कृतानामकृतैः सह कुशलाकुशलानां तु प्र
हाणं न्यास उच्यते। एवं तु ज्ञानयुक्तस्य श्रद्धायुक्तोऽस्त्वीकरः। धसी

दृतिनसंदेहो निग्रहविविधान् फलान्। ज्ञानमध्ययने हो मंध्या
सुप्रज्ञस्तपश्चतं। दानमध्यापने सर्वे नवमं तेन संशयः। चांद्रा
यण सहस्रैश्च प्राजापत्यशतैस्तथा। मासोपवासैश्चान्यैश्च म
त्तो मुनिवरोत्तमा। अभक्तामानवाश्चास्मिन् लोके गिरिगुहासु
ते। यतंति वात्मनो गार्थ भक्तो नावेन मुच्यते। नस्थानां दर्शनाद्देवा
णां स्वर्गादयो द्विजा। न दुर्लभा न संदेहो भक्तानां किं पुनः स्तथा ब्र
ह्म विष्णु सुरेंद्राणां तथान्येषामपि स्मृतिः। भक्ता एव मुनीनां च
ब जंसो भाग्यमेव चाभवेन च तथार्चके संस्पृश्यामीचपाणिना। दे
वै देवेन मधुरं वारणस्यां पुरा द्विजा। अविमुक्ते सदा सीना रु
द्रेण परमासने। रुद्राणी रुद्र माहदेव लब्धा वाराणशी पुरी॥ देमुक्ताद॥

केन वश्यो महादेव पूज्यो दृश्यस्त्वमीश्वरः ॥ तपसा विद्यया वापि योगि
नेह वदस्व मे ॥ ॥ सूत उवाच ॥ ॥ निशम्य वचनं तस्याः संपूज्य लोक
पार्वती ॥ आह बालेंदु तिलकः पूर्णेंदु वदनो हसन् ॥ स्मृत्वा यमेन या पि
त्वा गिरिराज्ञ किं वितां पुरा ॥ चिरकालस्थितः प्रेक्ष्य गिरौ देव्या स्तपान्
नः ॥ देवी लब्धा पुरा तस्मात्त्वया यत्प्रष्टुमर्हसि ॥ पुरा पितामहेनापि
दृष्टः पुण्य विदांवरे ॥ यथा त्वया ह्यवेदृष्टः प्रसंत्र ह्यात्मकं वर्दे
श्वेनेतु श्वेतवर्णेन दृष्ट्वा कल्पेतु मां शुभे ॥ सद्योजातं तथा रक्ते रक्तें ३५
वामं पितामहः ॥ पीतेन तत्पुरुषं पीतं घोरं कृष्णं ईश्वरं ॥ ईशानं विश्व
रूपाख्ये विश्वरूपेण दाहमा ॥ ॥ देव्युवाच ॥ ॥ वामं तत्पुरुषं घोरं
सद्योजातं महेश्वरः ॥ केन वश्यो महादेव मध्यक्तं रूपेण विभो ॥ दृश्यः

वै

पूज्यः स्तथा देव्या वक्तुमर्हसि शंकरः ॥ ॥ श्री भगवानुवाच ॥
श्रद्धो वेश्रद्धयैवेति वित्तद्यो वा रिसंभवः ॥ पूज्यो लिंगे त्वया दृष्ट
विष्णुनोपयसां निधौ ॥ पूज्य पेचाश्रुरूपेण पावित्रे पंचभिर्द्विजैः ॥
नवनस्तस्य द्युरूष्टो हं त्वयोऽजनंगकुरो ॥ सोपि मामाह नास्पर्षत
तत्तत्समेमर्यादा ॥ एवं भावेन देवेन दृष्टवान्मां हरीश्वरः ॥ तस्मात्
श्रद्धया वश्यो दृश्य पूज्यो गिरि सुते ॥ पूज्यो लिंगेन संदेहः सर्व
दा श्रद्धया द्विजैः ॥ आद्यधर्मपरः स्थूलः श्रद्धाज्ञानं कृतं तपः ॥ श्रद्धा
स्वर्गश्च मोक्षश्च दृश्योहं श्रद्धया सदा ॥ इति श्री महापुराणे
लिंगे आचार्य सत्यादि निर्णये दशमोध्यायः ॥ ॥ ऋषय ऊचु
कथं वेद दृष्टवान्ब्रह्मा सद्योजातं महेश्वरं ॥ देवदेवं महात्मानं पु

रूपं पुरुषोत्तमं। अघोरं च तथेशानं यथावद्वक्तुमर्हसि॥ ।सूत उ०
एकोनत्रिंशकः कल्पो विज्ञेयः श्वेतलोहितः। यस्मिंस्तत्परमं ध्यानं
ध्यायतो ब्रह्मणस्तदा। उत्पन्नस्तु शिखायुक्तः कुमारः श्वेतलोहितः
तं दृष्ट्वा पुरुषं श्रीमान् ब्रह्मा वै विश्वतोमुखः। हृदि कृत्वा महात्मानं
ब्रह्मरूपिणमीश्वरं। ध्यानयोगात्परं ज्ञात्वा ववंदे देवमीश्वरं। सद्यो
जातं ततो ब्रह्मा ब्रह्म वै समचिंतयत्। ततोऽस्य पार्श्वतः श्वेताः प्रादुर्भू
ता महात्मनः। सुनंदो नंदनश्चैव विश्वानंदोपनंदनः। शिष्यास्ते वै म
हात्मानो यैस्तद्ब्रह्म सदावृतं। तस्याग्रे श्वेतवर्णाभः श्वेतो नाम महामु ३६
निः। विजज्ञेऽथ महातेजाः तस्माज्जज्ञे हरस्त्वसौ। तत्र ते मुनयः सर्वे स
द्योजातं महेश्वरं। प्रपन्नाः परया भक्त्या गृणंतो ब्रह्म शाश्वतं। तस्मा

LIBRARY OF THE BOMBAY BRANCH OF THE ROYAL ASIATIC SOCIETY

द्विश्वेश्वरं देवं ये प्रपद्यंति वै द्विजाः। प्राणायामपरा भूत्वा ब्रह्मतत्प
रमानसाः। ते सर्वपापनिर्मुक्ता विमला ब्रह्मवर्चसः। विष्णुलोकमति
क्रम्य रुद्रलोकं व्रजंति ते॥ ॥इति महापुराणे श्रीलिंगे सद्योजातो
त्पत्तौ एकादशोऽध्यायः॥ ॥सूत उ०॥ ततस्त्रिंशत्तमः कल्पो रक्तो
नाम प्रकीर्तितः। ब्रह्मा यत्र महातेजा रक्तं वर्णमधारयत्। ध्याय
तः पुत्रकामस्य ब्रह्मणः परमेष्ठिनः। प्रादुर्भूतो महातेजाः कुमारो
रक्तभूषणः। रक्तमाल्यांबरधरो रक्तनेत्रः प्रतापवान्। यं तं दृष्ट्वा महा
त्मानं कुमारं रक्तवाससं। परं ध्यानं समाश्रित्य बुबुधे देवमीश्वरं। स तं
प्रणम्य भगवान् ब्रह्मा परमयंत्रितः। वामदेवं ततो ब्रह्मा ब्रह्म वै समचिं
तयत्। तथा स्तुतो महादेवो ब्रह्मणा परमेश्वरः। सुप्रीतहृदयः शर्वः॥

मां हि पिता महं ध्यायता पुत्रकामेन यस्मात्तेहं पितामह दृष्टः परमे
योगयुक्तास्तु तस्य ब्रह्मपूर्वकः। तस्माद्ध्यानबलं प्राप्य कल्पे कल्पे प्र
यत्नतः। वेत्स्यसे मां प्रसंख्याने लोकधातारमीश्वरं। तस्य तस्य म
हात्मानश्चत्वारस्तु कुमारका। संबभूवुर्महात्मानो विशुद्धा रक्तव
र्चसः। विरजश्च विबाहुश्च विशोको विश्वभावनः। ब्रह्मण्या ब्रह्मणः
स्तस्यावीराश्चाध्यवसाइनः। गुणं तश्च महात्मानो ब्रह्म तद्वामदेवकं
अनुग्रहार्थं लोकानां शिष्याणां हितकाम्यया। धर्मोपदेशमखिलं
कृत्वा ते ब्रह्मणः प्रिया। पुनरेव महादेवं प्रविष्टा रुद्रमव्ययं। ये पि ३७
चान्ये द्विजः श्रेष्टा युंजाना वाममीश्वरं। प्रपश्यंति महादेवं तद्भक्ता
स्तत्परायणा। ति सर्वपापनिर्मुक्ताः विमला ब्रह्मचारिण

रुद्रसायुज्यमायांति पुनरावृत्तिदुर्लभं।। ।।इति श्री लिंगे वामदेवो
त्पत्तौ द्वादशोध्यायः।। ।।सूत ३०।। ।।एकत्रिंशत्तमः कल्पः पीतवा
सा इति स्मृतः। ब्रह्मा यत्र महाभागः पीतवासा बभूव ह। ध्यायतः पुत्र
कामस्य ब्रह्मणः परमेष्ठिनः। प्रादुर्भूतो महातेजा कुमारः पीतवस्त्र
धृक्। पीतगंधानुलिप्तांगः पीतमाल्यधरो युवा। हेमयज्ञोपवीतश्च
पीतोष्णीषो महाभुजः। तं दृष्ट्वा ध्यानसंयुक्तो ब्रह्मलोकमहेश्वरं। म
नसा लोकधातारं प्रपेदे शरणं विभुं। ततो ध्यानगतस्तत्र ब्रह्मा माहेश्व
रीं वरां। विश्वरूपां ददर्शाथ महेश्वरमुखोद्गतां। चतुष्पादां चतुर्वक्त्रां
चतुःशीर्षां चतुस्तनीं। चतुर्नेत्रां चतुःशृंगीं चतुर्दंष्ट्रां चतुर्मुखीं। द्वात्रिंशल्लोक
संयुक्तामीश्वरीं सर्वतोमुखीं। स तां दृष्ट्वा महातेजा महादेवीं महेश्वरीं।

पुनराह महादेवः सर्वदेवनमस्कृतः। मतिः स्मृतिर्बुद्धिरिति गायमा
नः पुनः पुनः। एह्येहीति महादेवी सा तिष्ठत् प्रांजलिर्विभुं। विश्वमा
संवादे अष्टत्रिंशोध्यायः॥ ॥शिलाद उ०॥ भगवन् शक्र सर्वज्ञ सर्वदेवनमस्कृ
त॥ शचीपते जगन्नाथ सहस्राक्ष महेश्वर॥ युगधर्मं कथं चक्रे भगवान् पद्म
संभवः॥ वक्तुमर्हसि तं धर्मं संप्रवर्तं प्रणतायमे॥ ॥सूत उ०॥ ॥तस्य त
द्वचनं श्रुत्वा शिलादस्य महात्मनः॥ व्याजहार यथा दृष्टं युगधर्मं सविस्त
रं॥ आद्यं कृतयुगं विद्धि ततस्त्रेतायुगं मुने॥ द्वापरं तिष्यमित्येते चत्वारस्तं
समासतः॥ सत्वं कृतं रजस्त्रेता द्वापरस्तु रजस्तमः॥ कलिस्तमस्तु विज्ञेयं
युगवृत्तिर्युगे शततं परं कृतयुगे त्रेतायां ज्ञानमुच्यते॥ प्रवृत्तं द्वापरं ज्ञेयं ११२
दानमेकं कलौ युगे॥ चत्वारि तु सहस्राणि मानुषाणि शिलासनः॥ आयुः
कृतयुगे विद्धि प्रजानामिह सत्तम॥ ततः कृते गते तस्मिन् संध्यांशे च गते

तु वै॥ पादावशिष्टो भवति युगधर्मस्तु सर्वशः॥ चतुर्थभागहीनं तु त्रे
तायुगमनुत्तमं॥ कृतार्द्धं द्वापरं विद्धि तदर्द्धं तिष्यमुच्यते॥ त्रिशती द्विश
ती संध्या तथा चैकशती मुने॥ संध्यांशकस्तथा त्वेवं कल्पेष्वेव युगे युगे॥
आद्ये कृतयुगे धर्मश्चतुष्पादः सनातनः॥ त्रेतायुगे त्रिपादस्तु द्विपा
दो द्वापरे स्थितः॥ त्रिपादहीनस्तिष्ये तु नाममात्रेण धिष्ठितः॥ कृते तु मि
थुनोत्पत्तिः साक्षाद्रसोल्लसात्तथा प्रजास्तृप्ताः सदा सर्वाः सदानं
दश्च भोगिनः॥ अधमोत्तमौ न तास्वास्ति निर्विशेषाः प्रजाः शु
भमायुः सुखं तुल्यं तासां तस्मिन् कृते युगे॥ न तासां प्रजिने द्वंद्वे न क्लेश
नानिवक्रमः॥ पर्वतोदधिवासिन्यो ह्यनिकेताश्रयास्तु ताः॥ विशोकाः
सत्वबहुला एकांतबहुलास्तथा॥ ज्ञाने निष्कामकारिण्यो नित्यं मुदितमानसाः

आद्ये त्रेते कृतयुगे कर्मणो ऽन्यस्याप्ययो। वर्णाश्रमव्यवस्था च न तदासी
न्न संकरः॥ रसोल्लासा कालयोगात्त्रेतायामेव नश्यते द्विजाः। तस्यां सिद्धौ प्र
नष्टायामन्या सिद्धिरवर्त्तत। अपां सूक्ष्मे प्रतिगते तदा मेघात्मना तु वैः। मे
घेभ्यः स्तनयित्नुभ्यः प्रवृत्तं वृष्टिसर्जनं। सकृदेव तया वृष्ट्या संयुक्ते पृ
थिवीतले। प्रादुरासंस्तदा तासां वृक्षास्तु गृहसंज्ञिताः॥ सर्वप्रत्युपभो
गस्तु तासां तेभ्यः प्रजायते। वर्त्तयंति स्म तेभ्यस्ता त्रेतायुगमुखे प्रजा
ः। ततः कालेन महता तासामेव विपर्ययात्। रागलोभात्मको भावस्तदा ११३
ह्याकस्मिकोऽभवत्। विपर्ययेण तासां तु तेन तत्कालभाविना। प्रणश्यं
ति ततः सर्वे वृक्षास्ते गृहसंज्ञिताः। ततस्तेषु प्रनष्टेषु विभ्रांता मिथुनोद्भ
वाः। अभिध्यायंति तां सिद्धिं सत्याभिध्यायिनस्तदा प्रादुर्बभूवुस्तासां तु

वृक्षास्ते गृहसंज्ञिताः। वस्त्राणि ते प्रसूयंते फलान्याभरणानि च।
तेष्वेव जायते तासां गंधवर्णरसान्वितं। अमाक्षिकं महावीर्यं पु
टके पुटके मधु। तेन ता वर्त्तयंति स्म मुखे त्रेतायुगस्य तु। हृष्टपुष्टास्त
या सिद्ध्या प्रजा वै विगतज्वराः। ततः कालांतरेणैव पुनर्लोभावृतास्तु
ताः। वृक्षांस्तान् पर्यगृह्णंत मधु वामाक्षिकं बलात्। तासां तेनापचारेण
पुनर्लोभकृतेन वै। प्रनष्टा मधुना सार्धं कल्पवृक्षाः क्वचित्क्व
चित्। तस्यामेवाल्पशिष्टायां सिद्ध्यां कालवशात्तदा। वर्त्तमाने तदा तासां
द्वंद्वान्यभ्युत्थितानि वै। शीतवर्षातपैस्तीव्रैस्ततस्ता दुःखिता भृशं। द्वं
द्वैस्ताः पीड्यमानास्तु चक्रुरावरणानि च। कृत्वा द्वंद्वप्रतीघातं निके
तानि हि भेजिरे। ततः पूर्वं निकामचारास्ते ह्यनिकेता अथावसन्। यथायो

यथाप्रीति निकेतेष्ववसन् पुनः । कृत्वा द्वंद्वोपघातांस्तान् वार्तोपाय
मचिंतयन् । नष्टेषु मधुना सार्धं कल्पवृक्षेषु वै तदा । विषादव्याकु
लास्ता वै प्रजास्तृष्णाक्षुधार्दिताः । ततः प्रादुर्बभौ तासां सिद्धिस्त्रेतायुगे पुनः
वार्त्तार्थसाधिकाप्यन्या वृष्टिस्तासां निकामतः । तासां वृष्ट्युदकानीह या
नि निम्नगतानि तु । अभवन् वृष्टिसंतत्या स्रोतस्थानानि निम्नगाः ॥ ए
वं नद्यः प्रवृत्तास्तु द्वितीये वृष्टिसर्जने । ये पुनस्तदपां स्तोका आपन्ना ११४
पृथिवीतले । अपां भूमेश्च संयोगादोषध्यस्तास्तदाभवन् ॥ अकाल
कृष्टाश्चानुप्ताः ग्राम्यारण्याश्चतुर्दश । ऋतुपुष्पफलाश्चैव वृक्ष
गुल्माश्च जज्ञिरे । प्रादुर्भूतानि चैतानि वृक्षजात्यौषधानि च । तेनौषधे
न वर्तन्ते प्रजास्त्रेतायुगे तदा । ततः पुनरभूत्तासां रागो लोभश्च सर्वशः

अवश्यंभाविनार्थेन त्रेतायुगवशेन च । ततस्ताः पर्यगृह्णन्त नदीक्षेत्रा
णि पर्वतान् । वृक्षगुल्मौषधीश्चैव प्रसह्य तु यथाबलं । विपर्ययेण चौ
षध्यः प्रनष्टास्ताश्चतुर्दश । मत्वा धरां प्रविष्टास्ता इत्योषधीः पितां
महः । दुदोह गां प्रयत्नेन सर्वभूतहिताय वै । तदाप्रभृति चौषध्यः फा
लकृष्टास्त्वितः स्मृताः । वार्त्ताहित्तिसमाख्याताश्चानु कामप्रयत्नतः ।
अन्यथा जीवितं तासां नास्ति त्रेतायुगात्यये । रसास्तायोऽद्रवाश्चैव भव
ति बहुग्रास्तदा । तत्रापि जगृहुः सर्वे अन्योन्यं क्रोधमूर्छिताः । पश्व
रधनाद्यास्तत्र बलाच्च गावयेन । मर्यादायाः प्रतिष्ठार्थं ज्ञात्वा तदा कि
लैविशु । ससर्ज क्षत्रियांस्तांस्तु कृत्वा कर्मजसंभवाः । वर्णाश्रमप्रति
ष्ठां च स्वकारस्वेन कर्मणा । इत्येन वृत्तिनाशेन विश्वात्मा निर्ममे स्वयं ।

पञ्च यज्ञास्तथैव स्तेषां केचित्तत्रापि सुव्रताः। अल्पान् विप्रास्तदा यज्ञ .. क्रोधः सर्वदा क्रमात् ॥१॥
यज्ञः स्ववर्त्तनं चैव त्रेतायामत्र वत्र क्रमात्। द्विजास्तदा प्रशंसन्ति नवं स्वा
हि सकामुने। द्वापरे प्रवर्त्तन्ते मतिभेदास्तदा नृणां। मनसा कर्मणा वा
चा कृच्छ्राद्वार्त्ता प्रसिध्यति। तदा तु सर्वभूतानां कायक्लेशपरास्कृतां।
लोभो धृतिर्वणिक्युद्धं तत्त्वानामविनिश्चयः। वेदशास्त्रप्रणयनं
धर्माणां संकरस्तथा। वर्णाश्रमपरिध्वंसः कामद्वेषौ तथैव च। द्वापरे
तु प्रवर्त्तन्ते रागो लोभो वधस्तथा। एको वेदश्चतुःशाखो द्विस्त्रेतासु
विधीयते। संक्षयादायुषश्चैव व्यस्यते द्वापरेषु च। ऋषिपुत्रैः पुनर्भेदा ११५
भिद्यन्ते दृष्टिविभ्रमात्। मंत्रब्राह्मणविन्यासैः स्वरवर्णविपर्ययैः। संहि
ताऋग्यजुःसाम्नां संहन्यन्ते श्रुतर्षिभिः। सामान्या वै कृताश्चैव दृष्टिभेदात्
क्वचित्क्वचित्। ब्रह्मकल्पसूत्राणि मंत्रप्रवचनानि तु। अन्ये त्वे प्र
न

स्थितान्येके — श्चिन्ताप्यवस्थिताः॥ ॥इतिहासपुराणानि भिद्यन्ते का
लगौरवात्। ब्राह्मं पाद्मं वैष्णवं च शैवं भागवतं तथा। भविष्यं नारदी
यं च मार्कण्डेयमतः परं। आग्नेयं ब्रह्मवैवर्त्तं लैंगं वाराहमेव च। वामना
ख्यं ततः कौर्म्यं मात्स्यं गारुडमेव च। स्कान्दं तथा च ब्रह्माण्डं तेषां भेदः प्र
कथ्यते। लैंगमेकादशविधं प्रभिन्नं द्वापरेष्विह। मन्वत्रिविष्णुहारीत
याज्ञवल्क्यौशनोऽङ्गिरोयमापस्तम्बसंवर्त्ताः कात्यायनबृहस्पती। प
राशरव्यासशंखलिखिता दक्षगौतमौ। शातातपो वसिष्ठश्च एवमाद्यैः
सहस्रशः। अवृष्टिर्मरणं चैव तथैव व्याध्युपद्रवाः। वाङ्मनःकर्मजैर्दुः
खैर्निर्वेदो जायते ततः। निर्वेदाज्जायते दुःखं दुःखान्मोक्षविचारणाः।
विचारणात्तु वैराग्यं वैराग्याद्दोषदर्शनं। दोषाणां दर्शनाच्चैव द्वापरे ज्ञा

नसंभवः। एषा रजस्तमोयुक्ता वृत्तिर्वै द्वापरे स्मृता। आद्ये कृते न धर्मो
ऽस्ति स त्रेतायां प्रवर्त्तते। द्वापरे व्याकुलीभूत्वा प्रणश्यति कलौ युगे।
॥ ॥इति श्रीमहापुराणे श्रीलैंगे त्रिलादेवसंवादे चतुर्युगधर्मविचा
रे एकोनचत्वारिंशोऽध्यायः॥ ॥३९॥ ॥तिष्ये मायामसूयां च वधं
चैव तपस्विनां। साधयंति नरास्तत्र तमसा व्याकुलेंद्रियाः। कलौ प्रमा
रको रोगः सततं क्षुद्भयानि च। अनावृष्टिभयं घोरं देशानां च विपर्ययः
न प्रमाणं स्थितेरस्ति नृणां चाधर्मसेवना। अधार्मिकास्त्वनाचारा ११६
महाकोपाः स्वचेतसः। अनृतं वदंति लुब्धाश्च तिष्ये जाताश्च दुःप्रजा
दुरिष्टैर्दुरधीतैश्च दुराचारैर्दुरागमैः। विप्राणां कर्मदोषैश्च प्रजानां
जायते भयं। नाधीयंते तदा वेदान्न यजंते द्विजातयः। उत्सीदंति नराश्चैव

क्षत्रियाश्च विशः क्रमात्। शूद्राणां मंत्रयोगेन तु संबंधो ब्राह्मणैः सह।
भविष्यति कलौ तस्मिन् शयनासनभोजनैः। राजानः शूद्रभूयिष्ठा ब्राह्म
णान्बाधयंति ते। भ्रूणहत्या वीरहत्या प्रजायंते प्रजासु वै। शूद्राश्च
ब्राह्मणाचाराः शूद्राचाराश्च ब्राह्मणाः। राजवृत्तिस्थिताश्चौराश्चौरा
चाराश्च पार्थिवाः। एकपत्न्यो न शिष्यंति वर्धयंत्यभिसारिकाः। वर्णा
श्रमप्रतिष्ठानो जायते नृपु सर्वतः। तदा स्वल्पफला भूमिः क्वचिच्चा
पि महा कलौ। अरक्षितारो हर्त्तारः पार्थिवाश्च शिलासनाः। अक्ष
त्रियास्तु राजानो विप्राः शूद्रोपजीविनः। शूद्रा वै ज्ञानिनः सर्वे ब्रा
ह्मणैरपि संमताः। आसनस्था द्विजान्दृष्ट्वा न चलंत्यल्पबुद्धयः
ताडयंति द्विजेंद्रांश्च शूद्रा वै स्वल्पबुद्धयः। आस्ये निधाय वै हस्तं

कर्णे शूद्रस्य वै द्विजाः। निश्चलं तस्य तद्वाक्यं वदंति विनयेस्थिताः। उ
च्चासनस्था शूद्रास्तु द्विजमध्ये द्विजर्षभः। ज्ञात्वा न हिंसते राजा क
लौ कालबलेन तु। पुष्पैश्च वासितैश्चैव तथान्यैर्मंगलैर्द्विजाः। शूद्रा
नभ्यर्चयिष्यंत्यल्पश्रुतभाग्यबलान्विताः। न प्रेक्षंते र्चितांश्चापी शूद्रा
द्विजवरान् द्विजाः। सेवावसरमालोक्य द्वारि तिष्ठंति च द्विजाः। वाह
नस्थान् समावृत्य शूद्रान् शूद्रोपजीविनः। सेवंते ब्राह्मणास्तत्र स्त
वंति स्तुतिभिः कलौ। तपोयज्ञफलानां च विक्रेतारो द्विजोत्तमाः। यत ११७
यश्च भविष्यंति बहवोस्मिन् कलौ युगे। पुरुषाल्पं बहुस्त्रीकं भविष्य
ति कलौ युगे। निंदंति वेदविद्यानि द्विजाकर्माणि वै कलौ। कलौ रुद्रो म
हादेवः शंकरो नीललोहितः। प्रकाशते प्रतिष्ठार्थं धर्मस्य विकृताकृति

ये ते विप्रा निषेवंते येन केनापि शंकरं। कलिदोषान् विनिर्जित्य प्रयां
प्रयांति परमं पदं। श्वापदप्रबलत्वं च गवां चैव परिक्षयं। साधूनां वि
निवृत्तिं च विद्यात्तस्मिन् युगक्षये। तदा सूक्ष्मो महोदर्को दुर्लभो दा
नमूलवान्। नचस [illegible] प्रस्थानि भविष्यंत्यधमो युगे। कुशीलच
र्यापाखंडैर्वृथारूपैः समावृतं। बहुयाचनकैर्लोके भविष्यत्यव
युगांतस्याहतो क्रूरवाक्यो नार्जवो नानसूयकः। न कृते प्रतिकर्त्ता
च युगे तस्मिन् भविष्यति। नेदकश्चैव पतितेन तत्क्षणात्तस्य लक्षणं।
तथा भूम्या वसुमती न च धान्यधनाहृता। मंडलानि भविष्यंति देशे
षु नगरेषु चाश्रमोदकाश्चाल्पफला। भविष्यधरेश्वरा। गोप्तारश्चाप्य
गोप्तारः प्रभविष्यंत्यशासनात्। हर्त्तारः पररत्नानां परदारप्रमर्दकाः

कामान्मानो दुरात्मानो ह्यधमाः साहसप्रियाः। प्रनष्टवेसनोंमुसोमु
क्ताः केशाश्च शूलिनः। जनाः षोडशवर्षाश्च प्रजायंते युगे क्षये। शुक्ल
दंता द्विजाख्याश्च मुंडाः काशायवाससः। शूद्रा धर्मं चरिष्यंति युगांते
समुपस्थिते। सस्यचौरा भविष्यंति तथा चैलाभिमर्शिनः। चौराश्चौ
रस्य हर्तारो हर्तुर्हर्त्ता तथापरः। ज्ञानकर्मण्युपरते लोके निष्क्रीयतां ग
ते। कीटमूषकसर्पाश्च धर्षयिष्यंति मानवान्। सुभिक्षं क्षेममारोग्यं सा
मर्थ्यं दुर्लभं तदा। कुशिकउल्लूकतहत्रिजवतेगुह्यादिवासे। कौशिकीं प्र ११८
तिपत्स्यंति देशान्क्षुद्भयपीडिताः। दुःखेनाभिप्लुतानां च परमायुः शतं तदा
दृश्यते न च दृश्यंते वेदाः कलियुगेऽखिलाः। उत्सीदंते तदा यज्ञाः केवला
खलपीडिताः। काशायिनोऽथ निर्ग्रंथाः मुंडाः कापालिकाः सदा। वेदविक्र

यिणश्चान्ये तीर्थविक्रयिणः परे। वर्णाश्रमाश्च ये चान्ये पाखंडाः परिपं
थिनः। उत्पद्यंते तदा ते वै संप्राप्ते तु कलौ युगे। अधीयंते तदा वेदान्
शूद्रा धर्मार्थकोविदाः। यजंते चाश्वमेधेन राजानः शूद्रयोनयः। स्त्री
स्त्रीबालगोवधं कृत्वा हत्वा चैव परस्परं। उपद्रवांस्तदान्योन्यं साधयं
ति तदा प्रजाः। दुःखप्रबलनाल्पायुर्देहोच्छेदातिरोगता। अधर्माभि
निवेशित्वात्तमोवृत्ते कलौ स्मृते। प्रजासु ब्रह्महत्याश्च तदा स्म प्रव
र्तते। तस्मादायुर्बलं रूपं कलिं प्राप्य च हीयते। तदा ह्यल्पेन कालेन सि
द्धिं गच्छंति मानवाः। धन्या धर्मं चरिष्यंति युगांते द्विजसत्तमाः। श्रुति
स्मृत्युदितं धर्मं ये च रत्यनुसूयकाः। त्रेतायां वार्षिको धर्मो द्वापरे
मासिकः स्मृतः। यथाशक्ति चरन्प्राज्ञस्तदह्ना प्राप्नुते कलौ। एषा कलि

युगावस्था संध्यांशं तु निबोध मे। युगे युगे तु हीयंते त्रींस्त्रीन्पादांस्तु सि
द्धये। युगस्वभावात्संध्यांशास्तिष्ठंतीह तु पादशः। संध्यास्वभावात्स्वांशेषु
पादशस्ते प्रतिष्ठिताः एवं संध्यांशके काले संप्राप्ते तु युगांतिके। तेषां शा
स्ता ह्यसाधूनां भृगूणां निधनोत्थितः। गोत्रेस्मिन्वै चंद्रमसो नाम्ना प्र
मतिरुच्यते। मानवस्य तु सोंशेन पूर्वं स्वायंभुवेंतरे। समाः स त्रिंशतिः
पूर्णाः पर्यटन्वै वसुंधरां। अनुकर्षन्स वै सेनां सवाजिरथकुंजरां। प्रगृही
तायुधैः विप्रैः शतशोथ सहस्रशः। स तदा तैः परिवृतो म्लेच्छान्हंति सह
स्रशः। स हत्वा सर्वशश्चैव राज्ञस्ताञ्छूद्रयोनिजान्। पाखंडांश्च
ततः सर्वान्निःशेषं कृतवान्प्रभुः। नात्यर्थं धार्मिका ये च सर्वान्हंती च सर्व
शः। वर्णव्यत्यासजातांश्च ये च तानुपजीविनः। प्रवृत्तचक्रो बलवान्म्लेच्छाना

तुच्छायाधार्मिकान्म्लेच्छान्स शतशोथ सहस्रशः। तत्र संध्यांशके काले संप्राप्ते तु युगांतिके।

मंतकृच्छदा। अदृश्यः सर्वभूतानां विचचार वसुंधरां। मानवस्य तु सों
शेन देवस्येह विजज्ञिरे। पूर्वजन्मनि विष्णोस्तु प्रमतिर्नाम वीर्यवान्। गो
त्रतो वै चंद्रमसः पूर्णे कलियुगे प्रभुः। द्वात्रिंशे तु दिने वर्षे प्रक्रांते
विंशतिः समाः। विनिघ्नन्दुष्टसत्वानि मानवानीच सर्वशः। कृत्वा बी
जावशेषां तु पृथ्वीं क्रूरेण कर्मणा। परस्परनिमित्तेन कोपेनाकस्मिके
न तु। स साधयित्वा वृषलान्प्रायशस्तानधार्मिकान्। गंगायमुनयोर्म
ध्ये निष्ठां प्राप्तः सहानुगः। ततो व्यतीते काले तु सामात्ये सह सैनिके।
स्थिताः स्वस्यावशिष्टास्तु प्रजास्ता हि भूभृतः २। अप्रग्रहास्ततस्ता वै लो
भाविष्टास्तु कृत्स्नशः। उपहिंसंति चान्योन्यं प्रतिपद्य परस्परं। अराज
के युगवशात्संशये समुपस्थिते। प्रजास्ता वै ततः सर्वा परस्परभयार्दिताः।

आकुलाश्चपरित्रस्तानास्यक्तादारगृहाणिच।स्वान्प्राणान्नृत्वचवीक्ष्य
न्तोनिःकारुण्यास्तुदुःखिताः।नष्टेश्रुतेस्मृतेधर्मेपरस्परहताःस्तदा॥
निर्मर्यादानिराक्रान्तानिःस्नेहानिरपत्रपा।नष्टेधर्मेप्रतिहताह्रस्वका
ःपंचविंशकाः॥हित्वापुत्रांश्चदारांश्चविषादव्याकुलेन्द्रियाः।अनावृ
ष्टिहताश्चैववार्तामुत्सृज्यदुःखिताः।प्रत्यर्थमेनिवर्तन्तेहित्वाजनपदा
न्स्वकान्।सरित्सागरकूपांश्चसेवन्तेपर्वतांस्तथा।मधुमांसैस्तथामूलफ
लैर्वर्त्तयंतःसुदुःखिताः।चीरपत्राजिनधरानिष्क्रियानिपरिग्रहाः।वर्णा १२०
श्रमपरिभ्रष्टाःसंकटंघोरमाश्रिताः।एतांकाष्ठामनुप्राप्ताअल्पशेषाःप्र
जास्तथा।जनामाधिरुद्धाविष्टादुःखान्निर्वेदमागमन्।विचारणेतु
निर्वेदात्साम्यावस्थाविचारणान्।साम्यावस्थात्मकोबोधःसंबोधा.

५
धर्मशीलता।अरूपशमयुक्तास्तुकलिशिष्टास्तुवैस्वयं।अहोरात्रा
त्तदातासांयुगंतुपरिवर्तते।~~सप्तसप्तर्षिभिश्चैवंतत्रतेचव्यवस्थिता~~
चित्तसंमोहनंकृत्वातासांवैसप्तसप्तर्षयः।नाचितोर्थस्यचवक्तात्त
तःकृतमवर्त्तत।प्रवृत्तेतुततस्तस्मिन्पुनःकृतयुगेतुवै।उत्पन्नाःकलि
शिष्टास्तुप्रजाःकार्तयुगास्तदा।तिष्ठंतिचेहयेसिद्धाअदृष्टाविचरंति ५
ते।सप्तसप्तर्षिभिश्चैवंतत्रतेचव्यवस्थिताः।ब्रह्मक्षत्रविशःशूद्राबी
जार्थयेस्मृताइह।कलिजैःसहतेसर्वेनिर्विशेषास्तदाभवन्।तेषां
सप्तर्षयोधर्मंकथयंतीतरेपिच।वर्णाश्रमाचारयुक्तंश्रौतंस्मार्त्तं
द्विधातुसम्भवतत्तेषुक्रियावत्सुवर्त्तनेवैप्रजाकृतो।श्रौतस्मार्त्तकृता
नांचधर्मसप्तर्षिदर्शितो।केचिद्धर्मव्यवस्थार्थंतिष्ठंतीहयुगक्षया

मन्वंतराधिकारे प्रतिष्ठंति मुनयस्तथैवार्थं यथा दीर्घप्रायेषु युगेष्विह
तनवः स्थिता । वनानां प्रथमं वृक्षास्तेषां मूलेषु संभवः । तथा कृतयुगा
नां तु कालेऽस्मिन्निह संभवः । एवं युगांतकाले त्विह संक्रांतानां तु परस्परं ।
वर्त्तते युगव्यवच्छेदाद्यावन्मन्वंतरक्षयः । सुखमायुर्बलं रूपं धर्मार्थ
कामम् एव च । युगेषु तानि हीयंते त्रीण्यादानक्रमेण तु । सुसंध्यांशे
न हीयंते योगानां धर्मसिद्धयः । इत्येष प्रतिसंधिर्वै कीर्त्तितस्तु मया
तव । चतुर्युगानां सर्वेषां एतेनैव प्रसाधनं । एषा चतुर्युगावृत्तिरा सह १२१
स्राद्गुणीकृता । ब्राह्मणस्तदहः प्रोक्तं रात्रिश्चैतावती स्मृता । अत्रार्ज
वं जडीभावो भूतानामायुगक्षयात् । एतदेव तु सर्वेषां युगानां लक्षणं
स्मृतं । एषां चतुर्युगानां च गुणिता ह्येकसप्ततिः । क्रमेण परिवर्त्तन्ते तु म

नोरंतरसुभते । चतुर्युगे यथैकस्मिन् भवतीह यथा तु यत् । तथा चान्ये
षु भवति पुनस्तद्वै यथाक्रमं । सर्गे सर्गे तथा भेदा उत्पद्यंते तथैव तु
पंचाविंशत्परिमिता न न्यूना नाधिकास्तथा । तथा कल्पयुगैः सार्द्धं भ
वंति सह लक्षणैः । मन्वंतराणां सर्वेषां एतदेव तु लक्षणं । यथा युगानां
परिवर्त्तनानि चिरप्रवृत्तानि युगस्वभावात् । तथा संतिष्ठति जीवलो
कः । क्षयोदयाभ्यां परिवर्त्तमानः । इत्येतल्लक्षणं प्रोक्तं युगानां तैः सम
तः । अतीतानागतानां हि सर्वमन्वंतरेष्विह । क्रषयो मुनयश्चैव सर्वे तु
स्य प्रयोजनं । एवं वर्णाश्रमाणां तु प्रविभागो युगे युगे । युगस्वरूपं नाव
स्थं विदधे मनवः प्रभुः । वर्णाश्रमविभागेश्च युगानि युगसिद्धये । युगा
नां परिमाणं ते कथितं हि प्रसंगतः । वदामि देवपुत्रत्वं पद्मयोनेः समासतः ।

इति महापुराणे श्रीलैंगे शक्रशिलादसंवादे युगधर्मव्यवस्थायां
चत्वारिंशोऽध्यायः॥ ॥शक्र ४०॥ ॥पुनः ससर्ज भगवान् प्रध्वस्ते पूर्व
वत्सर्गे॥ सहस्रयुगपर्यंते प्रभाते तु पितामहः॥ एवं परार्धे विप्रेन्द्र
द्विगुणे तु यदा गते॥ तदा धरा निमज्जाप्स्वापस्त्वग्नौ वह्निः समीरणे॥
वह्निः समीरणश्चैव व्योम्नि नभोऽत्र संपुनः॥ इंद्रियाणि दशैकं च तन्
मात्राणि द्विजोत्तमा॥ अहंकारमनुप्राप्य प्रलीनानि क्षणाद् द्विजो॥ अ
भिमानस्तदा तत्र महतासाद्य वै क्षणात्॥ अव्यक्ते च गुणैः सार्धं विली १२२
नमभवद् द्विजाः॥ ततः सृष्टिरभूत्तस्मात् पूर्ववत्सुरुपाच्छिवात्॥ अथ सृष्टास्त
दा तस्य मनसा तेन मानसाः॥ न व्यवर्धत लोकेऽस्मिन् प्रजाः कमलयोनि
नः॥ वृद्ध्यर्थं भगवान् ब्रह्मा पुत्रैर्वै मानसैः सह॥ दुःखरविचचारेशंस

अंवभभगल[illegible]वअवभगलवे भु ष[illegible]टोविना[illegible]दे ङ्यछि[illegible] रघनेन
शोभते

मुद्दिश्य तपसा स्वयं। तुष्टश्च तपसा तस्य भवो ज्ञात्वास्य वाञ्छितं। ज
लोद्भवस्य निर्दिष्टब्रह्मणः पुरुषस्य तु। पुत्रस्तेऽहमिति प्रोच्य स्वेच्छ
या सोऽभवत्तदा। तस्य पुत्रो महादेवो ऽर्धनारीश्वरोऽभवत्। तदा हरिर्ज
गछ्वंशो ऽसौ ब्रह्माणं च जगद्गुरुं। अथार्धमात्रकस्याग्निमात्मनः पुरमेव
रि। त्रिनेत्रयोगमंत्रेण ह्यधर्वजातो शिवं। तस्माद्धरिश्च ब्रह्माणं
ससर्ज परमेश्वरः। विश्वेश्वरस्तु विश्वात्मा चास्त्रपाशुपतेन यत्नात् स्मो
ब्रह्मा महदेवश्चापि गजश्च हरिस्तथा। श्रीरजः पयजश्चैव नन्दो गाङ्ग
त एव च। एतत्तेऽभिहितं सर्वमिति हासं पुरातनं। वैराग्यं श्रेष्ठं १२३
वद्ये तत्तद्दोषं समासतः। नीलकण्ठोऽपि भगवान् ... नात्म
नस्तत्त्वं समस्तं सकलं तस्मात्त्वं गो देवचराचरः। ततो ब्रह्माणम्

सृजत् ब्रह्मा रुद्रं पितामहो मुनेः कस्मान्नरेन्द्रो हरिब्रह्माणमीश्वरं
ततो ब्रह्माणमसृजन् मुनेः कस्मान्नरे हरिः। नारायणं पुनर्ब्रह्मा ब्र
ह्माणं च पुनः शिवः। तदा विचार्य वै ब्रह्मा दुःखं संसार इत्यजः। सर्वं विसृ
ज्य तान्यात्मानमात्मन्येव वियोज्य च। संहृत्य प्राणसंचारं पाषाण इव
निश्चलः। दशवर्षसहस्राणि समाधिस्थो ऽभवत्प्रभुः। अधोमुखं च
यत्पद्मं हृदि संस्थं सुशोभनं। पूरितं पूरकेणैव प्रबुद्धं चाभवत्तदा
तदूर्ध्ववक्त्रमभवत्कुम्भकेन निरोधितं। तस्य पद्मस्य कर्णिकामध्य
स्थं पश्यामास चेश्वरं। नमोऽमिति वशी देवमर्धमात्राधरं परं। मृणा
लतन्तुभागैकशतभागैकवस्थितं। अमीयमविशुद्धात्मा नियम्यै
वं दीश्वरं। यमपुष्पादिभिर्योज्य पापोघ्नजपदं परं। तस्य हृत्कम

तस्य स्वपितियोगाच्चाग्नाको विभुः । ललाटमस्य निर्भिद्य प्रादुरासीन्म
हेश्वरः ।। लोहितो भूत्स्वयं नीलश्चैवस्य हृदयोद्भवः । वर्णश्चैव तु सं
योगात्स हि स्यात्पुरुषः प्रभुः । नीलश्च लोहितश्चैव कृत्तः कालाकृतिः
पुमान् । नीललोहित इत्युक्तस्तेन देवेन वै प्रभुः । ब्रह्मणा तु महाबाहो
नः प्रीतात्मा सौवाच भवत्स्वयंभुः सम्प्राप्य मानसं देवं तुष्टाव च पितामहः । ना
माष्टकेन विश्वात्मा विश्वात्मानं महामुने ।। ।।पितामह उ।। ।।नम
स्ते भगवान् रुद्र भास्करामिततेजसे । नमो भवाय देवाय रसायांबु १२४
मयाय ते । शर्वाय क्षितिरूपाय सदा सुरभिणे नमः । ईशाय वायवे
तुभ्यं संस्पर्शाय नमो नमः । पशूनां पतये चैव पावकायातितेजसे ।
भीमाय व्योमरूपाय शब्दमात्राय ते नमः । महादेवाय सोमाय अ

मृताय नमोस्तु ते । उग्राय ते नमो नित्यं यजमानः स्वरूपिणे । यः प
ठेच्छृणुयाद्वापि पैतामहमनुत्तमं । रुद्राय कथितं विप्रान् श्रावये
द्वा समाहितो । अष्टमूर्तेस्तु सायुज्यं वर्षादेकादवाप्नुयात् । एवं स्तुत्वा
महादेवमवैक्षत पितामहः । तदाष्टधा महादेवः समातिष्ठत्स
पितनः । ततः प्रकाशते भानुः कृष्णवर्त्मा निशाकरः । क्षितिर्वायुम
नः शुद्धं आपिरस्तु वर्गात्रवै । तदाप्रभृति तं प्राहुरष्टमूर्तिमितीश्वरं
अष्टमूर्तेप्रसादेन विरंचश्चासृजत्प्रभुः । सृजेन दखिलं ब्रह्मा पुनः
कल्पो यं स्मृतो विभुः । सहस्रयुगपर्यंतं संभूतं सचराचरं । प्रजास्त्रु सम
नाः स्त्रैपितत उग्रं तपो महत् । तस्यैवं तप्यमानस्य न किंचित्समवर्त्तत
ततः दीर्घेण कालेन दुःखात्क्रोधोभ्यजायत । क्रोधाविष्टस्य नेत्राभ्यां

सर्वांतान्नग्रजाद श्रीभूतप्रेतपिशाचकाद

प्राप तत्र श्रुबिंद्रवः। ततस्तेभ्योऽश्रुबिंदुभ्यो भूताप्रेतास्तदाभवन्। ऋ
त्विंद्रवदा देवो ब्रह्मात्मानमजो मुविजे हौप्राणं स्वभगवान् क्रोध
विष्टुष्टऽजापेति। ततः प्राणत्कृत्याद्रुद्रः प्रादुरासीत्सत्तो मुखात्। अर्धना
रीश्वरो भूत्वा बालार्कसदृशद्युतिः। तदैकादशधात्मानं प्रविभ
ज्य समवस्थितः। अर्धेनस्त्वेन सर्वात्मा अर्धेनांबामुमो शिवां। सा चा
सृजत्तदा लक्ष्मी दुर्गां ज्येष्ठां सरस्वतीं। वामां रौद्रीं महामाया वैष्ण
वीं वारिजेक्षणां। कलां विकरणीं चैव कालीं कमलवासिनीं। बल १२५
विकरणी देवी बलप्रमथनी तथा। सर्वभूतस्य दमनी सर्वशाक्तिमनो
न्मनी। तथान्याबव्हसंसृष्टास्तयनीर्यसहस्रशः। रुद्रश्चैव महादेवना
त्रिंस्त्रीभुवनेश्वरः। सर्वात्मनस्तु नस्याग्रे ह्यतिष्ठन्समहेश्वरः। मूर्तस्य त

स्य देवस्य ब्रह्मणः परमेष्ठिनः। धर्णीद्दौ ततः प्राणान् ब्रह्मपुत्रो
महेश्वरः। प्रहृष्टवदनो रुद्रः किंचित्स्रस्तागनासवो। अस्मभापथ
देवेशो ब्रह्माणं परमं वचः। मानैर्देवमहाभाग विरंच जगतो गुरो
मयेह स्थापिताः प्राणा यत्तद्रुतिष्ठंते प्रजो। श्रुत्वा वचस्ततस्त हि४
स्य स्वयंभूतमनोगतिः। पितामहपद्मजात्मा नेत्रैः फुल्लांबुजप्रभो
ब्रह्मा ततः प्राणं समुद्दिश्य महेश्वरं। सतदिद्रुच्चिरं काल
स्निग्धगंभीरया गिरा उवाच भगवान् ब्रह्मा समुत्थाय कृतांजलिः
त्रो त्रो वद महाभाग त्वं नंदयसि मे मनः। को भवान् विश्वमूर्ति वैस्थि
त एकादशात्मकः। तस्य तद्वचनं श्रुत्वा व्याजहार महेश्वरं। सृष्टवा
न् करास्मा ब्रह्माणं सुमुखं मां सुरारिहा। मां विद्धि परमात्मानमेना

मर्त्यमजामिति। एतेवैयाज्ञियारुद्रास्त्वांरक्षतुमिहागता। ततःप्रण
म्यतंब्रह्मादेवदेवमुवाचह। कृतांजलिपुटोभूत्वाहर्षगद्गदया
गिरा। भगवन्देवदेवेशदुःखेनाकुलितोह्यहं। संसारान्मोक्तुमीशा
नःमामिहार्हसिशंकर॥ ततःप्रहस्यभगवान्पितामहमुमापतिः।
सहात्मजैर्जगन्नाथस्तथाचांतर्दधेविभुः॥ ॥इद्रउ०॥ ॥तस्माच्छि
लादलोकेषुदुर्लभोवैत्वयोनिजः। मृत्युहीनपुमान्विद्धिसमृत्युः
पद्मजोपिसः। किंतुदेवेश्वरीरुद्रप्रसीदतियदीश्वरः। नदुर्लभोमृ १२६
त्युहीनस्तवपुत्रोह्ययोनिजः। मयाचविष्णुनाचैवब्रह्मणाचमहात्म
ना। अयोनिजंमृत्युहीनमसमर्थंनिवेदितुं॥ ॥सूतउ०॥ ॥एवंव्या
हृत्यविप्रेंद्रमनुगृह्यचतंघृणी। देवैर्वृतोययौदेवःश्वेतेनेभेनवैप्रभुः

॥ ॥इतिश्रीमहापुराणेश्रीलैंगेशक्रशिलादसंवादेएकचत्वारिं
शोध्यायः॥ ॥सूतउ०॥ ॥गतेवरेऽप्यवरदेसहस्राक्षेशिलाश
नः। आराधयन्महादेवंतपसातोषयन्भवं। अथतस्यैवमनिशं
तत्परस्यद्विजस्यतु। दिव्यंवर्षसहस्रंतुगतंक्षणमिवाद्भुतं। वल्मी
केनावृतांगश्चलक्षितस्त्रिगुणैर्मुनिः। वज्रसूचीमुखैश्चान्यैरक्त
कीभिश्चसर्वशः। निर्मांसरुधिरत्वग्वैनिर्लेपःकुड्यवत्स्थितः।
अस्थिशेषोऽभवत्पश्चात्तममन्यतशंकरः। यदास्पृष्टोमुनिस्तेन
शंकरेणामरारिणा। तदैवमुनिशार्दूलःसोऽस्मरज्जन्मसद्विजः। तपस
स्तस्यतपसाप्रतुतोषचशंकरः। तुष्टस्तमाहसोवाचगणैश्चैवोम
याःसह। तपसानेनकिंकार्यंतवतातमहामते। ददामिपुत्रंसर्वज्ञंसम

शास्त्रार्थपारगं। ततः प्रणम्य देवेशं तुष्टाव शिलाशनो। हर्षगद्गदया
वाचा सोमस्यां कविभूषणं। भगवन् देवदेवेश त्रिपुरार्दन शंकर। ब्र
ह्मो निर्जं मृत्युहीनं पुत्रमिच्छामि सत्तमं॥ ॥नंदी ७०॥ ॥ पूर्वमाराधि
तः प्राह तपसा परमेश्वरः। शिलादं ब्राह्मणं रुद्रः प्रीत्या परमया युतः
पूर्वमाराधितो विप्र ब्रह्मणाहं तपोधनः। तपसा चावतारार्थं मुनिभि
श्च सुरोत्तमैः। तव पुत्रो भविष्यामि नंदी नाम्नात्वयोनिजः। पिता भविष्य
सि मम पितुर्वै जगतां मुने। एवमुक्त्वा मुनिं प्रेक्ष्य प्रणिपत्य स्थितं घृणी
सोमः सोमोपमः प्रीतस्तत्रैवांतरधीयत। लब्धपुत्रपिता रुद्रात्स्त्रीनो
मम महामुने। यज्ञांगणं महत्प्राप्य यज्ञार्थं यज्ञवित्तमं। तदंगणाद
हं शंभोस्तनुजस्तस्य याज्ञया। संजातं पूर्वमेवाहं युगांताग्निसमप्रभः

ववर्षुस्तदा पुष्करावर्तकाद्या जगुः किंनरा खेचराः सिद्धसाध्या
ः। शिलादात्मजत्वं गतोहं मुनींद्राः समंताच्च वृष्टिः सपुष्पं तु मिश्रं।
ते दृष्ट्वा कालसूर्याभं जटामुकुटधारिणं। त्र्यक्षं चतुर्भुजं कालं शूलट
ंकगदाधरं। वज्रिणं वज्रदंष्ट्रं च वज्रिणाराधितं शिशुं। वज्रकुंडलि
नं घोरं नीरदोपमनीश्वरं। ब्रह्माद्यास्तुष्टुवुः सर्वे सुरेंद्राश्च मुनीश्वरा
नेदुः समंततः। सर्वे ननृतुश्चाप्सरोगणाः। मुनींद्रा मुनिशार्दूल ऋ
ग्यजुः साम संभवैः। मंत्रैर्माहेश्वरैः स्तुत्वा संप्रणेमुर्मुदान्विताः। ब्र
ह्मा हरिश्च रुद्रश्च शक्रः साक्षाच्छिवांबिकाः। जीवश्चेंदुर्महातेजा भास्क
रः पावनोऽनलः। लक्ष्मीः साक्षाच्छची ज्येष्ठा देवी चैव सरस्वती। अ
दितिश्च दितिश्चैव श्रद्धा लज्जा धृतिर्मुदा। नंदा भद्रा च सुरभी सुरी

लासुमनास्तथा। वृषेंद्रश्च महातेजा धर्मो धर्मात्मजस्तथा। आह
त्य मां तदा लिंगयनुष्टुवुर्मुनिसत्तमः। शिलादोपि मुनिर्हृष्टः पिता मे
ताहत्रां तदा नीत्वा प्रणम्य पुण्यात्मा नुष्टाव हृष्टवद्गुरुतो भगवन् दे
वदेवेश त्रियंबक ममाव्यय। पुत्रोसी जगतां यस्मात् त्राता दुःखाद्विकिं
चनः। यन्नरक्षोसि जगतां पिता मे पुत्र सर्वशः। अयोनिज नमस्तुभ्यं
जगद्योनि पितामह। पितुः पुत्र महेशान जगतां च जगद्गुरो। वत्स वत्स
महाभाग त्राहि मां परमेश्वरः। त्वया हं नंदिनो यस्मात् नंदि नाम्ना सुरे १२८
श्वरः। तस्मान्नंदय मानंदिन् नमामी जगदीश्वरं। प्रसीद पितरौ मेघ
रुद्रलोकं गतावुभौ। पितामहोश्च गतो नंदीन् अवतीर्णे महेश्वरे। मम
वसफलं लोके जन्म वै जगतां प्रभो। अवतीर्णं सुतेनंदीन् रक्षार्थं मम मीश्वरः

तुभ्यं नमः सुरेशान नंदिश्वर महेश्वरः। पुत्र पाहि महाबाहो देवदेव
जगद्गुरो। पुत्रत्वमेव नंदीश मत्वा यत्कीर्तितं दयान्। मम तन्न् क्षम्य
तां वत्स त्वत्वस्त्व सुरासुरैः। यः पठेछृणुयाद्वापि स्तवं पितामहाविशांश्रा
वयेद्वा द्विजान् भक्त्या सो मया सह मोदते एवं स्तुत्वा नुतं बालं प्रण
म्य बद्धु मानतः। मुनिश्वरांश्च संप्रेक्ष्य सुशिलादो वाच सुव्रतः। पश्यध्वं श्री५
मुनयः सर्वे महाभाग्यं ममाव्ययान्। नंदी यज्ञांगणे देवश्चावतीर्णोय
तः प्रभुः। मत्समः कः पुमान् लोके देवो वा दानवोपि वा। एष नंदी यतो
जातो यज्ञान्भोहितायते। ॥इति श्रीमहापुराणे लिंगे नंदीश्वरो संता
द्विचत्वारिंशोध्यायः॥ ॥नंदिरु॥ ॥मया सह पिता हृष्टः प्रणम्य च म
हेश्वरं। उटजं स्वं जगामाशु निधिं लब्ध्वेव निर्धनः। यदा गतो हमुटजं

शिलादस्य महामुनेः। तदा वै देवकं रूपं त्यक्त्वा मानुष्यमास्थितः। नष्ट
श्चैव स्मृतिर्दिव्या येन केनापि कारणात्। मानुष्यमास्थितं दृष्ट्वा पिता मे
लोकपूजितः। लज्जापदुःखितोऽत्यर्थं स्वजनैस्वैः समावृतः। जातकर्मादि
कांश्चैव चकार मम सर्ववित्। शालंकायनपुत्रोयः शिलादपुत्रवत्स
लः। उपदिष्टा हि तेनैव ऋक्शाखा हि यजुस्तथा। १। सामशाखास
हस्रेच सांगोपांगो महामुने। आयुर्वेदं धनुर्वेदं गांधर्वं चाश्वलक्ष
णं॥ मित्रावरुणनामानौ तपोयज्ञबलान्वितौ। तस्याश्रमं गतौ दिव्यौ १२९
दृष्टुं मां चाज्ञया विभोः॥ ऊचतुश्च महात्मानौ मां निरीक्ष्य मुहुर्मुहुः। त
तनंदिस्त्वमल्पायुः सर्वशास्त्रार्थपारगः। न दृष्टमेवमाश्चर्यं आयुर्व
र्षादतः परं। इत्युक्त्वा वतिविप्रेंद्र शिलादः पुत्रवत्सलः। समालिंग्य
रुदंतीनो जरुणं चैव नरलरुणमेव वा से दूलेसितमे वर्षित त्तोप्य मुनिसत्तमः। १४५

श्च दुःखार्तो रुरोदातीव सस्वनं। हा पुत्र पुत्र पुत्रेति पपात च समंततः
अहो बलं विधेश्चैव विधातुश्चेति दुःखितः। तस्य चार्तस्वरं श्रुत्वा त
दाश्रमनिवासिनः। निपेतुर्विकलात्यर्थं रक्षांच कुश्च मंगलं। तुष्टुवु
श्च महादेवं त्रियंबकमुमापतिं। कृत्वा त्रियंबकं नैव मधुरेण स
मर्चितं। पूर्वमयुतसंख्यातं सर्वव्याधिजयावहं। पिता विगतसंज्ञ
श्च तथा चैव पितामहः। निश्चेष्टश्च बभूवास्तौ मृतवत्रिपपात हा मे
त्यो श्रीनाह ममविरात् शिरसा चाभिवंद्य तौ। मृतवत्पतितं सादृग् पित
रं च पितामहं। प्रदक्षिणीकृत्य च तं रुद्रजाप्यरतोऽभवं। कृत्सु इरी
के सुचिरं ध्यात्वा देवं त्रियंबकं। त्र्यक्षं दशभुजं शांतं पंचवक्त्रं सदाशिवं
सरितश्चांतस्थपुण्ये स्थितं मां परमेश्वरः। तुष्टोऽब्रवीन्महादेवः सोम

ः सोमार्धभूषणः। वसनंदिन् महाबाहो मृत्योर्भीतिः कुतस्तव।
मय्येव चेद्भक्तो विप्रो मत्समस्त्वं न संशयः वसैतं तं न वदेहं च लौकि
कं परमार्थतः। नास्त्येव दैविकं दृष्टं शिलादेन पुरा तव। देवैश्च मु
निभिः सार्धं गंधर्वैर्दानवोत्तमैः। पूजितेयस्सुरावस्त दैविकं नंदिके
श्वरः। संसारस्य स्वभावोयं सुखं दुःखं पुनः सुखं। नृणां योनिपरित्या
गः सर्वथैव विवेकिनां। एवमुक्त्वा तु मां साक्षात् सर्वदेवेश्वरेश्वरः। क
राभ्यां सुशुभाभ्यां संस्पृश्य परमेश्वरः। पश्यन्भगवान् रुद्रः पर १२०
मार्तिहरो हरः। उवाच च महादेवस्तुष्टात्मा वृषभध्वजः। निरीक्ष्य ग
णपांश्चैव देवीं हिमवतः सुतां। सर्वमालोक्य चतुष्टात्मा महादेव
ः सुरेश्वरः। अजरो ह्यमरश्चैव नित्यं दुःखविवर्जितः। अक्षयश्चाव्यय

श्चैव मद्वीर्यातिपराक्रमः। इष्टो मम सदा चैव नित्यं दुःखविवर्जितः
मम पार्श्वगतः सदा। मद्बलश्चैव भविता महायोगबलान्वितः। एव
मुक्त्वा च मां देवो भगवान् सगणस्तदा। कुशेशयमयीं मालां समुन्मुच्य
त्मनस्तदा। आबबंध महातेजा मम देवो वृषध्वजः। तयाहं मालया जा
तः शुभया कंठसक्तया। अष्टौ दशभुजश्चैव द्वितीय इव शंकरः। त
त एव समादाय हस्तेन परमेश्वरः। उवाच ब्रूहि किं तेद्य ददामि व
रमुत्तमं। ततो जटाश्रयं वारि गृहीत्वा कारनिर्मलं। उक्त्वा नदीभव
स्वेति उत्ससर्ज वृषध्वजः। ततः सा दिव्यतोयेन पूर्णा सितजलाशुभा
पद्मोत्पलवनोपेता प्रावर्तत महानदी। तामुवाच महादेवो नदीं प
रमशोभनां। यस्मात् जटोदकादेव प्रवृत्ता त्वं महानदी। तस्मात् जटोद

कारव्याता भविष्यसि सरिद्वरा। त्वयि स्नात्वा नरः कश्चित् सर्वपापैः प्रमुच्य
ते। ततो देव्या महादेवः शिलादतनयः प्रभुः। पुत्रस्त्वयमिति प्रोच्य पादयोः स
न्यपातयत् ~~सर्वपापैःप्रमुच्य~~ेन संसाम्राघ्राय शिरसि पाणिभ्यां परिमार्जितं। पु
त्रप्रेम्णाऽभिषिषिचे श्रोतोभिः स्तनजैस्त्रिभिः। पयसा शंखगौरेण देवदेवनिरी
क्षसा। नंदीतिश्रोतसां देवः भगवान्वृषभध्वजः। त्रिश्रोतसं नदिं दृष्ट्वा वृषः परम
हर्षितः। ननाद नादात्तस्माच्च सरिदन्या तदाऽभवत्। वृषध्वनिरिति ख्याता दे
वदेवेन सा नदी। जांबूनदमयं चित्रं सर्वरत्नमयं शुभं। स्वं देवश्चात्मनो दिव्यं नि १३१
र्मितं विश्वकर्मणा। मुकुटं चाबबंधेशो मम मूर्ध्नि वृषध्वजः। कुंडले च शुभे दि
व्ये वज्रवैडूर्यभूषिते। सोघांभसाऽभिषिंच देवकृष्टेन स्वतेजसा। तस्याभि
षिक्तस्य नद्याः प्रवृत्ताः श्रोतसी शुभे। यस्मात्सुवर्णान्निःसृत्य नद्येका संप्रव
र्त्ता बबंध महादेवः स्वयमेव परमेश्वरः। मां तथा भर्म्माणं हि दृष्ट्वा मेघः प्रजाकरः।

र्त्तिता। स्वर्णोदकेति तामाह देवदेवस्त्रियंबकः। जंबूनदमयं यस्मात्
द्वितीयान्मुकुटाच्छुभात्। प्रावर्त्तत नदी पुण्या ख्याता जांबूनदीति सा।
तत्पंचनदं नाम जप्येश्वरसमीपगं। यः पंचनदमासाद्य स्नात्वा जप्येश्वरेश्व
रं। पूजयेत् शिवसायुज्यं प्रयात्येव न संशयः। अथ देवो महादेवः सर्वभू
तपतिर्भवः। देवीमुवाच शर्वाणीमुमां च गिरिजां तथा। देवी नंदीश्वरं
देवं अभिषेक्ष्यामि भूपतिं। गणेन्द्रान् व्याहरिष्यामि किं वा त्वं मन्यसे व्य
य। तस्य तद्वचनं श्रुत्वा भवानी हर्षितानना। स्मयंति वरदं प्राह भवं भू
तपतिं पतिं। सर्वलोकाधिपत्यं च गणेशत्वं तथैव च। दातुमर्हसि देवेश
शैलादिस्तनयो मम। ततः स भगवान्देवः सर्वलोकमहेश्वरः। सस्मार
गणपान्दिव्यान्देवदेवो वृषध्वजः।। ।।इति श्रीलैंगे नंदीगणाभिषे

चनत्रिंचत्वारिंशोऽध्यायः॥ ॥सूत उ०॥ स्मरणाद्देवरुद्रस्य संप्राप्ताश्च ग
णेश्वराः। सर्वे सहस्रहस्ताश्च सहस्रायुधपाणयः। त्रिनेत्राश्च महात्मा
नः स्त्रिदशैरपि वंदिताः। कोटिकालाग्निसंकाशा जटामुकुटधारिणः दंष्ट्रा
करालवदना नित्यशुद्धाश्च निर्मलाः। कोटिकोटिग(णै)र्युक्तैरात्मानाच
गणेश्वराः। असंख्याता महात्मानस्तत्राजग्मुर्मुदान्विताः। गायंतश्च सुदंत
श्च नृत्यंतश्च महाबलाः। मुखवादंबरवाद्यानि वादयंतस्तथैव चारथ्यैर्नागै
र्हयैश्चैव सिंहमर्कटवाहनाः। विमानेषु तथारूढा हेमचित्रेषु तेगणाः। भे १३२
रीमृदंगमुख्यैश्च पणवानकगोमुखैः। वादित्रैर्विविधैश्चान्यैः पटहैर्न
कुपुष्पुरैः। भेरीमुरजकंसालैराढंवरकाडिंडिमैः। मर्दलैर्वेणुवीणाभिः
विविधैस्थूलनिस्वनैः। फूत्कारैस्तलघातैश्च कच्छपैकंबुकैस्तथा।

वाद्यमानैर्महायोगा आजग्मुर्देवसंसदः। तेगणेशा महेशत्वानूर्व
देवेश्वरेश्वरांचरणम्यदेवंदेवीं च दृष्ट्वचनमब्रुवन्। भगवान्रुद्र देवदे
वेश। त्रियंबक वृषध्वज॥ किमर्थं हि स्मृता देव आज्ञापय महाद्युते। किं
सागरान्शोषयामो वयं वा सह किंकरैः। किं मृत्युं प्राकृध्या मोद्यपशुन्त हयं
यमं जंबध्वेंद्रं सह देवैश्च सह विष्णुं च वायुना। आनयामोत्र संक्रुद्धादैत्या
न्वा सह दानवैः। कस्याद्य व्यसनं घोरं करिष्यामस्तवाज्ञया। तांस्तथावादि
नः सर्वान्गणेशान्सर्वसंमतान्। उवाच देवसंपूज्य कोटिकोटिशतान्प्रभुः
शृणुध्वं यत्कृते यूयमिहाहूता जगद्धिताः। श्रुत्वा तं प्रयतात्मानः कुरु
ध्वं तद्वशं किनाः। नंदीश्वरांयपुत्रो नः सर्वेशामीश्वरेश्वरः। प्रियो ग्रनायक
श्चैव सेनानीः श्रीसमृद्धिमान्। तमिमं मम संदेशात्पूर्वं सर्वेति संमताः। सेना
न्यमभिषिंचध्वं महायोगपतिं पतिं। एवमुक्ते भगवता गणपाः सर्व एव ते। ए

मुक्तादामसवस्त्वैं च मणिरत्नासनान्विते। स्तंभैश्च वैडूर्यमयैः किंकिणीजालसंवृते। चामरैर्नर्तक
संयुक्ते मंडपे दिव्ये ततो मुरवा समादधुः तन्मध्ये तदासनवरं शुभं।

वमस्त्विति संमेत्य संभारानाहरंस्ततः। तस्य सिंहासनं दिव्यं जांबून
दमयं शुभं। आसनं मेरुसंकाशं मनोहरमुपाहरन्। शातकुंभमयं
चापी चारुचामीकरपत्रं। तस्याग्रतः पादपीठं नीलवज्रावभासितं
चक्रुः पादप्रतिष्ठार्थं कलशौ वास्य पार्श्वगौ। संपूर्णपरमांभोभिः रत्नचि
त्रावृताननौ। कलशानां सहस्रं च सौवर्णं राजतं तथा। ताम्रजं मृन्म
यं चैव सर्वतीर्थैर्विपूरितं। छत्रं शतशलाकं च जांबूनदमयं शुभं। श
खहारांगगौरेण दृष्टेनापि विराजितं। व्यजनं चंद्रशुभ्रं च हेमदंडं
सुचामरं। ऐरावतं सुप्रतीकं गजावेतौ च पूजितौ। मुकुटं कांचनं चैव १३३
निर्मितं विश्वकर्मणा। कुंडले चामले दिव्ये वज्रं चैव वरायुधं। जांबू
नदमये सूत्रे केयूरद्वयमेव च। हारं च मणिचित्रांगं निर्मितं विश्व
कर्मणा। संभाराणि तथान्यानि विविधानि बहून्यपि। संभृतान्निमु

रव्यग्रामणया देवसंमताः। ततो देवा महेंद्रस्य सनारायणकास्तथा
मुनयो भगवान् ब्रह्मा नवब्रह्माण एव च। लोकाः सलोकपा वेदा
स्तत्राजग्मुर्मुदायुताः। तेष्वागतेषु सर्वेषु भगवान् परमेश्वरः। सर्वका
र्याधिकं कर्तुमादिदेश पितामहं। पितामहोपि भगवान्नियोगाद्दे
वतस्य तु। चकार सर्वं विधिवत् अग्निहोत्रं समाहितः। अर्चयित्वा ततो
ब्रह्मा स्वयमेवाभिषिंचत। ततो विष्णुस्ततः शक्रः ऋषयश्च सहाम
रैः। अभ्यषिंचंत विधिवत् गणेंद्रं त्रिवशासनात्। वासोयुगं ततो दिव्यं
दिव्यगंधं तथैव च। केयूरे कुंडले माल्यं मुकुटं हारमेव च। छत्रं शत
शलाकं च बालव्यजनमायुधं। दत्तं महात्मना तेन ब्रह्मणा परमेष्ठि
ना। ऋषयस्तुष्टुवुश्चैनं पितामहपुरोगमाः। स्तुतवत्सु ततस्तेषु विष्णुः

सर्वं जगत्पतिं। शिरस्यंजलिमाधाय तुष्टाव सुसमाहितः। प्रांजलिः प्र
यतो भूत्वा जयशब्दं चकार वै। ततो गणाधिपाः सर्वे ततो देवास्ततो सुरा
एवं स्तुतश्चाभिषिक्तो देवैः सब्रह्मकैस्तथा। उवाह चक्रुतस्तत्र नियो
गात्परमेष्ठिनः। मारुतानां सुता देवी सुयशाख्या बभूव या। लब्धं शक्ति
ध्वजं छत्रं तयारत्नविभूषितं। चामरे चामरासक्त हस्ताग्रैः स्त्रीशतैर्वृ
ता। सिंहासनं च परमं तया लब्धं सुपूजितं। अनेकता महालक्ष्म्या मुकु
टाद्यैः सुभूषणैः। लब्धाश्च हारपरमा देव्याः कंठगतास्तया। वृषेंद्रं च सि १३४
तेनागं सिंहं सिंहध्वजं तथा। रथं च हैमं छत्रं च बहुरत्नविभूषितं। आधि
पत्येन सदृशास्त्वया नास्ति विभोः क्वचित्। सोत्वयं श्च गृहित्वेशास्तथा संब
धिबांधवैः। आरुह्य वृषमीशानो तया देव्या गतः शिवः। तं चापि विभवं

दृष्ट्वा तदा वै प्रार्थयन् गणाः। पुनर्देवर्षयः सिद्धा आज्ञां पाशुपतिं द्वि
जाः। अथांतकज्ञां प्रददौ तेषां सुराणामप्रतया विभोः। नंदिकोनगजानंतु
स्तदा पाशुपती शुभा। तस्माद्विमुनयो लब्ध्वा तदाज्ञां मुनिपुंगवः। अव
न्नकाद्दत्तदेवासंस्तस्माद्देवं समर्चयेत्॥ ॥इति श्री॰ नंदीश्वराभिषेक
श्चतुश्चत्वारिंशोध्यायः॥ ॥ऋषय ऊचुः॥ ॥ततः सुव्यक्तमखिलं कथि
तं शंकरस्य तु। सर्वात्मभावं चांशस्य स्वरूपं वक्तुमर्हसि॥ ॥सूत उ॥ ॥
भूर्भुवः स्वर्महश्चैव जनः साक्षात्तपस्तथा। सत्यलोकं सपातालं नरका
र्णवकोटयः। तारकाग्रहसोमार्क ध्रुवसप्तर्षयस्तथा। वैमानिकास्त
थान्ये च तिष्ठंत्यस्य प्रसादतः। अनेन निर्मितास्त्वेनेतदात्मानो द्विजर्षभाः।
समष्टिव्यष्टिरूपेण सर्वात्मा संस्थितः शिवः। सर्वात्मानं महादेवं महात्मा

नेमहेश्वरा नविजानंति मूढा मायया नस्य भांति ता। तस्य देवस्य रुद्रस्य
शरीरे वै जगत्त्रयं। तस्मात्त्वेणस्य तेव ह्येष जगतो निर्णये तथा। पुराणैः क
थितं सर्वं यथांडस्य महाकृतिः। भुवनानां स्वरूपं च ब्रह्मांडे कथयाम्य
ह। पृथिवी चांतरिक्षं च स्वर्लोको जन एव च। तपः सत्यं च सप्तैते लोका
स्त्वंडोद्भवाः शुभाः। अधस्तादत्र वै तेषां द्विजाः सप्ततलानि तु। महातलाद
यस्तेषामधस्तान्नरकक्रमात्। महातले हेमतले सर्वरत्नोपशोभितैः प्रा
सादैः सुविचित्रैस्तु भवस्यायतनैः। तथा अनंतेन च संयुक्तं मुचुकुंदेन धीम १३५
ता नृपेण बलिना चैव पातालस्वर्गवासिना। शैलं रसातले विप्राः शार्क
रं हि तलातले। पीतं सुतलमित्युक्तं नितले विद्रुमप्रभं। सितं हि वितले य
द्ध तले यच्च सितेतरं। क्ष्मायाश्चैवादिस्तारमधस्तेषां तु सुव्रता। तलानां

चैव सर्वेषां घनः सप्तसमाहितः। सहस्रयोजनं व्योम नवसाहस्रमेकशः
[illegible] सहस्रं हि घनानां स घनस्य तु। व्योम्नः प्रमाणं मूलेन त्रिंशत्सहस्र
कं [illegible] सुपर्णेन मुनिः श्रेष्ठास्तथा वासुकिना शुभे। रसातलमिति ख्यातं त
थान्यैश्च निषेवितं। विरोचन हिरण्याक्ष नरकाद्यैश्च सेवितं। महावीरेण
[illegible] नेन हयग्रीवेण धीमता। शंकुकर्णेन संभिन्नं तथा नमुचिपूर्वकैः तथा
न्यैर्विविधैरत्नैस्तलं चैतत्सुशोभनं। तेषु तेषु च सर्वेषु ईश्वरः परमेश्वरः
स्कंदेन नंदिना सार्धं गणपैः सर्वतोमुखं। तलानां चैव सर्वेषां ईश्वरः प्रभुः
स [illegible] मा [illegible] श्मान तानि धराचार्य। सप्तधा कथितामया।। ।।इति श्रीमहापुरा
णे लिंगे भुवनकोशे पंचचत्वारिंशोध्यायः।। ।।सूत उ।। ।।सप्तद्वीपा स्मृता
[illegible] नंद्या [illegible] वतसंकुला समुद्रैः सप्तभिश्चैव सर्वतः परिवारिताः। जंबूप्लक्ष

शाल्मलीच कुशक्रौंचस्तथैवच।शाकःपुष्करनामाच द्वीपास्त्वसे
नराक्रमात्।सप्तद्वीपेषु सर्वेषु सावसर्वगणेऽर्दनः।नागवेशधरो भूत्वास
त्रिध्यंकुरुते हरः।क्षारादेक्षुरसोदश्च सुरोदश्च घृतोदधिर्दध्योदकश्च
क्षीरोदः स्वादूदः कस्त्वनुक्रमात्।समुद्रेष्विह सर्वेषु सर्वदा सगणः शिवः।
जलरूपधरः श्रीमान्क्रीडते चोर्मिबाहुभिः क्षीरार्णवेमृतमिव मर्दः
क्षीरार्णवे हरीन्द्रो ते शिवः ज्ञानधिया साक्षाद्दैयो गनिज्ञया।यदा प्रबुद्धो
भगवान्प्रबुद्धमखिलं जगत्।यदा सुप्तस्तदा सुप्तं तन्मयत्वाच्चराचरः।ते १३६
नेव सृष्टमखिलं धृतं त्वखिलमेव च।संहृतं देवदेवस्य प्रसादात्परमेष्ठि
नः।सुश्वेनाइति विख्याता यजंति पुरुषर्षभाः।अनिरुद्धं मुनिश्रेष्ठाः शंख
चक्रगदाधरं।पेचानिरुद्धध्यायेति तेतु शात्मविदांवराः।ते निरुद्धसमासर्वे

सर्वसंपत्समन्विताः।सनंदनश्च भगवान्सनकश्च सनातनः।वालखि
ल्याश्च सिद्धाश्च मित्रावरुणकेस्तथा।यजंति सततं चैव विश्वस्य प्रभवं
हरिं।सप्तद्वीपेषु तिष्ठंति नानाशृंगा महोच्छ्रया।आसमुद्रादयः केचि
र्योगकरास्तथा।धरायां पतयश्चासन्बहवः कालगौरवात्।शापाच्च
परमेशान्याः क्रौंचारिर्जननेप्रति।मन्वंतरेषु सर्वेषु अतीतानागतेष्विह
नवद्वीपाधिपरेशानान्वहोस्वयंभुवेंतरे।मन्वंतरेषु सर्वेषु अतीताना
गतेषु वा।तुल्याभिमानिनः श्चैव सर्वे तुल्यप्रयोजनाः।स्वायंभुवस्य तु मनोः
पौत्रस्यासन्महाबलाः।प्रियव्रतात्मजा वीरास्ते दशेह प्रकीर्तिताः।अग्नि
ध्रश्चाग्निबाहुश्च मेधा मेधातिथिर्वसुः।ज्योतिष्मान्द्युतिमान्हव्यव
हनः पुत्र एव च।प्रियव्रतोऽभ्यषिंचत्तान्सप्तद्वीपेषु पार्थिवो।जंबूद्वीपेश्व

रं चक्रे आग्नीध्रं सुमहाबलः। प्लक्षद्वीपेश्वरं चापि चक्रे मेधातिथिं सुतं।
शाल्मले वपुष्मन्तं राजानमभिषिक्तवां। ज्योतिष्मन्तं कुशद्वीपे राजानं
कृतवान् प्रभुः। द्युतिमन्तं च राजानं क्रौंचद्वीपे समादिशत्। शाकद्वीपेश्व
रं चापि हव्यं चक्रे प्रियव्रतः। पुष्कराधिपतिं चैव सवनं कृतवान् प्रभुः। पुष्क
रे सवनस्यापि महावीतः सुतोऽभवत्। धातकिश्चैव द्वावेतौ पुत्रौ पुत्रवतां वरौ।
महावीतं स्मृतं वर्षं तस्य नाम्ना महात्मनः। नाम्ना तु धातकेश्चापि धातकीखं
डमुच्यते। हव्योऽप्यजनयत् पुत्रान् शाकद्वीपेश्वरः प्रभुः। जलदं च कुमारं च
कुमारं मणीचकं। कुसुमोत्तरं मोदकिं च सप्तमस्तु महाद्रुमः। जलदं ज
लदस्याथ वर्षं प्रथममुच्यते। कुमारस्य तु कौमारं द्वितीयं परिकीर्तितं। सु
कुमारं तृतीयं तु सुकुमारस्य कीर्त्यते। मणीचकं चतुर्थं तु मणीचकमिहो

च्यते। कुसुमोत्तरस्य वर्षं तु पंचमं कुसुमोत्तमं। मोदकं चापि मोदा
कि वर्षं षष्ठं कीर्तितं। महाद्रुमस्य नाम्ना तु सप्तमं तु महाद्रुमं। तेषां
तु नामभिस्तानि सप्त वर्षाणि तत्र वै। क्रौंचद्वीपेश्वरस्यापि पुत्रा द्युति
मतस्तु वै। कुशलो मनोनगश्चोष्णः प्रवरश्चांधकारकः। मुनिश्च दुं
दुभिश्चैव सुता द्युतिमतस्तु वै। तेषां स्वनामनिर्दिष्टाः क्रौंचद्वीपा
श्रयाः शुभाः। कुशलस्य देशः कुशलो मनोनुगस्य मनोनुगः। उष्णस्यो
ष्णः स्मृतो देशः प्रवरस्यापि प्रवरः। अंधकारक देशश्च अंधकारस्य की
र्तितः। मुनेस्तु मुनिदेशो वै दुंदुभेर्दुंदुभिः स्मृतः। एते जनपदाः सप्त क्रौंच
द्वीपे तु भास्वराः। ज्योतिष्मतः कुशद्वीपे सप्तैवासन् महौजसः। उद्भिदो वेण
जाश्चैव सुरथो लंबनो धृतिः। षष्ठः प्रभाकरश्चापि सप्तमः कपिलः स्मृतः। १३९

मानस्यतुमानसः।वैद्युतोवैद्युतस्यापिमानसस्यतुमानसः।सुप्र
भस्सुप्रभस्यापि ४

उद्भिदं प्रथमं वर्षं द्वितीयं वेणुमंडलं। तृतीयं सुरथाकारं चतुर्थं लं
बनं स्मृतं। पंचमं धृतिमत्षष्ठं प्रभाकरमनुत्तमं। सप्तमं कपिलं नाम
कपिलस्य प्रकीर्तितं। शाल्मलस्येश्वराः सप्त सुतास्ते तु वपुष्मतः।
श्वेतश्च हरितश्चैव जीमूतो रोहितस्तथा। वैद्युतो वैद्युतश्चापि मा
से ते देशनामिका। प्लक्षद्वीपे तु वक्ष्यामि जंबूद्वीपादनंतरं। सप्तमेधा
तिथेः पुत्राः प्लक्षद्वीपेश्वराः स्मृताः। ज्येष्ठः शांतभयस्तेषां शिशिर
स्तु सुखोदयः। आनंदश्च शिवश्चैव क्षेमकश्च ध्रुवस्तथा। तानि तेषां १३८
समानानि सप्तवर्षाणि भागशः। निवेशितानि तैस्तानि पूर्वं स्वायंभुवं
ते ह। मेधातिथेस्तु पुत्रैस्तैः प्लक्षद्वीपनिवासिभिः। वर्णाश्रमाचारयुक्ताः
प्रजास्तत्र निवेशिताः। प्लक्षद्वीपादिवर्षेषु शाकद्वीपांतकेषु वै। ज्ञेयं

रुद्धं च निरतानि संरुद्धानपरायणाः। अन्येषु पुष्करद्वीपे प्रजा याश्च प्र
जेश्वराः ३

पंचसु धर्मश्च वर्णाश्रमविभागतः। सुखमायुश्च रूपं च बलधर्मौ
द्विजोत्तमाः। पंचस्वेतेषु द्वीपेषु सर्वसाधारणं स्मृतं। पंचस्वेतेषु
द्वीपेषु प्रजाश्चैव प्रजेश्वराः। प्रजापतेश्च रुद्रस्य भावमृतसुखोत्क
टाः॥ ॥इति श्रीभुवनकोशे षट्चत्वारिंशोऽध्यायः॥ ॥सूत उवाच॥
आग्नीध्रं ज्येष्ठदायादं काम्यपुत्रं महाबलं। प्रियव्रतोऽभ्यषिंचत्तं जंबू
द्वीपेनराधिपं। सोतीवमन्वतक्रश्च तपस्वी करुणस्तदा। नवाच
नरतः श्रीमान् धीमांश्चैव द्विजर्षभाः। तस्य पुत्रा बभूवुस्तु प्रजाप
तिसमा नव। सर्वे माहेश्वराश्चैव महेश्वरपरायणाः। ज्येष्ठो नाभिरि
ति ख्यातस्तस्य किंपुरुषोऽनुजः। हरिवर्षस्तृतीयस्तु चतुर्थो हि इ
लावृतः। रम्यस्तु पंचमस्तत्र हरिवैपिष्ठ उच्यते। कुरुस्तु सप्तमः

स्त्वेषां प्रजाश्चो दृष्टमस्मृतः। नवमः केतुमालश्च तेषां देशान्निबोधत
नाभेस्तु दक्षिणं वर्षं हिमाव्हं तु पिता ददौ। हेमकूटं तु यद्वर्षं ददौ किंपु
रुषाय तत्। नैषधं यत्स्मृतं वर्षं हरये तत्पिता ददौ। वर्षमाल्यवतं चापी
लावृताय न्यवेदयत्। गंधमादनवर्षं तु केतुमालाय दत्तवान्। एवं क्रमेण
चान्येषां स नामानि ददौ प्रभुः। एवं तेषां स नामानि कृत्वा वर्षाणि भागशः।
अग्नीध्रस्तेष्वथ तेषु सर्वेषु पुत्रान् स्वानभिषिच्य तान्। यथाक्रमं स धर्मा
त्मा ततस्तु तपसि स्थितः। तपसा भावितश्चाथ स्वाध्यायनिरतस्तु सः
स्वाध्यायनिरतः पश्चात् शिवध्यानरतः स्वभूत्। यानि किंपुरुषाद्यानि व
र्षाण्यष्टौ शुभानि च। तेषां स्वभावतः सिद्धिः सुखप्राया ह्ययत्नतः। विपर्य
यो न तेष्वस्ति जरामृत्युभयेन च। धर्माधर्मौ न तेषां तु नोत्तमाधममध्यमा १३९

पि२

न तेष्वस्ति युगावस्था क्षेत्रेष्वष्टसु सर्वतः। रुद्रक्षेत्रे मृताश्चैव जंगमा
स्थावरास्तु ये। तत्कालप्रसंगिकाश्चा तेषु क्षेत्रेषु यांति कः। तेषां हिताय
रुद्रेण अष्टक्षेत्रे विनिर्मिते। तत्र तेषु महादेवः सान्निध्यं कुरुते सदा।
दृष्ट्वा देवं महादेवं अष्टक्षेत्रनिवासिनः। ईश्वरः सर्वदा तेषां स एव प
रमां गतिः। नाभेर्निसर्गं वक्ष्यामि हिमांकेऽस्मिन्निबोधत। नाभिस्त्वजन
यत्पुत्रं मरुदेव्यां महाद्युतिं। ऋषभं पार्थिवश्रेष्ठं सर्वक्षत्रस्य पूर्वकं।
ऋषभाद्भरतो यज्ञे वीरः पुत्रशताग्रजः। सोऽभिषिच्याथ ऋषभो भरतं पु
त्रवत्सलः। ज्ञानं वैराग्यमाश्रित्य जित्वेंद्रियपरिग्रहं। सर्वात्मनात्मनि
स्थाप्य मनसात्मानमीश्वरः। नग्नो जटी निराहारो वीराध्वानं गतो हि
सः॥ ॥इति श्री लैंगे सप्तचत्वारिंशोऽध्यायः॥ ॥सू[illegible]॥ ॥

अस्य द्वीपस्य मध्ये तु मेरुर्नाम महागिरिः। नानारत्नमयैः शृंगैः स्थितः
स्थितिमतां वरः। चतुराशीतिसाहस्रमुच्छ्रायेन प्रकीर्त्तितः। प्रविष्टः
षोडशाधस्ताद्विस्तृतः षोडशैव तु। सरावसंस्थितत्वाच्च द्वात्रिंशन्मू
र्ध्नि विस्तृतः। विस्ताराद्द्विगुणश्चास्य परिणाहोनुमंडलं। हैमीकृतो म रू
हेशस्य शृंगाग्रस्पर्शनेन च। धत्तूरपुष्पसंकाशः सर्वदेवनिकेतनः।
क्रीडाभूमिश्च देवानामनेकाश्चर्यसंयुतः। लक्षयोजनमायामं तस्यैव तु
महागिरेः। ततः षोडशसाहस्रं योजनानि क्षितेरधः। शेषं चोपरि विद्धि १८०
द्वा धरायास्तस्य शृंगिणः। मूलायामप्रमाणं तु विस्तरो मूलतो गिरेः।
ककुब्विस्तारमस्यैव द्विगुणं चोर्ध्वतो गिरेः। पूर्वं तु पद्मरागाभो दक्षिणे
हेमसंनिभः। पश्चिमे नीलसंकाशश्चोत्तरे विद्रुमप्रभः। अमरावती

पूर्वभागे नानाप्रासादसंकुला। नानादेवगणाकीर्णा मणिजालैः स
मावृता। गोपुरैर्विविधाकारैर्हेमरत्नविभूषितैः। स्तंभारविनमै
श्च मदाघूर्णितलोचनैः। स्त्रीसहस्रैः समाकीर्णा अप्सरोभिः समंत
तः। दीर्घिकाभिर्विचित्राभिः फुल्लांबुरुहसंकुलैः। हेमसोपानसंयु
क्तैर्हेमैः सैकतराशिभिः। नीलोत्पलैश्चोत्पलैश्च हेमैश्चातिसुगं
धिभिः। एवंविधैस्तडागैश्च नदीभिस्तमदैर्युता। विराजते पुरी शक्र
तया सौ पर्वतः शुभः। तेजस्विनी नाम पुरी चाग्नेय्यां पावकस्य तु।
अमरावतिसंकाशा सर्वभोगसमन्विता। वैवस्वती दक्षिणे तु यम
स्य यमिनः प्रभोः। भवनैरावृता दिव्यैर्जांबुनदमयैः शुभैः। नैरृते पि
रूपवती तथा शुद्धवती शुभा। वायां गंधवती नाम वायव्यां दिशि

शोभनां। महोदयाचोत्तरे तु ऐशान्यां तु यशोवती। पर्वतस्य दिगंतेषु
राजते दिवि सर्वदा। ब्रह्मविष्णुमहेशानां तथान्येषां निकेतनं। सर्वभो
गयुतं पुण्यं दीर्घिकाभिर्नगोत्तमे। सिद्धैर्यक्षैस्तु संकीर्णं गंधर्वैर्मु
निपुंगवैः। तथान्यैर्विविधाकारैर्भूतसंघैश्चतुर्विधैः। गिरेरुपरि विप्रें
द्रा शुद्धस्फटिकसंन्निभे। सहस्रभौमे विस्तीर्णे विमाने सुमहत्स्थिते। तस्मि
न्महाभुजः सर्वः सोमसूर्याग्निलोचनः। सिंहासने मणिमये देवास्ते
षण्मुखान्वितः। हरेस्तत्र च विस्तीर्णे विमाने वामतः स्थितं। पद्मराग १४१
मये दिव्यं पद्मजस्य तु दक्षिणे। तस्मिन्शक्रस्य विपुलं पुरं रम्यं यम
स्य तु। सोमस्य वरुणस्याथ निर्ऋतेः पावकस्य च। वायोश्चैवं तु रुद्रस्य
सर्वलिंगनिवेशनं। तेषां तेषां विमानेषु दिव्येषु विविधेषु च। ऐशान्यामी

श्वरः क्षेत्रे नित्यार्चावर्त्मनि स्थितः। सिद्धेश्वरस्य भगवान् शैलादेः शि
ष्यसत्तमः। सनत्कुमारसिद्धेशः सुखासीनः सुरेश्वरः। सनकश्च सनंद
श्च सदृशाश्च सहस्रशः। योगभूमिः क्वचित्तस्मिन्भोगभूमिः क्वचित्व
बालसूर्यप्रतीकाशं विमानं तत्र शोभनं। शैलादिनः श्रुतं चास्ति तस्मि
न्नास्ति गणेश्वरः। षण्मुखस्य गणेशस्य गुणानां तु सहस्रशः। सुयश
यः सुसेनाया मातॄणां मदनस्य च। तस्य जंबूनदी नाम भूजमावेष्ट्य
सा स्थिता। तस्य दक्षिणपार्श्वे च जंबूद्रुमसुशोभनः। अस्मुः स्थितः सुवि
स्तीर्णः सर्वकामफलप्रदः। मेरोः समंताद्विस्तीर्णं शुभं वर्षमिलावृतं।
तत्र जंबुफलाहाराः केचिच्चामृतभोजनाः। जांबूनदसमप्रख्या नानाव
र्णाश्च लिंगिनः। मेरुणापाश्रितो विंध्यद्वीपोयं मध्यमः शुभः। नववर्षान्वि

तस्यैव नदीनदगिरीश्वरैः। नववर्षसहस्रेतु वक्ष्यामी जंबूद्वीपे यथा
तथा।। विस्तरान्मंडलाचैव योजनैस्तन्निबोधमे।। ।।इतिश्रीलिंगेभुव
नकोशे ४ चत्वारिंशोध्यायः।। ।।सूत उ०।। ।।शतमेकंसहस्राणां
योजनानांतु सः स्मृतः। अन्योद्वीपसहस्राणां द्विगुणं द्विगुणोत्तरं। पंचाश
त्कोटिविस्तीर्णसमुद्राधरा स्मृता। द्वीपैश्च सप्तभिश्चैवयुक्तो लोका
वृतः। अत्रानीलस्तथोत्तरे मेरोः श्वेतस्तस्योत्तरे पिच। विप्राः शृंगी मेघव
र्षपर्वताश्चोत्तरे स्थिताः। जठरो देवकूटश्च पूर्वस्यां दिशि संस्थितौ। १४२
निषधो दक्षिणे मेरोस्तस्य दक्षिणतो गिरिः। हेमकूट इति ख्यातो हि
मवांस्तस्य दक्षिणे। मेरोः पश्चिमतश्चैव पर्वतौ द्वौ धराधरौ। माल्यवा
नूगंधमादश्च तावुभौ महदायतौ। एते पर्वतराजानः सिद्धचारणसेविता

तेषामंतरविष्कंभो नवसहस्रमेकशः। इदं हैमवतं वर्षं भारतं नाम
विश्रुतं। हेमकूटपरं तस्मान्नाम्ना किंपुरुषं स्मृतं। नैषधं हेमकूटा
त्तु हरिवर्षं तदुच्यते। हरिवर्षात्परं चैव मेरोः अत्र मिलावृतं। इला
वृतात्परं नीलं रम्यकं नाम विश्रुतं। रम्यात्परतरं ख्यातं विख्यातं तन्न
हिरण्मयं। हिरण्मयात्परं चापी शृंगी चैव कुरुः स्मृतं। धनुः संस्थिति वि
ज्ञेयौ द्वे वर्षे दक्षिणोत्तरे। दीर्घास्तत्र च चत्वारो मध्यमस्तदिलावृतं
मेरोः पश्चिमपूर्वेण द्वौ तु दीर्घतरौ स्मृतौ। अर्वाक् तु निषधस्याथ वे
द्यर्धं दक्षिणं स्मृतं। परं नीलवतो यच्च वेद्यर्धं चोत्तरे स्मृतं। वेद्य
र्धे दक्षिणे त्रीणि वेद्यर्धे त्रीणि चोत्तरे। तयोर्मध्ये तु विज्ञेयं मेरुमध्यमि
लावृतं। दक्षिणेन तु नीलस्य निषधस्योत्तरेण तु। उदगायतो महाशैलो

माल्यवान्नाम नाम[illegible]। योजनानां सहस्रैस्तु रानीलनिषधायतः।
आयामतश्चतुस्त्रिंशत्सहस्राणि प्रकीर्तितः। तथाप्रतीच्यां विज्ञेय
पर्वतो गंधमादनः। आयामतस्तु विस्तारान् माल्यवानिव विश्रुतः। जं
बूद्वीपस्य विस्तारात्समेन तु समंततः। प्रागायतास्सुपर्वाणः षडेते वर्षप
र्वताः। अवगाढाश्चोभयतः समुद्रौ पूर्वपश्चिमौ। हिमप्रायस्तु हिमवा
न् हेमकूटस्तु हेमवान्। तरुणादित्यवर्णाभस्तेजस्वी निषधः स्मृतः।
चतुर्वर्णः ससौवर्णो मेरुश्चोर्ध्वस्तथा स्मृतः। वृत्ताकृतिपरीणाहश्चतुर
स्रः समंततः। नीलश्च वैडूर्यमयः श्वेतः शुक्लो हिरण्मयः। मयूरपत्रव १४२
र्णस्तु शातकौंभस्तु शृंगवान्। एते संक्षेपतः प्रोक्ताः पुनः शृणु गिरि
वरान्। जठरो देवकूटश्च पूर्वस्यां दिशि पर्वतौ। पूर्वपश्चायतावेतौ

अर्णवांतौ व्यवस्थितौ। मर्यादापर्वतानेतानष्टावाहुर्मनीषिणः। यो
सौ मेरुर्द्विजश्रेष्ठाः प्रांशुः कनकपर्वतः। तस्य पादास्तु चत्वारश्च
तुर्दिक्षु नगोत्तमाः। यैर्विष्टब्धा न चलति सप्तद्वीपवती मही। दश
योजनसाहस्रशास्त्रेषु च प्रपद्यते। पूर्वेण मंदरो नाम दक्षिणे गंधमा
दनः। विपुलः पश्चिमे पार्श्वे सुपार्श्वश्चोत्तरे स्मृतः। महावृक्षास्स
मुत्पन्नाश्चतारो द्वीपकेतवः। मंदरस्य गिरेः शृंगे महाद्रुः सुकेतुराट्
प्रलंबशाखः शिखरः प्रलंबश्चैत्यपादपः। दक्षिणस्यापि शै
लस्य शिखरे देवसेवितः। ज्येष्ठम[illegible]पुष्पफलं सदा माल्योप
शोभितः। स केतुर्दक्षिणो द्वीपे जंबूलोके [illegible]तः। विपुलस्यापि
शैलस्य पश्चिमस्य महात्मनः। संजातः शिखरे श्वत्थः सुमहान्वैसपादपः।

सुपार्श्वस्योत्तरश्चा(स्या)पि शृंगे जातो महाद्रुमः। न्यग्रोधो विपुलस्कंधोनेक
योजनमंडलः। तेषां चतुर्णं विक्ष्यामी शैलेंद्राणां यथाक्रमं। अमनुष्य
णि रम्याणि सर्वकालर्तुकानि च मनोहराणि चत्वारि देवक्रीडनकान्य
या। वनानि वै चतुर्दिक्षु नामतस्तन्निबोधत।। पूर्वं चैत्ररथं नाम दक्षि
णे नंदनं वनं। वैभ्राजं पश्चिमे विद्यात् उत्तरं सवितुर्वनं। मित्रेश्वरं
तु पूर्वेण षष्ठेश्वरमतः परं। अष्टेश्वरं पश्चिमे तु उत्तरे चाम्रकेश्वरं
महासरांसि च तथा चत्वारि मुनिपुंगवाः। तत्रात्मानस्तु सुखिनः क्रीडं १४४
ते पर्वतेषु वा। अरुणोदं सरः पूर्वं दक्षिणं मानसं स्मृतं। सितोदं प
श्चिमं सरो महान्भद्रं तथोत्तरं। शाखस्य दक्षिणे क्षेत्रं विशाखस्य तु
पश्चिमे। उत्तरे नैगमेयस्य कुमारस्य च पूर्वतः। अरुणोदस्य पूर्वेण

त्रैजाये नाम तस्मृता। ताश्च संक्षेपतो वक्ष्ये न त्वाक्यं विस्तरेण तु। सि
तांतश्च कुरुंदश्च कुररश्चाचलोत्तमः। विकंको मणिशैलश्च वृक्षवांश्चा
चलोत्तमः। महानीलोथ रुचकः सुबिंदुर्दरस्तथा। वेणुमांश्च सुमे
घश्च निषधो देवपर्वतः। इत्येते पर्वतवरा ह्यन्ये च गिरयस्तथा। पूर्वेण
मंदरस्यैते सिद्धावाससमुदायुताः। एतेषु च गिरींद्रेषु गुहासु च वनेषु च।
रुद्रक्षेत्राणि दिव्यानि विष्णोर्नारायणस्य च। सरसो मानसस्येह दक्षि
णेन महाचलाः। ये कीर्त्यमानास्तान्सर्वान् संक्षिप्य प्रवदामि वः। शैला
स्त्रिशिखरो नाम शिखरश्चाचलोत्तमः। रुचकः सानुमांश्चैव ताम्रकोथ
विशाखवान्। श्वेतोदरः समूलश्च वसुधारश्च रत्नवान्। एकशृंगो म
हाशूलो गजशैलः पिशाचकः। पंचशैलोथ कैलासो हिमवांश्चाचलोत्तमः।

इत्येते देवचरिता उत्कटापर्वतोत्तमाः। तेषुंतेषु च सर्वेषु पत्रे तेषु
वनेषु च। रुद्रक्षेत्राणि दिव्यानि स्थापितानि सुरोत्तमैः। दक्षिणागे दक्षि
णे प्रोक्ता पश्चिमे च वदामि वः। अपरेण सितोदस्य सुपर्श्व महाब
लः। शिखावासस वैडुर्यः सुचक्रः पिंगलस्तथा। पिंजरो यतथा रुद्र
ः सुरसुः कपिलो मधुः। कुमुदो मधुमांश्चैव अंजनः कुर्कटस्तथा।
कृष्णश्च पांडुरश्चैव सहस्रशिखरश्च यः। पारियात्रश्च शैलेंद्र श्रीशृं
गश्चाचलोत्तमः। इत्येते देवचरिता उत्कटापर्वतोत्तमा। सर्वपश्चि
म दिग्भागे रुद्रः क्षेत्र समाश्रिता। महानद्यस्य सरसश्चोत्तरेण म १४५
हाबला। ये स्थिताकीर्त्यमानांस्तान् संक्षेपेण निबोधतः। शंखकूट
महाशैलो वृषभो हंसपर्वतः। नागश्चकपिलश्चैव इंद्रशैलश्च सा

नुमान् नीलः कंकस्वर्णशृंगः पर्वतः श्वेतपर्वतः। पुष्पको मेघ
श्च लश्च विरजश्चाचलोत्तमः। वराहश्च मयूरश्च पर्वतो रुचिरस्त
था। जारुधिश्चैव शैलेंद्र एते उत्तरतः स्थिता। तेषु शैलेषु दिव्ये
षु देवदेवस्य शूलिनः। असंख्यातानि दिव्यानि विमानानि सह
स्रशः। एतेषां शैलमुख्यानां अंतरेषु यथाक्रमं। संति चैवांतरे द्रोण्य
ः सरांसि च वनानि च। वसंति देवा मुनयः सिद्धाश्च शिवभाविता। रु
द्रावासास्सपत्नीकाः प्रसादात्परमेष्ठिनः। लक्ष्म्याद्यानां बल्ववने ककुभे
काश्यपादय। अर्थतालवने प्रोक्तमिंद्रोपेंद्रायतनाम्नवान्। उडुं
बरे कर्दमस्य तथान्येषां महात्मनां। विद्याधराणां सिद्धानां पुण्ये च
म्रवने श्रुतं। नागानां सिद्धसंघानां तथा निंबवने स्थितिः। सूर्यस्य

किंशुकवने तथा रुद्रगणस्य च। बीजपूरवने चैव देवाचार्यो व्यवस्थि
तः। कौमुदे तु वने विष्णुप्रमुखानां महात्मनां। सिद्धानां
स्थलपद्मवने तस्या निग्रोधे शेषभोगिनः। शेषस्त्वनुपजगतां पति
रास्ते निशार्वितः। स एव जगतां कालः पाताले च व्यवस्थितः। विष्णोश्चि
श्वगुरोर्मूर्त्तिर्देवः साक्षाद्धलायुधः। शयनं देवदेवस्य सहरेकं कणत्र
ज्ञो। वने पनसवृक्षाणां शुक्रे सेव्याननाश्रयः। किंकरै रुरगैश्चैव विशा १४६
खाकवनेस्थितः। संतानकस्थलीमध्ये साक्षाद्देवी सरस्वती। एवं संक्षे
पतः प्रोक्ता वनानि वनवासिनः। असंख्याता मया नात्र वक्तुं नैव विस्तरे
ण तु॥ ॥इति श्री लैंगे एकोनपंचाशत्तमोध्यायः॥ ॥सूत उवाच॥
सितांतशिखरे चात्र पारिजातवने शुभे। तस्य प्राच्यां कुमुदादि कूटः सव

...पुर... निदानवानां द्विजोत्तमाः। सुवर्णकोटरे पुन्ये
रा... महात्मनां॥
कु विस्तरे नीलकानां पुराण्यष्टषष्टिरिति द्विजाः। महानीलो
पि शैलेन्द्रे पुराणि दश पंच वा। हयाननानां मुख्यानां किंनराण
णां च सुव्रताः। वेणुसान्के महाशैले विद्याधरपुरत्रयं। वैकुंठे गरु
डः श्रीमान् करंजे नीललोहितः। वसुधारे वसूनां च निवासः परि
कीर्तितः। रत्नधारे गिरिवरे सप्तर्षीणां महात्मनां। सप्ताश्रमाणि पु
ण्यानि सिद्धावासयुतानि च। महाप्रजापतेः स्थानमेकशृंगे नग
गोत्तमे। गजशैले तु दुर्गाया सुमेधे वसवः स्थिताः। आदित्याश्च त
था रुद्रा कृतवासास्तथाश्विनौ। अशीतिर्देवपुर्यस्तु हेमकूटेन गो
मि सुनीले रक्षसां वासाः पंचकोटिशतानि वै। पंचकोटिपुराण्याणां स
प्तकोटिप्रमाणतः। शतशृंगे पुरशतं रक्षसां ममितौजसां। ताम्राभे

कर्द्दमेयस्य त्रिशिखे तु गुहस्य वै। श्वेतोदरे मुनिश्रेष्ठाः सुपर्णस्य
महात्मनः॥ पिशाचके कुबेरस्य हरिकूटे हरेः पुरं। कुमुदे किन्न
रावासस्त्वंजने चारणालयः॥ कृष्णे गंधर्वहावासः पांडुरे पुरसप्त
कं। विद्याधराणां विप्रेंद्रा। विश्वभोगसमान्वितं। सहस्त्रशिखरे शै
ले दैत्यानामुग्रकर्मणां। पुरीणां तु सहस्राणि सप्तशक्रारिणां द्विज।
मुकूटपन्नगावासपुष्पकेतौ मुनीश्वरा। वैवस्वतस्य सोमस्य वायो
र्नागाधिपस्य तु। सुवत्स्यासि चत्रौ लेंद्रा। चत्वार्यायतनानि च। ब्रह्मे १७१
द्रविष्णुरुद्राणां गुहस्य च महात्मनः। कुबेरस्य च सोमस्य तथान्येषां
दिवौकसां। सत्यायतनमुख्यानि मर्यादापर्वतेष्वपि। श्रीकंठं द्रुगुहावा
सि सर्वावासमहोत्रया। श्रीकंठस्यादिमध्ये वै सर्वदेवेश्वरस्य वा। अं

डस्यान्यपुरं तत्र स्त श्रीकंठेन न संशय। अनंतेशादयस्त्वेवं प्रत्येकं
चांडपालकाः। चक्रवर्त्तिन इत्युक्ता ततो विद्येश्वरास्त्विह। श्रीकंठाधि
ष्ठितान्यत्र स्थानानि तु समासतः। मर्यादापर्वतेष्वद्य ष्ट एवं तु प्र
वदाम्यहं। श्रीकंठाधिष्ठितं विश्वं चराचरमिदं द्विजा। कालाग्निशि
वपर्यंतं कथं वक्ष्ये हि विस्तरं॥ ॥इति श्रीमहापुराणे श्रीलैंगे
भुवनकोशवर्णने पंचाशत्तमोध्यायः॥ ॥सूतउ॥ ॥देवकू
टगिरेर्मध्ये महाकूटे सुशोभने। हेमवैडूर्यमाणिक्यनीलगोमेद
कादिभिः तथान्यैर्मणिमुख्यैस्तु निर्मिते निर्मले शुभे। शिखाशत
सहस्राढ्यसर्वद्रुमविभूषिते। चंपकाशोकपुन्नागबकुलासनमं
डिते। पारिजातकसंपूर्णे नानापक्षिगणाकुले। अनेकधातुरैचि

हेमप्राकारसंयुक्तं मणितोरणमंडितं। स्फाटिकैस्तु विचित्रैस्तु गोपुरैश्च समावृतं ५

६ द्रे विचित्रकुसुमोज्ज्वले। नितंबतटमालैर्वै नैकसत्वगुणयुतैः। विमलस्वा
दुपानीयैर्वैकपक्ष्मवणोर्युतैर्दिव्यैरलंविभूषितै। पुष्पोदकं वहान्निश्च श्र
वं निर्झरलंकृतं। स्निग्धवर्णमहामूलमनेकस्कंधपादपं। रम्यं छायावरं लक्ष
यं दशयोजनमंडलं। तत्र भूतवने नाम भूतगणालयं। महादेवस्य दे
वस्य शंकरस्यामितात्मनः। दिव्यमायतनं तत्र हैममणिविभूषितैः। सिंहासनै
र्मणिमयैः शुभ्रास्तरणसंयुतैः। पादपीठयुतैः सम्यक् सर्वेणाधिष्ठितैः शुभै
श्च मालामालाविचितैर्नानावर्णैर्गृहोत्तमैः। मंडपैस्तु विचित्रैस्तु स्फाटिकस्तं १४८
भसंयुतैः। सर्वतः सर्वभूतेन्द्रैः ब्रह्मेन्द्रोपेन्द्रवर्जितैः। वराहगजसिंहर्क्षशा
र्दूलकरभाननैः। गृध्रोलूकमुखैश्चान्यैरजामेषमुखैरपि। प्रमथैर्विवि
धैः स्थूलैर्गिरिकूटोपमैः शुभैः। करालैर्हरिकेशैश्च रोमशैश्च महाभुजै

विमलस्वा
दुपानीये
नैकपक्ष्म
वरोर्युते
९

र्नानावर्णाकृतिधरैः नानासंस्थानसंस्थितैः। दीप्तास्यैर्दीप्तचरितैर्नंदी
श्वरमुखैः शुभैः। ब्रह्मविष्ण्विंद्रसंकाशैरणिमादिसमन्वितैः। त्रश्च सम
मरैर्नित्यं समयार्थपदर्शिभिः। तत्र भूतपते देवाः पूजां नित्यं प्रयुज्यते
झल्लरीशंखपटहैर्भेरीडिंडिमगोमुखैः। तालिनादूरितैर्गीतैर्नृत्यप्रव
र्तितवल्गितैः। सुपूजितो महादेवः प्रमथैः प्रमथेश्वरः। सिद्धर्षिदेवगं
धर्वैर्ब्रह्मणा च महात्मना। इंद्रोपेंद्रमुखैश्चान्यैः पूजितः स्तत्र शंकरः
विप्रकूचाकशिखरं। यत्र तच्छस्य वर्चसः। कैलासो यस्य राजस्य कुवेरस्य
महात्मनः। निवासकोटियक्षाणां तथान्येषां महात्मनां। तत्रापि देवदेव
स्य भवस्यायतनं महत्। तस्मिन्नर्तितयेने सोमः सहास्तिसगणे हरः। जं
बूनदमयैः पत्रैर्गंधपुष्पगुणान्वितैः। नीलवैडूर्यपत्रैश्च गंधोपेतैर्महाबलै
यत्र मंदाकिनी नाम सुरम्या विपुलोदका। सुवर्णमणिसोपाना
कुवेरशिखरे शुभा॥२

THE ASIATIC SOCIETY OF BOMBAY

तथा कुमुदकुंडे स्कंदमहापद्मैरलंकृते॥ यक्षगांधर्वनीरीतीः अप्सरोभि
श्च सेविते। देवदानवगांधर्वैः यक्षराक्षसकिंनरैः॥ उपस्पृष्टजलं पुण्यं
नदीमंदाकिनीश्रितं॥ तस्याश्चोत्तरपार्श्वे तु रुद्रस्यायतनं महत्। वैडूर्य
मणिसंपन्नं तत्रास्ते त्र्यंबकः स्वयं। द्विजाः कनकनंदायास्तीरे वै प्राच्यदक्षि
णे। वनं द्रुमसहस्राढ्यं मृगपक्षिसमाकुलं। तत्रापि सगणः सांबः क्री
डते देवसमेष्टहा। नंदायाः पश्चिमे तीरे किंचिद्वै दक्षिणाश्रिते। पुरं रुद्रपु
रं नाम नानाप्रासादसंकुलं। तत्रापि त्र्यंबकारूलाद्यात्माने चांबिका १८०
तथा। क्रीडते सगणः सांबस्तत्र शतालयमुच्यते। एवं शतसहस्राणि
शिवस्यायतनानि तु। प्रतिद्वीपं मुनिश्रेष्ठाः पर्वतेषु वनेषु च। नदीनदंत
डागानां तीरे पुलिनसेविषु॥ ॥इति श्रीभुवनकोशे एकपंचाशत्तमोऽध्यायः॥

---

सूत उ॥ ॥नद्यश्च बहवः प्रोक्ताः सदा बहुजलाश्रिताः। सुरोवरेस्य संज्ञा
तास्त्वसंख्याता द्विजोत्तमा॥ प्राङ्मुखा दक्षिणस्याश्च चोत्तरः प्रवहाश्च
ता। पश्चिमाग्राः पवित्रास्ताः प्रतिवर्षं स्वकीर्तिता। आकाशगंगो निधेयो
सौ सोम इत्यभिधीयते। आधारः सर्वभूतानां देवानाममृताकरः। त
५ब्रह्म स्मात्स्रोतांस्यपुण्योदा नदीत्वाकाशगामिनी। सततमेतानिलपथे प्रवृ
त्ता चामृतोदका। सा ज्योतिषि निवर्तंती ज्योतिर्गणनिषेविता। तारा
कोटिसहस्राणां नभस्यसमायता। परिवर्तत्यहरहो यथा सोम
स्तथैव सा। चत्वार्यशीतिश्च तथा सहस्राणां समुच्छ्रितो योजनानां गिरि
र्मेरुः श्रीकंठ क्रीडको मतः। तत्रासीनो यतः शर्वः सांबः सह गणेश्वरैः।
क्रीडते सुचिरं कालं तस्मात्पुण्यजला शिवा। गिरेर्मेरु नदी पुण्या साप्र

यातिं प्रदक्षिणा।। विभज्यमानसलिला निजफेनानिलेन च। मेरोरत्त
रकूटेषु निपपात चतुर्दिशं। समंतान्समतिक्रम्य सर्वद्वीपान् प्रविभा
गशः। निर्ययौ देवदेवस्य सा प्रविष्टा महार्णवे। अस्या विनिर्गताः
नद्यः शतशोथ सहस्रशः। सर्वद्वीपादिवर्षेस्तु बहवः परिकीर्त्तिताः।
क्षुद्रनद्यस्त्वसंख्याता गंगायां गां गतो वरां। केतुमाले नराः कालाः
सर्वे पनसभोजनाः। स्त्रियश्चोत्पलवर्णाभा जीवंति चायुतं स्मृतं। भ
द्राश्वे शुक्लवर्णाश्च स्त्रियः श्चंद्रांशुसन्निभाः। कालाम्बुभोजनाः सर्वे १५०
निरातंका रतिप्रियाः। दशवर्षसहस्राणि शतानि दश पंच च। जीवंति
शुक्लाः सर्वे त्रिविध्यानपरायणाः। हैरण्यके महाभागा हिरण्याभोज
नाश्च ते। एकादश सहस्राणि शतानि दश पंच च। वर्षाणां तत्र जीवंति।

।न४

अश्वत्थासनसंस्थिता। हिरण्मयाश्वात्थमीश्वरापितिचेतसः
कुरुवर्षे तु कुरवः सर्वे लोकात्परिच्युताः। सर्वे मिथुनजाताश्च स्त्री रि
णां स्फारिभोजनाः। अन्योन्यमनुरक्ताश्च चक्रवाकसधर्मिणः। अना
मयाह्यशोकाश्च नित्यं सुखैश्चविणः। त्रयोदश सहस्राणि शतानि द
श पंच च। जीवंति ते महावीर्या न चान्यस्त्री निषेविणः। सहैव मरणं
तेषां कुरूणां स्वर्गवासिनां। हृष्टानां सर्वबुद्धानां सर्वतो मृतभोजिनां।
सदानुचंद्रकांतानां सदा यौवनशालिनां। श्यामगानां सदा सर्वे भू
षणास्पददेहिनां। चंद्रद्वीपे च तत्रैव कुरुवर्षेसु नामनः। तंत्र चंद्र
ंशोसौ विमानं चंद्रश्चजिनः। भारते च तथा मत्स्यपि एषा पुण्यवेशा
युषः। नानायुपसमाख्याता नानावर्णस्य देहिनः। नानादेवार्चन

युतानानाकर्मफलार्थिनः। नानाज्ञानार्थसंपन्ना दुर्बलास्त्वसमागि
ना। इंद्रद्वीपे स्थिता केचित् तथैव चकसेरुके। ताम्रद्वीपे गताः केचित्
केचिद्‌ गभस्तिमने। नागद्वीपे तथा सौम्ये गांधर्वे वारुणे गताः। के
चिन्म्लेच्छाः पुलिंदाश्च नानाजातिसमुद्भवाः। पूर्वे किरातास्तस्यांते
पश्चिमे यवनाः स्मृताः। ब्राह्मणाः क्षत्रिया वैश्या मध्ये शूद्राश्च सं
वतः। इज्यायुधवणिज्याभिर्वर्तयंतो व्यवस्थिताः। तेषां संव्यवहा
रोयं वर्तते च परस्परं। धर्मार्थकामसंयुक्तो वर्णानां तु स्वकर्मसु
संकल्पश्चाभिमानश्च आश्रमाणां यथाविधि। इह स्वर्गापवर्गार्थं प्र
वृत्तिर्येषु मानुषी। एतेषां युगधर्माणि नान्यत्र मुनिपुंगवाः। दश व
र्षसहस्राणि स्थितिः किंपुरुषे नृणां। सुवर्णवर्णाश्च नराः स्त्रियश्चाप्स

रसोपमाः। अनामया ह्यशोकाश्च सर्वे ते शिवमाविनां। शुद्धसत्वा
श्च हेमाभाः। सद्दीरं प्लक्षभोजनाः। महारजतसंकाशा हरिवर्षे तु मा
नवाः। देवलोकच्युताः सर्वे देवाकाराश्च सर्वशः। हरिं यजंति वि
श्वेशं पिबंतीक्षुरसं नवं। न जरा बाधते तत्र न चेंद्रग्रहतारकाः। प
द्मपत्रायतमुखाः पद्मपत्रेक्षणाः शुभाः। पद्मपत्रसुगंधाश्च जायं
ते च वनाविताः। जंबूफलरसाहाराः अनिष्यंदाः सुगंधिनः। देवलो
कच्युतास्तत्र जायंते ह्यजरामराः। त्रयोदश सहस्राणि वर्षाणां ते
नरोत्तमाः। आयुःप्रमाणं जीवंति वर्षे दिव्ये त्विलावृते। जंबूफलरसं
पीत्वा न जरा बाधते त्विमान्। न क्षुधा न क्लमश्चापि न मृत्युर्न च तद्विधि
तत्र जांबूनदं नाम कनकं देवभूषणं। इंद्रगोपकसंकाशं जायते भास्व

रंतु तं तं। एवं मया समाख्यातं नववर्षानुवर्त्तिनी। वर्णेष्वुत्तेजना
द्येष संक्षिप्य चन विस्तरां तं। हेमकूटे तु गंधर्वा विज्ञेयाः साप्सरोगणाः
सर्वे नागास्तु निषधे शेषवासुकितक्षकाः। महाबलास्त्रयस्त्रिंशत्स्वर्गिणे
याज्ञियास्तु रा। नीले तु वैडूर्यमये सिद्धब्रह्मर्षयोमलाः। दैत्यानां दानवा
नां तु श्वेतपर्वत उच्यते। श्रृंगवान् परतश्चैव पितॄणां निलयः श्रुतः।
हिमवान् यक्षमुख्यानां भूतानामीश्वरः स्मृतः। सर्वाद्रिषु महादेवो
हरिणा ब्राह्मणो वयाः। नंदिनाथगणैः सार्धं वर्षेष्वनुवनेश्वराः। नी १५२
लश्चैव त्रिशृंगोच नगवान्नीललोहितः। सिद्धैर्दैत्यैश्च पितृभिः दृष्टो
नित्यं विशेषतः। नीलस्तु वैडूर्यमयः श्वेतः शुक्लो हिरण्मयः। मयूरब
र्हवर्णश्च शातकुंभस्त्रिश्रृंगवान्। एते पर्वतराजानो जंबुद्वीपे व्यवस्थिताः

दि२

।। ।।इति श्रीजैगे भुवनकोशे द्विपंचाशत्तमोध्यायः।। ।।सूत।।
प्लक्षद्वीपादिद्वीपेषु सप्त सप्त सुपर्वताः। ऋज्वायताः प्रतिदिशं निवि
ष्टा वर्षपर्वताः। प्लक्षद्वीपे तु वक्ष्यामि सप्त द्वीपान् महाचलान्। गो
मेदकोत्र प्रथमो द्वितीयश्चांद्र उच्यते। तृतीयो नारदो नाम तुरी
यो दुंदुभिस्मृतः। पंचमः सोमको नाम सुमहान् षष्ठ उच्यते। सऋष
भः प्रोक्तो वैभ्राजः सप्तमः स्मृतः। सप्तैते गिरयः प्रोक्ताः प्लक्षद्वीपे
विशेषतः। सप्तैव शाल्मलीद्वीपे तान्वै संक्षेपतो वदे तं। कुमुदश्चोन्न
तः श्वेतपर्वतश्च बलाहकः। द्रोणः कंकस्तु महिषः ककुद्मान् सप्तमः स्मृ
तः। कुशद्वीपे तु सप्तैव द्वीपाश्च कुलपर्वताः। नाश्च संक्षेपतो वक्ष्ये
नाममात्रेण वै क्रमात्। विद्रुमः प्रथमः प्रोक्तो द्वितीयो मेघपर्वतः। तृती

यो द्रुतिमांन्नाम चतुर्थः पुष्पवान् स्मृतः। कुशेशयः पंचमस्तु ष
ष्ठो हरिगिरिस्मृतः। सप्तमो मंदरः श्रीमान् महादेवनिकेतनः। मं
दा इति ह्यपान्नाम मंदरो दारुणो दयः। तत्र साक्षान्महादेवो विशो
को विमलः शिवः। सोमः सनंदी भगवान् आस्ते हेमगृहोत्तमे। तपस
तोषितः पूर्वं मंदरेण महेश्वरः। अविमुक्ते महाक्षेत्रे ते ते स परमं व
रं। प्रार्थितश्च महादेवो निवासार्थं सहांबिका। सनंदी सगणः स
मस्तेनासौ तेन मुच्यति। क्रौंचद्वीपे तु सप्तैते क्रौंचाद्याः कुलपर्वताः १५३
क्रौंचो वामनकः पश्चात् तृतीयश्चांधकारकः। अंधकारात्परश्चापी
दिवावृन्नाम पर्वतः। दिवावृत्परश्चापी विविंदो गिरिरुत्तमः। ते विविं
दात्परतश्चापी प्रोक्तमनेदुंदुभिः स्वरः। एते रत्नमयाः सप्त क्रौंचद्वीपस्य पर्वताः।

शाकद्वीपे च गिरयः सप्त तान् प्रवदामि वः। उदयो रैवतश्चैव श्या
मको मुनिसत्तमाः। राजतश्च गिरिः श्रीमान् आंबिकेयः सुशोभनः।
आंबिकेयात्परो रम्यः सर्वौषधिसमन्वितः। तथैवं केसरी शक्तो
यतो वायुः प्रवर्तति। पुष्करे पर्वतः श्रीमान् एक एव महाशिलः। चि
त्रोमणिमयैः कूटैः शिलाजालसमुछ्रितैः। द्वीपस्य तस्य पूर्वार्द्धे चि
त्रसानुस्थितो महान्। परिमंडलसहस्राणि विस्तीर्णः पंचविस्तर
त्तः। ऊर्ध्वं चैव चतुस्त्रिंशत् सहस्राणि महागिरिः। द्वीपार्धस्य परिच्छि
त्तः पर्वतो मानसोत्तरः। स्थितो वेलासमीपे तु अर्धचंद्र इवोदितः।
योजनानां सहस्राणि ऊर्ध्वं पंचाशदुत्थिता। तावदेव तु विस्तीर्ण
पर्वतः परिमंडलः। स एव द्वीपसार्द्धेन मानसः पृथिवीधरः। ए

विस्ताराद्द्विगुणश्चैव पुष्करस्य समेन तु॥ एवं द्वीपाः समुद्रैस्तु सप्त सप्तभि
रावृताः॥५

क एवमहत्तानुः संनिवेशो द्विधा कृतः। स्वादूदकेनोदधिना सर्वतः प
रिवारितः। पुष्करद्वीपविस्ताराद्विस्तीर्णो सो समंततः। तस्मिन्द्वीपे
स्मृतो धौ तु पुण्यौ जनपदौ शुभौ। अपरौ मानसस्तस्य पर्वतः स्या
न्मंडलौ। महावीतं तु यद्वर्षं बाह्यतो मानसस्य तत्। तस्माद्बाह्ये त
रं तत्तु धातकीखंडमुच्यते। स्वादूदकेनोदधिना सर्वतः परिवारितः।
द्वीपस्यानंतरे यस्तु समुद्रस्तम स्तु वै। एवं द्वीपसमुद्राणां वृद्धि
र्ज्ञेयाः परस्परं। परेण पुष्करस्याथ स्वादूदस्तास्थितो महान्। स्वादू १५४
दकं समुद्रं तु समंतात्परिवेष्य च। परेण दृश्यते तत्र लोकालोक
स्य संस्थितिः। कांचनी द्विगुणा भूमिः सर्वा चैकशिलोपमा। तस्याः परे
ण शैलस्तु मर्यादा चानुमंडलः। प्रकाशश्चाप्रकाशश्च लोकालोकः समु

श्री

च्यते। लोकालोको गिरिर्यावत्तावद्वै धारादिजाः। योजनानां सहस्रा
णि दशार्धे स्योच्छयः स्मृतः। तावा विस्तारस्तस्य लोकालोकस्य हा
गिरेः। अर्वाचीने तु तस्यार्धे चरंति रविरश्मयः। परं नीतेतु मोनि
त्यं लोकालोकस्तु तस्मृतः। एषां संक्षेपतः प्रोक्तो भूर्लोकस्य च वि
स्तरः। आगानो वै ध्रुवस्तस्तु मर्यादा चानुमंडलः। आध्रुवान्मुनि
सत्तमा। आवाहाद्यानि धिष्ण्यानि वायोर्वै सप्त नेमयः। आवहः
प्रवहश्चैव ततः श्चानुवहस्तथा। संवाहो विवहश्चाथ ततश्चोर्ध्वं
परावहः। द्विजाः परिवहश्चैव वायोर्वै सप्तमेमयः। बलाहकास्त
थाग्नातु श्वं ज्योतिः चक्रराशयः। ग्रहाणि ऋषयः सप्त ध्रुवा विश्वाक्र
मादिह। योजनानां महीपृष्ठादूर्ध्वं पंचदश ध्रुवः। नियुतान्येकनि

श्रुतौ नृपध्रुवान्तु मण्डलो रथः षोडशसाहस्रो भास्करस्याप्यथोपरि।
चतुराशीतिसाहस्रो मेरुश्चोपरि भूतलात्। कोटियोजनमात्रम्प
महर्लोकि ध्रुवान् ध्रुवान्ः। जनलोको महर्लोकात्तथा कोटिद्वये स्मृतः
जनलोकात्तपोलोकश्चतस्रः कोटियोजनैः। प्राजापत्यो ब्रह्मलोकः
कोटिषट्कं विसृज्यते। पुण्यलोकानि सप्तैतेत्वण्डेस्मिन्काथितानि वै।
अधः सप्ततलानां तु नरकाणां द्विकोटयः। मायान्तश्चैव घोराद्याश्चष्ट
विंशतिरेव च। पापिनस्तासु पच्यन्ते स्वकर्मस्यानुरूपतः। अवीच्यन्ता १५५
नि सर्वाणि रौरवाद्यानि तासु च। प्रत्येकं पंचतान्याहुः ग्रन्थे विशेष
तः। अण्डमादौ मया प्रोक्तमण्डस्यावरणानि च। यहिरण्यगर्भस्य सर्व
स्यात्रीर्ध्वमूर्ध्वमधःस्थिताः। अण्डेष्वेतेषु सर्वेषु भुवनानि चतुर्दश। प्रत्ये
प्रसंगाद्दकं विस्तरं। अण्डानामीदृशानां च कोट्यो ज्ञेया सहस्रशः। सर्वगत्वात्प्रधानस्य

उद्भिजस्वेदजास्तेषां हेतुर्महेश्वरः। अण्डेषु चोर्ध्वाधस्तात्तथावरणे
षु वा। तमोन्ते च तमः पारे चाष्टमूर्त्तिर्भवः स्थितः। तस्यात्मनो महेशस्य
महादेवस्य धीमतः। अदेहिनस्त्वहो देहमखिलं परमात्मनः। अस्या
ष्टमूर्त्तेः शर्वस्य शिवस्याष्टहमेधिनः। गृहिणी प्रकृतिर्दिव्या प्रजाश्च मा
हदादयः। पशवः किंकरास्तस्य सर्वदेहाभिपातिनः। आद्यन्तहीनो
भगवान्नेतः पुमान् प्रधानं पुरुषाश्च सप्त। प्रधानमूर्त्तिस्त्विथ षोड
शांगो महेश्वरश्चाष्टतनुः स एव। आज्ञाबलात्तस्य धरास्थितेह धरा
धराः सप्त तथा समुद्राः। ज्योतिर्गणाश्च क्रमुखाः सुराश्च वैमानिकाः स्था
वरजंगमाश्च। दृष्ट्वा यज्ञे लदृणे हीनमीशं दृष्ट्वा सुरेन्द्रास्ते किमेन त्विदे
ति। यज्ञं गत्वा नि श्रियात्पावकाद्याः शक्तिहीनाश्च भवन्त्यतो वि।

दग्धुं तृणं चापि समस्तमस्य पवनस्य वह्निर्न शशाक विप्राः वायुस्तृ
णं चालयितुं तथान्ये स्वान् स्वान् प्रभावान् सकलामरेन्द्राः मध्य दास्व
यंत्र त्रिदशैः सुरेन्द्रैः सुरेश्वरः सर्वसमृद्धिहेतुः। सुरेश्वरं यक्षमुवा
च कोऽसवानित्यसितुं कौतुहलान्वो। तदाल्पदृष्टेः गत एव यक्षस्ता
मे विलोक्य हैमवती श्रुता ध्याः। इमाश्च ये राजरणे रनेकैः सुवर्णामा
नान्वलुचाविरासीन्। तां शक्रमुख्या बहुशोभमानामुमामजोऽहैः म
वतीमपृच्छन्। किमेतदीशे बहुशोभमाने कोवाविकेयक्षव पुष्टकोवा
निषण्णतेसौवचनं विजानु त्रगोचराश्चेति सुराः सशक्राः। प्रणम्य हन्नामि 
ह राजमानामुमामजालोहितशुक्लकृष्णां। संजाविनासा सकलामरेन्द्रैः
सर्गप्रवृत्तिस्तु सुरासुराणां। ज्योतिर्गणानां प्रकृतिश्च पुंसां यक्षस्य वा



दक्षिणेनानु पुत्रस्य वरुणस्य वरुणालो। सोमे सोमस्य विपुला तासु दिग्देवता स्थिताः॥ ६
ज्ञावत्रा। मेत्यथाहुः तस्माद्विजाः सर्वमजस्य तस्य नियोगतश्चोऽ
मप्रृदजाद्य। अजस्तथोऽडादखिलं च तस्मात् ज्योतिर्गणो लोकमजा
त्मकं ते॥ ॥ इति भुवनकोशे त्रिपंचाशत्तमोऽध्यायः॥ ५३ ॥ सूत उवाच॥
ज्योतिर्गणप्रचारं च संक्षिप्य ब्रवीम्यहं। देवं हेमगिरि चालोक्य य
ह चार प्रसिद्ध योमानसोपरि माहे। द्रीप्राम्यां मेरोः पुरीस्थिताः॥
अमरावती संयमनी सुखा चैव विभावरी। लोकपालोपरिष्टात्तु सर्व
तो दक्षिणायने। काष्ठागतस्य सूर्यस्य गतिर्यासां निबोधतः। दक्षि
णे चक्रमेनाशुः क्षिप्तेषुरिव गच्छति। ज्योतिषां चक्रमादाय सततं प
रगच्छति। पूर्वीतिगो यदा सोतुः शक्रस्य भवति प्रभुः। सर्वेषां यमनैर्ऋत
दृश्यन्निवदृश्यते। सवैव सुखवस्यां तु नित्यं तस्य प्रदृश्यते। अस्तमे

त्ति पुनः सूर्यो विज्ञायो विषुद्धक प्रभुः । मया प्रोक्तो मयाद्वैतो यथासे
वारितस्करः । तथास्तं यमनी प्राप्य सुखां चैव विभावरी । यथापरा
क्रस्त्वात्तेयां पूर्वाक्कै नैकृते द्विजा । तदा त्वपररात्रं तु वायुना गमु
दारुणं । ईशासां पूर्वरात्रं तु मुहूर्तेनैव गच्छति । योजनाग्रा मुहूर्तस्य
इमां संख्यां निबोधतः । पूर्णं शतसहस्राणामेकत्रिंशत्तु सा स्मृता
पंचाशच्च तथान्यानि सहस्राण्यधिकानि च । मुहूर्तिकी गतिर्ह्येषा
भास्करस्य महात्मनः । एतेन गतियोगेन यदा काष्ठां तु दक्षिणां प २५९
र्यगच्छत्तते गोसौ मानसस्योत्तमे हनि । मध्येन पुष्करस्याथ भ्रमते द
क्षिणायने । मानसोत्तरशैलेतु महातेजा विभावसुः । मंडलानां तु
पूर्वेत्राक्षिप्त स्यधिकं विभुः । बाह्यं वास्य नरं प्रोक्तं चोत्तरायनदक्षिणे

प्रत्यहं चरते तानि सूर्यो वै मंडलक्रमात् । कुलालचक्रपर्यन्तो य
था शीघ्रं निवर्त्तते । दक्षिणोपक्रमे देवस्तथा शीघ्रं निवर्त्तते । तस्मा
त्प्रकृष्टां भूमिं तु कालेनाल्पेन गच्छति । सूर्यो द्वादशभिः शीघ्रं मुहूर्तै
र्दक्षिणायने । त्रयोदशार्धमृक्षाणामह्नातु चरते रविः । मुहूर्तैस्ता
वदृक्षाणि नक्तमष्टादशैश्चरन् । कुलालचक्रमध्यस्थो यथा मं
दं प्रसर्प्पति । तथोदगयने सूर्यः सर्पते मंदविक्रमः । तस्माद्दीर्घेण
कालेन भूमिस्वल्पां सगच्छति । सरथो भगवान्भानुः आदित्ये मु
निभिः स्तुतः । गंधर्वैरप्सरोभिश्च ग्रामणी सर्प राक्षसैः । प्रदीपयन्
सहस्रांशुरयतः पृष्ठतोप्यधः । ऊर्ध्वं तस्तुकरं मक्तासत्रां ब्राह्मीमनु
तमां । अंतेभिर्मुनिभिस्सक्तैः संध्यार्थंतुं शाचरसन् । निहत्य शात्रवान्सर्व

स्थानं ब्राह्मणोऽश्वस्ततो रविः। अष्टादशमुहूर्तानि तत्रायनपश्चिमो
ऽहर्भवति तत्रापि चरते मंदविक्रमः। त्रयोदशार्धमृक्षाणां नक्षत्रा
दशानां रविर्मुहूर्तैस्तावद्भ्रमणं दिव्याष्टादशाभिश्चरान्। ततो मंद
तरं नाभ्यां चक्रं भवति वै यथा। मृत्पिंड इव मध्यस्थो ध्रुवो भवति वै तदा
चै १ त्रिंशन्मुहूर्तान् निर्बाकुरहोरात्रे ध्रुवात् भ्रमन्। उभयोः काष्ठयोर्मध्ये भ्रा
मयन्मंडलानि तु। कुलालचक्रनाभिस्तु यथा तत्रैव वर्तते। ध्रुवस्तथा
हि विज्ञेयस्तत्रैव परिवर्तते। भ्रमतानया दोन्नमते ग्रहः सार्धं ग्रहा यणी। १५८
गुणो मुनिर्ज्योतिषां तु मनसा तस्य सर्पति। अधिष्ठितेन पुनस्तेन तां तु स्वा
र्दयति ष्ठति। किरणैः सर्वनस्तोयं देवो वै स समीरणः। उत्तानपादस्य
तदा ध्रुवत्वं वै प्रसादतः। विष्णोस्तु तानपादिस्स सत्वात्तस्य हुतुनाः। अप्ये

पीतास्तु सूर्येण संक्रमात् वेदमंडले। निशाकरात्रिश्रवते जीमूतेष
त्पयं पुनः। वृद्धिं जलमुचां चैव सर्वस्मिन्नेनाभिता दिता। अपां तु ष्टि वि
सृजंति भासो दत्ते च भास्करः। तोयस्य नास्ति वै नाशस्तदेव परिवर्त
ते। हिताय सर्वजंतूनां गतिं सर्वेण निर्मिता। सूर्यस्तु वस्तु तथा ह्यापो ह्यन्नं
चामृतमेव च। प्राणा वै जगतामापो भूतानि भुवनानि च। बहुनात्र कि
मुक्तेन चराचरमिदं जगत्। आपः शिवश्च भगवान् अधिपस्ते शिवः स्थि
तः। अपो त्वधिपतिर्देवो रुद्र इत्यवकीर्तितः। भवात्मकं जगत्सर्वं इति
किं चेदं चाद्भुतं। नारायणत्वे देवस्य हरेश्चाद्भि विना प्रभो जगतामाद्य
यो विष्णुस्त्वापस्तस्यालयानतु। दंदह्यमानेषु चराचरेषु गो धूमभूता
स्त्वपि निष्क्रमंति। या सर्वं तस्मात् तु हुताश्च नेषु विभावसोस्तास्त्व पश्चाग्निनाच।

अथ धूमाग्निवातानां संयोगः स्वभ्र उच्यते। निरीणी चात्र ततः सेतिश्र
त्रस्यैव व्रातकृतुः। यज्ञधूमोद्भवं श्वासं द्विजानां हितकृद्दशा। दावा
ग्नी धूमसंभूतमभ्रं वनहितं स्मृतं। मृतधूमोद्भवं चाभ्रमशुभाय
न विष्येति। अभिचाराग्निधूमोत्थं भूतनाशाय वै द्विजा। एवं धूमविशे
षेण जायन्ते वै हिताहिता। तस्माद्दाच्छादयेद्धूममभिचारकृतेन रः।
अनाच्छाद्य द्विजः कुर्यात्तयश्चाभिचारिकं। एकमुद्दिश्य लोकस्य कृ
यकृद्दैव विष्यति। अपां निदानं जीमूताः पञ्चमं। निहसुव्रताः। व
र्षत्येवं हि जगतां हि तथापवनाख्या। स्तत्त्रि तेचै सला हवाग्न कंवे १५९
कृतपावकोद्भवं त्रिधा तेषामिहोत्पत्तिरन्त्राणमुनिपुंगवा। नेत्रस्यं निहि
यतोऽन्नापि मे हनान्मेघ उच्यते। कृत्स्नवत्मछ्विरेरस्यात्मद्वाच्वैवेष्टथाग्विधान्

रु

।आद्यानां काष्टसंयोगाद्दग्धे धूमप्रवर्तनात्। द्वितीयानां च संभूतिर्वि
रं चोष्णासवायु[illegible]ना। भूभृतां त्वथ पक्षैस्तु मघवच्छेदितैस्ततः। वक्रो
यास्त्वथ जीमूता आवाहस्थानगास्ततः। विरं चोष्णाः प्रजाः सर्वे प्रवह
स्कंधगास्ततः। मूकाः सशब्दास्ते चैव तेस्तु कृत्स्नयश्चाकमे। अस्य वृ
ष्टिप्रदा दीर्घकालं सीतसमीरिणा। जीमूताश्च तथा हीणा विद्युध्व
जविवर्जिता। तिष्ठंत्या क्रोशमात्रे तु पराभृष्टाइतस्ततः। अर्द्धक्रो
शे च ते सर्वे जीमूताश्चैव वासिनः। मेघा योजनमात्राश्च साध्पराह्
यतोयदा। पराभृष्टा द्विजाः सृष्टास्ते विद्युद्गुणसंयुता। तेषां हि द्वाष्टे
सर्गश्च त्रिधा कथितमात्रतु। पक्षजाः कल्पजाः सर्वे पर्वतानां महत्तया।
कल्पांतेष्वेव वर्षति रात्रौ नार्थयनीरदा। यदा पुष्करलाद्यास्तु वर्षति

जलदा जले। तदार्णवमभूत्सर्वं तत्र शेते निशीश्वरः॥ आगमयातं तु
२सा स्वांशेनां पङ्कजानां द्विजर्षभाः। जलदानां सदा भूमौ ह्याप्यायनं इति स्मृ
तः। पोष्ठं तु कृष्ठयः सर्वे वैद्युताः शीतसस्यदाः पुष्ठदेवोतु पतितानाग
नाशीकरा हिमाः। गंगाबांगं तु संभूताः पर्जन्येन परावहेः। नगानां चै
व नागानां द्विजातीनां समाकुलेः। मेघानां चाप्यकन्दूतो जलायजल
दादयः। परावहो यः स श्वसनो मनयस्यधिकं गुरो। मेनापतिमितं क
म्य वृष्टिशेषं द्विजा परं। अस्येति वार्तेवर्षे क्रमाद्वनो विवृद्धये। सस्य १६०
द यस्य संक्षेपात् प्रब्रवीमि यथामति। स्त्रष्टा तानुर्महातेजा वृष्टेनां वि
श्वसृग्विधातुः। सोपि साक्षाद्विजः श्रेष्ठा ईशानः परमः शिवः। स एव तेज
स्वी जस्क बले विप्रा यशस्वये। चक्षुःश्रोत्रं मनो मन्युरात्मा मनुर्विदि

ग्दिशः। मत्स्यो मृत्युस्तथा वायुराकाशाखे रवचरश्च सः। लोकपाला
हरिर्ब्रह्मा रुद्रसाक्षान्महेश्वरः। सहस्रकिरणश्रीमान् नष्टहस्त
सुमंगलः। अर्धनारीवपुः साक्षात्त्रिनेत्रस्त्रिदशाधिपः। अस्यैवेह प्र
सादात्तु वृष्टिर्नाम नवे द्विजा। सहस्रगुणमुत्स्रष्टुमादत्ते किरणैर्ज
लं। जलस्य नाशो वृद्धिर्वा नास्त्येवात्र विचारतः। ध्रुवेणाधिष्ठितो
वायुर्वृष्टिं संहरते पुनः। ग्रहान्निःसृत्य सूर्याच्च कृत्स्ने नक्षत्रमंडले
चारस्यांते विशत्यर्कं ध्रुवेण समधिष्ठिता॥ ॥इति लैंगे मेघनिर्णये
चतुःपंचाशत्तमोध्यायः॥ ॥सूतउ०॥ ॥सौरं संक्षिप्यवो वक्ष्ये र
थं शशिन एव च। ग्रहाणामितरेषां च यथा गच्छति वांबुप। सौरस्तु ब्रह्म
णा सृष्टो रथस्त्वर्थवशेन तु। संवत्सरस्यावयवैः कल्पितश्च द्विजर्षभाः।

त्रिनाभिना तु चक्रेण पंचारेण समन्वितः। सौवर्णः सर्वदेवानामावा-
सो भास्करस्य तु। नवयोजनसाहस्रो विस्तारायामतः स्मृतः। द्विगुणो
स्य रथोपस्थादीशादंडप्रमाणतः। स सेगोक्त हयैर्युक्तो यतः शक्रेन त-
तस्थितैः। वाजिनस्तस्य वै सप्त छंदोभिर्निर्मितास्तु ते। चक्रपक्षे निब-
द्धास्तु ध्रुवे चाक्षः समर्पितः। सहाश्वचक्रो भ्रमते सहाक्षो भ्रमते ध्रुव- दे.५
अक्षस्सूतैकचक्रेण भ्रमते सो ध्रुवेरितः। प्रेरको ज्योतिषां श्रीमान् ध्रु-
वे चैवांतरश्मिभिः। युगाक्षकोटिसंबद्धौ रश्मी स्यंदनस्य तु। युगाक्ष-
वातोर्मि कोटिस्तस्य दक्षिणस्यंदनस्य तु। ध्रुवेण प्रगृहीते वै प्रवक्ताश्वेन १६१
रज्जुवत्। भ्रमंतमनुगाछंत ध्रुवं रश्मियुतावुभौ। युगाक्षकोटिस्तस्य
वातोर्मिस्यंदनस्य तु। कीलासक्ता यथा रज्जुर्भ्रमते सर्वतो दिशं। भ्रमतः

पं ४ ध्रुवेण भ्रमिता रश्मिनिबद्धाश्च युगाक्षयोः।
भ्रमतो मंडलानि स्युः खेचरस्य रथस्य तु।

स्तस्य रश्मी तु मंडलेषूत्तरायणे। वर्धते दक्षिणे चैव भ्रमतो मंडला-
नि तु। अशीतिमंडलनूतं काष्ठयोरुभयोत्तरं। ध्रुवेण मुच्यमाना-
भ्यां रश्मिभ्यां पुनरेव च। तथैव बाह्यतः सूर्यो भ्रमते मंडलानि तु।
आकृष्येते यदा ते वै ध्रुवेणाधिष्ठिते तदा। सोघत्र सरथः सूर्यो भ्र-
मते मंडलानि तु। उद्वेष्टने सवेगेन मंडलानि तु गछति। देवाश्चैव व-
था नित्यं मुनयश्च दिवानिशं। यजंति सततं देवं भास्करं भुवनेश्वरं।
सरथोधिष्ठितो दैवीरादित्यैर्मुनिभिस्तथा। गंधर्वैरप्सरोभिश्च ग्रा-
मणी सर्पराक्षसैः। एते वसंति वै सूर्ये द्वौ द्वौ मासौ क्रमेण तु। आप्या-
ययंति चादित्यं तेजोभिर्भास्करं त्रिवा। ग्रंथितैस्तैर्वचोभिस्तु स्तुवंति
मुनयो रविं। गंधर्वाप्सरसश्चैव नृत्यगेयैरुपासते। ग्रामणीयक्षभूता

दि२

तानिं कुर्वतेनीश संग्रहे। रथं वहंति वै सर्पा यातुधानानि यांति चाथ वा
जितिस्थानं यंत्य स्तं पारिवार्या द्रयादवि। इत्येते वै वसंती हि द्वौ द्वौ मासौ
दिवाकरा। मधुश्च माधवश्चैव शुक्रश्च शुचिरेव च। नभो नभस्यो
विषेजाईश ऊर्जस्तथैव च। सहः सहस्यश्च तथा तपस्यश्च तपःपु
नः। एते द्वादश मासाश्च वर्षस्यान्मानुषे द्विजा। वसंतिकस्तथा ग्रीष्म
श्च नो वै वार्षिकास्ततः। शारदाख्या हिमश्चैव शिशिरश्च ततः स्मृतः।
धाताऽर्यमाथ मित्रश्च वरुणश्चेंद्र एव च। विवस्वांश्चैव पर्जन्यः पूषा च। १६२
भगान्स्तिमान्। त्वष्टा विष्णुपुलस्त्यश्च पुलहश्चाडिरेव चावत्रिष्ठः
श्चांगिराश्चैव भृगुर्बुद्धिमतांवरः। नारद्वाजो गौतमश्च कश्यपश्च प्रजा
पतिः। जमदग्नी कौशिकश्च वासुकी कंकणीकरः। तक्षकश्च तथा नेनः

एलापत्रस्तथा द्विजाः शंखपालस्तथा चान्य ऐरावत इति स्मृतः। ध
नंजयो महापद्मस्तथा कर्कोटकः स्मृतः। कंबलोऽश्वतरश्चैव तुं
बुरुर्नारदः स्तथा। हाहा हूहू मुनिश्रेष्ठा विश्वावसुरुत्तमः। उग्रसे
नो वसुरुचिरर्वावसुपरावसु चित्रसेनो महातेजा ऊर्णायुश्चैव सुव्र
तः। धृतराष्ट्रः सूर्यवर्चा वीसा ह्याक्रतुस्थलाः। श्रजाननाश्च नाश्च एणी
द्रिमा सापुंजिकस्थला। मेनका सहजन्या च प्रम्लोची च शुचिस्मिता। अ
नुम्लोचा घृताची च विश्वाची चोर्वशी श्रुता। पूर्वचित्तिरिति ख्याता देवी
सा ह्या त्रिलोत्तमा। रंभा चांभोजनयना रथकृद्ग्रामणीश्च ता। रथौजा
रथचित्रश्च सुबाहुर्वै रथस्वनः। वरुणश्च तथैवान्यः सुषेणः सेनजि
श्च नः। तार्क्ष्यश्चारिष्टनेमिश्च रथजित्सत्यजित्तथा। रक्षोहेतिः प्रहेतिश्च

पौरुषेयोवधस्तथा।सर्पोव्याघ्रःपुनश्चापोवातोविद्युद्दिवाकरः।ब्र
ह्मापेतश्चविप्रेंद्रोयज्ञोपेतस्तथैवच।एतेदेवादयःसर्वेवसंत्यर्केक्र
मेणतु।स्थानानिमानिनोद्दिष्टेतेगणाद्वादशसप्तकाः।धात्रादिविष्णुप
र्यंतादेवाद्वादशकीर्त्तिताः।आदित्यपंचमंत्रांनुत्रानिराप्यायैययेति
चपुलस्त्याद्याःकौशिकांतामुनयोमुनिसत्तमाः।क्रतुस्थलाद्यारं
भांतादिव्याश्चाप्सरसोरविं।तोडवैःसरसैःसर्वाश्चोपासंतेयथाक्र
मं।रथिमासत्यजिद्देताश्चग्रामण्योरथकृन्मुखाः।द्वादशाप्यक्रमेणै
वकुर्वंतेत्रीषुसंग्रहे।प्रयांतियज्ञोपेतांतारक्षोहेतिमुखासदा।सा १६३
धाद्वादशैवेतराक्षसास्तुयथाक्रमं।धातार्यमापुलस्त्यश्चपुलहश्च
प्रजापतिः।उरगोवासुकीश्चैवकंबलाश्वतरावुभौ।तुंबरुनारदश्चैव

गंधर्वौगायतांवरौ।कृतस्थलाप्सराश्चैवतथान्यापुंजिकस्थला
ग्रामणीरथकृच्चैवरथौजाश्चैवतावुभौ।रक्षोहेतिप्रहेतिश्चयातु
धानाबुदाहृतौ।मधुमाधवयोरेषगणोवसतिभास्करे।वसंतग्री
ष्मकौमासौमित्रश्चवरुणश्चसः।ऋषिरत्रिर्वसिष्ठश्चतक्षकोनागए
वच।मेनकासहजन्याचगंधर्वौहाहाहूहूः।रथस्वनश्चग्रामण्यो
रथमित्रश्चतावुभौ।पौरुषेयोवधश्चैवयातुधानावुदाहृतौ।एते
वसंतिवैसूर्येमासयोःशुचिशुक्रयोः।ततःसूर्येपुनस्त्वन्यानिवसं
तीहदेवताः।इंद्रश्चैवविवस्वांश्चअंगिराभृगुरेवच।एलापत्रःस्तथा
सर्पःशंखपालश्चतावुभौ।विश्वावसूग्रसेनौचमानश्चवारुणस्तथा
प्रम्लोचाचेतिविख्यातात्रनुम्लोचाचतेउभे।यातुधानस्तथासर्पोव्याघ्र

सुरुचीः साषरा वसुः ॥ ऋताची चाप्सरश्रेष्ठा विश्वाची चातिरोऽतनो । सुषेण जिष्णुः सुखेणश्च र

श्चैवा तु नावुभौ । नभो नभस्ययोरेष गणो वसति भास्करे । पर्जन्यश्चैव
पूषा च भरद्वाजोथ गौतमः । धनंजय इरावांश्च सेनानीग्रामणी च तौ । अ
पोवाचश्च द्वावेतौ यातुधानावुभौ स्मृतौ । वसंत्येते तु वै सूर्ये मासमूर्ज
इषे च ह । हेमंतिको द्वौ मासौ च वसंते च दिवाकरे । अंशो भगश्च द्वावे
तौ कश्यपश्च क्रतुश्च ह । भुजगश्च महासर्पः सर्पः कर्कोटकस्तथा ।
चित्रसेनश्च गंधर्वः पूर्णायुश्चैव तावुभौ । उर्वशी पूर्वचित्तिश्च तथैवाप्स
रसावुभौ । तार्क्ष्यश्चारिष्टनेमिश्च सेनानीग्रामणी च तौ । विद्युत्सूर्यश्च १६४
तावुग्रौ यातुधानावुदाहृतौ । सहसीव सहस्ये च वसंत्येते दिवाकरे ।
ततः शैशिरयोश्चापि मासयोर्निवसंति वै । त्वष्टा विष्णुर्जमदग्निर्विश्वामि
त्रस्तथैव च । तिलोत्तमाप्सरश्चैव देवी रंभा मनोरमा । रथजित्सत्यजिच्चैव

ग्रामण्यौ लोकविश्रुतौ । ब्रह्मोपेतस्तथा रक्षो यज्ञोपेतश्च यः स्मृतः ।
एते देवा वसंत्यर्के द्वौ द्वौ मासौ क्रमेण तु । स्थानाभिमानिनो ह्येते गग
णाद्वादश सप्तकाः । सूर्यमाप्याययंत्येते तेजसा तेजउत्तमं । ग्रंथितै
स्वैर्वचोभिस्तु स्तुवंति मुनयो रविं । गंधर्वाप्सरसश्चैव नृत्यगेयैरु
पासते । ग्रामणी यक्षभूतानि कुर्वते भिषुसंग्रहं । सर्पाः वहंति वै सू
र्यं यातुधानानुयांति च । बालखिल्या नयंत्यस्तं परिवार्योदयाद्रविं
एतेषामेव देवानां यथावीर्यं यथा तपः । यथा योगं यथा सत्वं यथा
धर्मं यथा बलं । यथा तपत्यसौ सूर्यस्तेषामिद्धस्तु तेजसा । इत्येत
वै वसंती हि द्वौ द्वौ मासौ दिवाकरे । गंधर्वऋषयो देवाः पन्नगाप्स
रसां वराः । ग्रामण्यश्च तथा विप्रा यातुधानाश्च मुख्यतः । एते तपंति

वर्षतिभातिवातिसृजतिच।भूतानामशुभंकर्मव्यपोहतीहकीर्तिता
मानवानांशुभंह्येतेहरंतिदुरितात्मनां।दुरितंसुप्रचाराणांव्यपोहं
तिक्वचित्२।विमानेचस्थितैर्दिव्येकामगेवातरंहसि।एतेसहैवसू
र्येणभ्रमंतिदिवसानुगाः।वर्षंतश्चतपंतश्चह्लादयंतश्चवैद्विजाः।गो
पायंतीहभूतानिसर्वाणीहामनुक्षयात्।स्थानाभिमानिनांह्येतेस्था
नमन्वंतरेष्वैतेषु।अतीतानागतानांचवर्त्तंतेसांप्रतंचये।एतेनक्रमे
णकथिताःसप्तकावैचतुर्दश।एतेवसंतिवैसूर्येसप्तकास्तेचतुर्दश। १६५
चतुर्दशसुसर्वेषुगणामन्वंतरेष्विह।संक्षेपाद्विस्तराच्चैवयथावृत्तं
यथाश्रुतं।कथितंमुनिशार्दूलदेवदेवस्यधीमतः।इत्येषएकचक्रेण
सूर्यस्तूर्णंरथेनतु।हरितैरक्षरैरश्वैःसर्पतेसौदिवाकरः।अहोरा

त्रंरथेनासावेकचक्रेणतुभ्रमन्।सप्तद्वीपसमुद्रांतांसप्तभिःसप्तभि
र्दिवि॥ ॥इतिश्रीलैंगेभुवनकोशेपंचपंचाशोध्यायः॥ ॥सूतउ०
वीथ्याश्रयाणिचरतिनक्षत्राणिनिशाकरः।त्रिचक्रोभयतोश्वश्चवि
ज्ञेयस्तस्यवैरथः।शतारैश्चत्रिभिश्चक्रैर्युक्तःशुक्लैर्हयोत्तमैः।दश
भिस्त्वकृशैर्दिव्यैरसंगैस्तैर्मनोजवैः।रथेनानेनदेवैश्चपितृभिश्चै
वगच्छति।सोमोह्यंबुमयैर्गोभिःशुक्लैःशुक्लगभस्तिमान्।सोमश्च
शुक्लपक्षादौभास्करोपरिसंस्थितः।आपूर्यतेपरस्यांतःसततंदि
वसःक्रमात्।देवैःपीतंक्षयेसोममाप्याययतिनित्यदा।पीतंपंच
दशाहंतुरश्मिनैकेनभास्करः।आपूर्यतेपरस्यांतःसततंदिवसः
क्रमात्।देवैःपीतंक्षयेसोममाप्याययतिनित्यदा।पीतंपंचदशाहंतु

रश्मिना भास्करेणेत्थं आपूरयन् सुषुम्णेन भागं भागमहःक्रमात्।
इत्येवं सूर्यवीर्येण चेन्दस्याप्यायिता तनुः। पौर्णमास्यां स दृश्येत शुक्ल
संपूर्णमंडलः। एवमाप्यायितं सोमं शुक्लपक्षे दिनक्रमात्। ततो द्विती
याप्रभृति बहुलस्य चतुर्दशीं। पिबंत्यंबुमयं देवा मधु सौम्यं सुधामयं
संभृतं त्वर्धमासेन अमृतं सूर्यतेजसा। पानार्थममृतं सोमं पौर्णमास्या
मुपासते। एकरात्रिं सुरैः सर्वैः पितृभिस्त्वृषिभिः सह। सोमस्य कृष्णप
क्षादौ भास्कराभिमुखस्य च। प्रक्षीयंते परस्पात्तः पीयमानकलाः क्र १६६
मात्। त्रयः त्रिंशच्छता चैव त्रयस्त्रिंशत्तथैव च। त्रयः त्रिंशः सहस्रार्थं दे
वाः सोमं पिबंति वै। एवं दिनक्रमात्पीते विबुधैस्तु निशाकरे। पीत्वार्धमा
सं गच्छंति अमावास्यां निशाकरं। ततः पंचदशे भागे किंचिच्छिष्टे कलात्म-

पितरश्चोपतिष्ठंति अमावास्यां निशाकरे।

के। अपराह्णे पितृगणाः पान्तु चैनमुपासते। पिबंति द्विजवं कालं शि
ष्टा तस्य कला तु याः। निःसृतं तदमावास्यां गभस्तिभिः स्वधामृतं। मास
तृप्तिमवाप्यास्यां पीत्वा गच्छंति ते मृतं। पितृभिः पीयमानस्य पंचदश्यां
कला तु यः। यावन्न क्षीयते तस्य भागः पंचदशस्तु सः। अमावास्यां त
दा तस्यां अन्तरा सूर्यते परः। वृद्धिक्षयौ वै पक्षादौ षोडश्यां शशिनः स्मृतौ।
एवं सूर्यनिमित्तैषा क्षयवृद्धिर्निशाकरे॥ ॥इति॰ सोमरथकथने
नामषड्वाचाशोऽध्यायः॥ ॥सूत उ०॥ ॥अष्टाभिस्तु हयैर्युक्तः
सोमपुत्रस्य वै रथः। वारितेजोमयैश्चाथ सुपिशंगैः सुभ्रो भनेः। अष्टा
१ श्वा श्वसैरपि भौमस्यैव स्य रथो हैमः सुशोभनः। जीवस्य हैमश्चाष्टाश्वो सद
स्याशनि निर्मितः। रथस्तापोमयैश्चाश्वै रष्टाभिस्तु सितैतरैः। स्वर्भा

नोर्नीस्करा नश्च तथा चाष्टौ इत्य स्मृतः। सर्वे ध्रुवनिबद्धा वै ग्रहा
स्ते वातरश्मिभिः॥ तथैते भ्राम्यमाणास्तु यथायोगं भ्रमन्ति वै। यावन्त्यश्चै
व ताराश्च तावन्तो वातरश्मयः। सर्वे ध्रुवनिबद्धाश्च भ्रमन्तो भ्रामयन्ति
तं। भ्रमन्तश्चक्रवद्यान्ति वातचक्रेरितास्तु। यस्माद्वहति वै ज्योति.
प्रवहस्तेन स स्मृतः। नक्षत्रसूर्यः प्रमुखा ग्रहास्तारागणैः सह। उन्मु
खाभिमुखाः सर्वे चक्रभूताश्रिता दिवि। ध्रुवेणाधिष्ठिताश्चैव ध्रुवमेव प्र
दक्षिणं प्रयान्ति चेश्वरं द्रष्टुं मेढीभूतं दिवि। नवयोजनसाहस्रो विष्कं
भः सवितुः स्मृतः। त्रिगुणस्तस्य विस्तारो मंडलस्य प्रमाणतः। द्विगुणः सूर्य १६७
विस्ताराद्विस्तारः शशिनः स्मृतः। तुल्यस्तयोस्तु स्वर्भानुर्भूत्वाधस्तात्प्रस
र्पति। उद्धृत्य पृथिवीछायां निर्मितो मंडलाकृतिः। स्वर्भानोस्तु बृह

छानं तृतीयं यत्तमोमयं। चंद्रस्य षोडशो भागो भार्गवस्य विधीयते
विष्कंभान्मंडलाच्चैव योजनाग्रात्प्रमाणतः। भार्गवात्पादहीनस्तु
विज्ञेयो वै बृहस्पतिः। बृहस्पतेः पादहीनौ वक्रसौरावुभौ स्मृतौ
विस्तारान्मंडलाच्चैव पादहीनस्तयोर्बुधः। तारानक्षत्ररूपाणि ही
नानि तु परस्परात् शतानि पंचचत्वारि वपुष्मंति ह यानि वै। बुधे
न समरूपाणि विस्तारान्मंडलात्तथा। प्रायशश्चंद्रयोगीनि विद्या
दृक्षाणि तत्त्ववित्। तारानक्षत्ररूपाणि हीनानि तु परस्परात्। श
तानि पंच चत्वारि त्रीणि द्वे चैव योजने। सर्वोपरि निकृष्टानि तारका
मंडलानि तु। योजनार्ध्यमात्राणि तेभ्यो ह्रस्वं न विद्यते। उपरिष्टात्त्र
यस्तेषां ग्रहा ये दूरसर्पिणः। सौरोंगिराश्च वक्रश्च ज्ञेया मंदविचारिणः

तस्योधस्तास्स्थिताश्चैव पुनरन्ये महाग्रहाः। सूर्यः सोमो बुधश्चैव भार्ग-
वश्चैव शीघ्रगाः। तावंतस्तारकाकोट्यो यावदृक्षाणि सर्वशः। ध्रुवे चाभिनि-
यमाद्वैषां रूढमार्गेष्ववस्थितिः। गतिश्चांते च सूर्यस्य नीचोच्चत्वमनु-
क्रमात्। उत्तरायनमार्गस्थो यथा पर्वसु चंद्रमाः। उच्चत्वात् दृश्यते शीघ्रं
नातिव्यक्तैर्गभस्तिभिः। तदा दक्षिणमार्गस्थो नीचां वीथीमुपाश्रितः। भूमि-
लेखावृतः सूर्यः पूर्णिमावास्ययोस्तथा। दृश्यते च यथाकालं शीघ्रमस्तमु-
पैति वा। तस्मादुत्तरमार्गस्थो यदा चरति रश्मिवान्। सर्वग्रहाणां सः सूर्य- १६८
स्तस्याधस्तात्प्रसर्पति। विस्तीर्णमंडलं कृत्वा तस्योर्ध्वं चरते शशी। नक्ष-
त्रमंडलं कृत्स्नं मासादूर्ध्वं प्रसर्पति। नक्षत्रेभ्यो बुधश्चोर्ध्वं बुधश्चोर्ध्वं तु
भार्गवः। भार्गवाच्चोर्ध्वं वक्रस्तु वक्रादूर्ध्वं बृहस्पतिः। तस्मात् शनैश्चरश्चो-

र्ध्वं तस्मात्सप्तर्षिमंडलं। ऋषीणां चैव सप्तानां ध्रुवश्चोर्ध्वं व्यवस्थितः।
ते विष्णुलोकं परमं ज्ञात्वा मुच्यंति किल्बिषात्। द्विगुणेषु सहस्रेषु
योजनानां शतेषु च। ताराग्रहांतराणि स्युरुपरिष्टात् यथाक्रमं।
ग्रहाश्च चंद्रसूर्यौ च दिवि दिव्येन तेजसा। नित्यमृक्षेषु युज्यंते गच्छंतो
नियमात्क्रमात्। ग्रहनक्षत्रसूर्यास्ते नीचवक्रजवास्थितान्। समागा-
मे च भेदे च पश्यंति युगपत्प्रजाः। परस्परस्थिता ह्येते युज्यंते च पर-
स्परं। असंकरेण विज्ञेयस्तेषां योगस्तु वै बुधैः। एवं संक्षिप्य कथि-
तो ग्रहाणां गमनं द्विजाः। भास्करप्रमुखानां तु यथा दृष्टं यथाश्रुतं।
ग्रहाधिपत्ये भगवान् ब्रह्मणा पद्मयोनिना। अभिषिक्तः सहस्रांशु-
वश्चिण तु यथा ग्रहः। तस्मात् ग्रहार्चना कार्या अग्नौ चार्घ्य यथाविधि।

आदित्यग्रहपीडायां सद्भिः सर्वार्थसिद्धये ॥ ॥इति श्रीलैंगेतु पंन
कोशे सप्तपंचाशोध्यायः ॥ ॥ऋषय ऊ० ॥ ॥अभिषिच्य कथं ब्रह्मा
चाधिपत्ये प्रजापतिः। देवदैत्यमुखान् सर्वान् ततस्तत्सांप्रतं वद ॥ ॥
सूत उ० ॥ ॥सर्वाधिपत्ये भगवानभिषिच्य दिवाकरं। ग्रहाणामोषधी
नां च सोमं ब्रह्मा प्रजापतिः। अपां च वरुणं देवं धनानां यक्षपुंगवं। आ
दित्यानां तथा विष्णुं वसूनां पावकं तथा। दक्षं प्रजापतीनां च मरुतां शं
कर एव च। दैत्यानां दानवानां च प्रह्लादं दैत्यसत्तमं। यमं पितॄणामधि १६९
पं निर्ऋतिं पिशिताशिनां। रुद्रं पशूनां भूतानां नंदीनां गणनायकं।
वीराणां वीरभद्रं च पिशाचानां भयंकरं। मातॄणां चैव चामुंडां सर्वलोक
नमस्कृतां। रुद्राणां देवदेवेशं नीललोहितमीश्वरं। विघ्नानां व्योम

जं देवं गजास्यं तु विनायकं। स्त्रीणां देवीमुमां देवीं वचसां वै सरस्व
तीं। विष्णुमायां विनां चैव आत्मानं जगतां तथा। हिमाद्रिं गिरीणां
च नदीनां चैव जाह्नवीं। समुद्राणां च सर्वेषामधिपं पयसां निधिं। वृ
क्षाणां चैव चाश्वत्थं प्लक्षं च प्रपितामहः। गंधर्वविद्याधरकिंनराणा
मीशं पुनश्चित्ररथं चकार। नागाधिपं वासुकिमुग्रवीर्यं सर्पाधिपं तक्ष
कमभ्यषिंचत्। दिग्वारणानामधिपं चकार नागेंद्रमैरावतनामधे
यं। सुपर्णमीशं पततामथाश्वराजानमुच्चैःश्रवसं चकार। सिंहं मृगा
णामधिपं गवां च मृगाधिपानां सरसं चकार। सेनाधिपानां गुहमप्र
मेयं श्रुतिस्मृतीनां कुलशीलमीशं। अभ्यषिंचत्सुधर्माणं यथा शास्त्र
पदे दिशां। केतुमंतं क्रमेणैव हेमरोमाणमेव च। ह्यमोद्दृष्टमीशानं

सर्वेषां तु महेश्वरः। चतुर्मूर्त्तिषु सर्वज्ञं शंकरं वृषभध्वजं। प्रसादात्त
गवान् शंभुश्चाभिषिंचत् यथाक्रमं। पुराभिषिच्य धर्मात्मा न राज
न्तो तथा द्विजाः। एतद्वै विस्तरेणैव कथितं मुनिपुंगवाः। अभिषेकं
ततस्तेन विशिष्टा विष्णुयोनिषु। ॥ इति श्रीमहापुराणे श्रीजैगीषु
वनकोशे ज्योतिश्चक्रनिर्णये अष्टपंचाशीतोऽध्यायः॥
एतत् श्रुत्वा तु मुनयः पुनस्ते संशयान्विताः। पप्रच्छुरुत्तरं भूयः स्त १७०
दा ते रोमहर्षणं। ॥ ऋषय ऊचुः॥ यदेतदुक्तं भवता आख्यानेता
नि तु श्रुतं। कथं देवग्रहाणि स्युः कथं ज्योतींषि वर्णय। एतत् स तत्त्वम
चक्ष्व ज्योतिषां चैव निश्चयं। श्रुत्वा तु वचनं तेषां तदा सूतः समाहि
तः। उवाच परमं वाक्यं तेषां संशयनिर्णयं॥ अस्मिन्नर्थे महाप्राज्ञैर्यदु

सूत उ०

---

क्तं ज्ञानबुद्धिभिः। एतद्वोहं प्रवक्ष्यामि सूर्यचंद्रमसोद्भवं। यथादे
वगृहाणीह सूर्यचंद्रग्रहाः स्मृताः। अतः परं तु त्रिविधमग्नेर्वक्ष्ये समु
द्भवं। दिव्यस्य भौतिकस्याग्नेरथोग्नेः पार्थिवस्य तु। व्युष्टायां तु रज
न्यां वै ब्रह्मणोऽव्यक्तजन्मनः। अव्याकृतमिदं त्वासीन्नैशेन तमसा वृतं।
चतुर्भूतावशिष्टेस्मिन् लोके नष्टे विशेषणे। स्वयंभूर्भगवांस्तत्र लो
कतत्त्वार्थसाधकः। खद्योतवत् संप्रचरन् द्वाविर्भावचिकीर्षया। सोग्नि
सृष्ट्वाथ लोकादौ पृथिवीजलसंश्रितः। संहृत्य तत्प्रकाशार्थं त्रिधाक
रजदीश्वरः। पचनो यस्तु लोकेस्मिन् पार्थिवः सोग्निरुच्यते। यश्चा
सौ तपते सूर्ये शुचिरग्निस्तु सः स्मृतः। वैद्युतोग्निस्तु विज्ञेयस्तेषां वक्ष्ये
ऽथ लक्षणं। वैद्युतो जाठरः सौरोऽम्भोगर्भास्त्रयोग्नयः। तस्मादपः पिबन् सूर्यो

गोऽग्निर्दीप्यत्यसौ दिवि वै ह्यतोऽत्र समाविष्टो अद्भिरग्निः प्रकाशय
ति। भौमनवानां चैव स्थं रश्मिश्च परिशष्यत्यति। अर्चिष्मान् पवनः
सोऽग्निर्निष्प्रभो जावरः स्मृतः। यश्चायं मण्डली शुक्लो निरूष्मा संप्रजा
यते। प्रभा सौरी तु पादेन ह्यस्तं याति दिवाकरे। अग्निमाविषते रात्रौ
तस्मात् दूरात् प्रकाशते। उद्यतं च पुनः सूर्यं पादमाग्नेयमाविशत्
पादेन पार्थिवस्याग्नेस्तस्माद्ग्निस्तपत्यसौ। प्राकाश्यं च तथौष्ण्यं
च सौराग्नेये तु तेजसी। परस्परानुप्रवेशादाप्यायेते परस्परं। उत्त १४।
रे चैव भूम्यर्द्धे तथा ह्यग्निश्च दक्षिणे। उत्तिष्ठति पुनः सूर्ये रात्रिराविष
तेत्वयः। तस्मात्ताम्रा भवन्त्यापो दिवा रात्रिप्रवेशनात्। अस्तं याति पुनः
सूर्ये अहर्वै प्रविशत्यपः। तस्मान्नक्तं पुनः शुक्ला आपो दृश्यन्ति भास्करा

एतेन क्रमयोगेन तस्यार्द्धे दक्षिणोत्तरे। उदयास्तमने नित्यमहो
रात्रे विशत्यपः। यश्चासौ तपते सूर्यः पिबन्नम्भो गभस्तिभिः। पार्थि
वाग्निविमिश्रोऽसौ दिव्यः शुचिरिति स्मृतः। सहस्रपादसौ वह्निर्वृ
त्तः कुंभनिभः शुचिः। आदत्ते स तु नाडीनां सहस्रेण समन्ततः। स्याव
राजंगमाश्चैव याश्च कुल्यादिकास्तथा। तस्य रश्मीसहस्रं तु शीतव
र्षोष्णनिस्रवं। तासां चतुःशता नाड्यो वर्षन्ते चित्रमूर्त्तयः। गणनाश्चै
व मध्येऽस्य केतना याततनास्तथा। अमृता नामतः सर्वा रश्मयो वृ
ष्टिसर्जनाः। हिमोद्वाहाश्च ता नाड्यो रश्मयस्त्रिशता पुनः। रसा मेध्या
श्च वाह्यश्चक्रा दिव्या हिमसर्जनाः। चोदास्ता नामतः सर्वाः पीता भारूक
गजस्तयः। शुक्लाश्च कुभाश्चैव गावो विश्वभृतस्तथा। शुक्लास्ताभि

मतः सर्वाः स्त्रिदशानां धर्मसर्जनाः। समं विभज्यताभिस्तु मनुष्यान्पितॄन्
देवता। मनुष्यानौषधैर्नैह स्वधया चापि तृन्नपि। अमृतेन सुरान्
सर्वान् त्रिस्त्रिभिस्तर्पयत्प्रभो। वसंते चैव ग्रीष्मे च शतैः शतपतेत्रि
भिः। वर्षास्वथो शरदि च चतुर्भिः संप्रकाशति। हेमंते शिशिरे चैव हि
मसुत्सृजते त्रिभिः। इंद्रो धाता भगः पूषा मित्रोथ वरुणोर्यमा। अंशु
र्विवस्वांस्त्वष्टा च सविता विष्णुरेव च। वरुणो माघमासे तु सूर्यः पू
षा च फाल्गुने। चैत्रमासि भवेदंशो धाता वैशाखतापनः। ज्येष्ठमा १४२
से भवेदिंद्र आषाढे सविता रविः। विवस्वान् श्रावणे मासि प्रोष्ठभ
से भगः स्मृतः। पर्जन्योश्वयुजे मासि त्वष्टा वै कार्तिके रविः। मार्गशीर्षे
भवेन्मित्रः पौषे विष्णुः सनातनः। पंचरश्मिसहस्राणि वरुणस्यार्कक

स२

र्मणी। षड्भिः सहस्रैः पूषा तु देवोंशः सप्तभिस्तथा। धाताष्टभिः स
हस्रैस्तु नवभिस्तु शतक्रतुः। सविता दशभिर्याति यात्येकादशभि
र्भगः। सप्तभिस्तपते मित्रः त्वष्टा चैवाष्टभिस्तपेत्। अर्यमा दश
भिर्याति पर्जन्यो नवभिस्तपेत्। षड्भी रश्मिसहस्रैस्तु विष्णुस्तपति
मेदिनीं। वसंते कपिलः सूर्यो ग्रीष्मे कांचनसप्रभः। श्वेतवर्णस्तु
वर्षायां पांडुः शरदि भास्करः। हेमंते ताम्रवर्णश्च शिशिरे लोहितो
रविः। इति वर्णसमाख्याताः सूर्यस्यर्तुसमुद्भवाः। औषधीषु बलं
धत्ते स्वधया च पितृन्नपि। सूर्योमरेष्वमृतं तत्र यत्त्रिषु नियच्छति।
एवं करसहस्रं तु सौरं लोकार्थसाधकं। भिद्यते कृत्यमासाद्य जल
नशीजशीतोष्णनिःस्रवं। इत्येतन्मंडलं शुक्लं भास्करं सूर्यसंज्ञितं।

नक्षत्राधिपतिः सोमो नयने वाममेव च। नयने च परे दिव्ये दक्षिणे भास्कर
स्त्वयं। तेषां जनानां लोकेस्मिन् नयने नयनेयतः॥ ॥इति महापुराणे जै
मि. ज्योतिश्चक्रनिर्णये एकोनषष्टितमोध्यायः॥ ॥सूत उ॥ ॥शेषाः पं
चग्रहास्तेयाई श्वराः कामचारिणः। पठ्यते चाग्निरादित्यो ह्युदकं चंद्रमाः
स्मृतः। शेषाणां प्रकृतिः सम्यक् वर्ण्यमानां निबोधत। सुरसेनापतिः स्कंदः
पठ्यतेंगारको ग्रहः। नारायणं बुधं प्राहुर्देवज्ञानविदो बुधाः। सर्वलोकप्र
भुः साक्षाद्यमो लोकप्रभुः स्वयं। महाग्रहो द्विजः श्रेष्ठो मंदगामी शनैश्चरः १९३
देवासुरगुरौ यौ तु भानुमंतौ महाग्रहौ। प्रजापतिसुतावेतौ उभौ शुक्र
बृहस्पती। आदित्यमूलमखिलं त्रैलोक्यं नात्र संशयः। भवत्यस्माज्जग
कृत्स्नं सदेवासुरमानुषं। रुद्रेंद्रोपेंद्रचंद्राणां विप्रेंद्राग्निदिवौकसां। द्युति

द्युतिमतां कृत्स्नं यत्तेजः सार्वलौकिकं। सर्वात्मा सर्वलोकेशो महादेवः प्र
जापतिः। सूर्य एव त्रिलोकस्य मूलं परमदैवतं। सर्वात्मा सर्वलोकेशो म
हादेवः प्रजापतिः। सूर्य एव त्रिलोकस्य मूलं परमदैवतं। ततः संजा
यते सर्वं तत्रैव च प्रलीयते। भावाभावौ हि जगतः आदित्यान्निःसृतौ
पुरा। तु विज्ञेयं ग्रहो विप्रा दीप्तिमान्भास्करः प्रभुः। तत्र गच्छंति निधनं
जायंते च पुनः पुनः। क्षणाः मुहूर्ता दिवसाः निशाः पक्षाश्च कृत्स्नशः।
मासाः संवत्सराश्चैव ऋतवोथ युगानि च। आदित्योद्धि रते ह्येषां लोक
संख्या न विद्यते। कालाद्दृते न नियमो न दीक्षा नाह्निकः क्रमः। ऋतूना
मपि भागश्च पुष्पं मूलं फलं कुतः। कुतः सस्यविनिष्पत्तिस्तृणौषधिग
णो पि वा। अभावो व्यवहाराणां जंतूनां दिवि चेह च। जगत्प्रतापनमृते

स्करं संध्य रूपिणं। स एष कालश्चाग्निश्च द्वादशात्मा प्रजापतिः। तपते स प्र
द्विजाः श्रेष्ठास्त्रैलोक्यं सचराचरं। स एष तेजसां राशिः समस्तः सर्वलौकिकः॥
उत्तमं मार्गं समास्थाय रात्र्याहोभिरिदं जगत्। पार्श्वतोर्ध्वमधश्चैव तापयत्ये
ष सर्वशः॥ यथा प्रभाकरो दीपो गृहमध्ये विलंबितः। पार्श्वतोर्ध्वमधश्चैव त
मो नाशयते समं। तद्वत्सहस्रकिरणो ग्रहराजो जगत्पतिः। सूर्यो गोभिर्ज
गत्सर्वमादीपयति सर्वशः॥ रवे रश्मिसहस्रं यत् प्राङ् मया समुदाहृतं। तेषां
श्रेष्ठाः पुनः सप्त रश्मयो ग्रहयोनयः॥ सुषुम्नो हरिकेशश्च विश्वकर्मा तथै १७४
व च। विश्वव्यचाः पुनश्चान्यः संयद्वसुरतः परः॥ अर्वावसुः पुनश्चान्यः स्व
राट् चैव प्रकीर्तितः॥ सुषुम्नः सूर्यरश्मिस्तु दक्षिणः शशिमेधयेत्। तिर्य
गूर्ध्वचरः सो वै सुषुम्नः परिकीर्त्यते। हरिकेशः पुरस्ताद्यः ऋक्षयोनिः

स कीर्त्यते। दक्षिणो विश्वकर्मा तु रश्मिर्वर्धयते बुधं। विश्वव्यचा
स्तु यः पश्चात् शुक्रयोनिः स्मृतो बुधैः। संयद्वसुश्च यो रश्मिः स योनि
र्लोहितस्य तु। षष्ठस्त्वर्वावसू रश्मिर्योनिस्तु स बृहस्पतेः। शनैश्चरं पु
नश्चापि रश्मिराप्याययेत् स्वराट्। एवं सूर्यप्रभावेन ग्रहनक्षत्रतारकाः
वर्द्धन्ते दिवि ताः सर्वा विश्वं वेदं पुनर्जगत्। न क्षीयन्ते नतस्तानि तस्मान्
नक्षत्रता स्मृता॥ ॥ इति भुवनकोशे ग्रहताराविवरणे षष्ठितमोध्यायः
॥ ॥ सूत उ॥ ॥ क्षेत्राण्येतानि वै पूर्वमातपन्ति गभस्तिभिः। तेषां क्षेत्रा
ण्यथादत्ते सूर्यो नक्षत्रता ततः॥ तीर्णानां सुकृतेनेह सुकृतान्ते ग्रहा
श्रयः। ताराणां तारका ह्येताः शुक्लत्वाच्चैव तारकाः। दिव्यानां पार्थिवानां
च नैशानां चैव सर्वशः॥ आदानान्नित्यमादित्यस्तेजसां तमसामपि।

सवनेस्पंदनेर्थं च धातुरेवं विधीयते । सवनात्तेजसापां च तेनासौ सवि
ता मतः । बह्वर्थश्चंद्र इत्येष ह्लादने धातुरिष्यते । शुक्लत्वे चामृतत्वे च
सर्वविश्वे विनाश्यते । सूर्याचंद्रमसोर्दिव्ये मंडले भास्वरे वरे । ज्वलत्ते
जोमये शुक्ले वृत्तकुंभनिभे शुभे । वह्नितोयात्मके तत्र मंडले त्वाश्रिताः
स्मृतो घनस्तेजोमयं शुक्लं मंडलं भास्करस्य तु । विज्ञाति सर्वदेवास्त
स्थानान्येतानि सर्वशः । मन्वंतरेषु सर्वेषु ऋक्षसूर्यग्रहाश्रयाः । ताभि
र्देवगृहाण्येव तदाख्यास्ते भवंति हि ॥ सौरं सूर्यो विशत्स्थानं सौम्यं सो १५
मस्तथैव च । शुक्रं शुक्रो विशत्स्थानं षोडशार्चिः प्रतापवान् । बृहस्प
तिर्बार्हस्पत्यं लोहितं चैव लोहितः । शानैश्चरं तथा स्थानं देवश्चापि श
नैश्चरः । बौधं तु बुधानुस्वर्भानुः स्वर्भानुस्थानमाश्रितः । नक्षत्राणि च स

र्वाणि नक्षत्रस्थानमाविशत् । गृहाण्येतानि सर्वाणि ज्योतींषी
सुकृतात्मनां । कल्पादौ संप्रवृत्तानि निर्मितानि स्वयंभुवा । स्थाना
न्येतानि तिष्ठंति यावदाभूतसंप्लवं । मन्वंतरेषु सर्वेषु देवस्थाना
नि तानि वै । अभिमानिनो भवंति तिष्ठंति दश स्थानात्पुनः । अतीतैस्त
महासीनाअनागतैः सुरैः सदा वर्त्तंते वर्त्तमानैश्च स्थानिभि
१५म स्ते सुरैः सह । अस्मिंस्तरे चैव ग्रहवैमानिकः स्मृतः । विवस्वानदि
यों ४ तिपुत्रः सूर्यो वैवस्वतोंतरे । त्विषिमान् धर्मपुत्रश्च सोमो देवो वसु
स्मृतः । शुक्रो देवस्तु विज्ञेयो भार्गवोसुरयाजकः । बृहत्तेजाः स्मृतो
देवो देवाचार्योंगिरःसुतः । बुधो मनोहरश्चैव ऋषिपुत्रस्तु सस्मृतः । शनै
श्वरो विरूपस्तु संज्ञापुत्रो विवस्वतः । अग्निर्विकेश्यां यज्ञे तु युवासौ लोहिता

स्मृ॰

ऋषयः। नक्षत्राग्रहनामि निस्सो दाक्षायेण्यः सुताः स्मृताः। स्वर्भानुः सिंहिका
पुत्रो भूतसंतापनो सुरः। सोमार्कग्रहऋक्षेषु कीर्तिता ह्यभिमानि
नः। स्थानान्येतान्यथोक्तानि स्थानिनश्चैव देवताः। शुक्लमग्निमयं स्था
नं सहस्रांशोर्विवस्वतः। सहस्रांशुं मृषस्थाने मे नाय शुक्लमेव च।
आप्यं शाम्यमनोज्ञस्य पंचरश्मिर्गृहस्मृतः। शुक्रस्याप्यमयं शुक्लं
पद्मषोडशरश्मिमत्। नवरश्मी तु पूर्वोपि लोहितस्थानमुत्तमं। हे
रिद्राण्यं वृहच्चापी षोडशार्चिर्बृहस्पतेः। अष्टरश्मिर्गृहप्रोक्तं कृष्णं कृ १७६
ष्णस्य वाह्वयं। स्वर्भानोस्तामसं स्थानं भूतसंतापनालयं। विज्ञेयास्ता
रकाः सर्वास्त्वप्मयास्त्वेकरश्मयः। आश्रयाः पुण्यकीर्तीनां शुक्लाः स्युस्तु श्वा॰२
वर्णतः। घनतोयात्मिका ज्ञेयाः कल्पादावेव निर्मिताः। आदित्यरश्मिसं

---

योगात् संप्रकाशात्मकाः स्मृताः। नवयोजनसाहस्रो विष्कंभः सवि
तुः स्मृतः। नवयोजनसाहस्रो विष्कंभस्य विधुः स्मृतः। त्रिगुणस्तस्य
विस्तारो मंडलस्य प्रमाणतः। द्विगुणस्तस्य विस्तारेण तु विस्तारः शशि
नः स्मृतः। तुल्यस्तयोस्तु स्वर्भानुर्भूत्वाधस्तात्प्रसर्पति। उद्धृत्य पृथि
वीच्छायां निर्मितां मंडलाकृतिं। स्वर्भानोस्तु बृहत्स्थानं तृतीयं यत्त
मोमयं। आदित्यात्तु विनिष्क्रम्य सोमं गच्छति पर्वसु। आदित्यमेति
सोमाच्च पुनः सौरेषु पर्वसु। स्वर्भासा नुदते यस्मात्स्वर्भानु
रुच्यते। चंद्रस्य षोडशो भागो भार्गवस्य विधीयते। विष्कंभान्मंडला
च्चैव योजनाग्रात्प्रमाणतः। भार्गवात्पादहीनस्तु विज्ञेयो वै बृहस्पति
ः। बृहस्पतेः पादहीनौ वक्रसौरावुभौ स्मृतौ। विस्तारान्मंडलाच्चैव पा

दहीनस्ततो बुधः। तारानक्षत्ररूपाणि वपुष्मन्तीह यानि वै। बुधेन सम
मतुल्यानि। विस्तारान्मण्डलाच्च वै। प्रायशश्चन्द्रयोगीनि विद्यादृक्षाणि
तत्त्ववित्। तारानक्षत्ररूपाणि हीनानि तु परस्परात्। शतानि पंच चत्वारि
त्रीणि द्वे चैव योजने। सर्वावरनिकृष्टानि तारकामण्डलानि तु। योजना
न्यर्धमात्राणि तेभ्यो ह्रस्वं न विद्यते। उपरिष्टात्त्रयस्तेषां ग्रहा ये दूरस
र्पिणः। सौरोऽङ्गिरश्च वक्रश्च ज्ञेया मन्दविचारिणः। पूर्वमेव समाख्या
तास्तिस्तेषां यथाक्रमात्। एते चैव ग्रहाः पूर्वं नक्षत्रेषु समुत्थिता। १९६
विवस्वानदितेः पुत्रः सूर्यो वै मुनिसत्तमा। विशाखासु समुत्पन्नो ग्र
हाणां प्रथमो हि सः। त्विषिमान्धर्मपुत्रस्तु सोमो देवो वसुस्तु सः। शीत
रश्मिः समुत्पन्नः कृत्तिकासु निशाकरः। षोडशार्चिर्भृगोः पुत्रः शुक्रः सूर्याद

मो

नन्तरः। ताराग्रहाणां प्रवरः। पुष्यनक्षत्रसंभवः। ग्रहस्त्वंगिरसः पुत्रो
द्वादशार्चिर्बृहस्पतिः। फाल्गुनीषु समुत्पन्नः पूर्वासु जगद्गुरुः। न
नवार्चिर्लोहिताङ्गश्च प्रजापतिसुतो ग्रहः। आषाढास्विह पूर्वासु समु
त्पन्न इति स्मृतः। रेवतीष्वेव सप्तार्चिः स्थाने शौरी शनैश्चरः। सौम्यो
बुधो धनिष्ठासु पंचार्चिरुदितो ग्रहः। तमोमयो मृत्युसुतः प्रजाक्ष
यकरः शिखी। आश्लेषासु समुत्पन्नो ग्रहश्चाङ्गारकमर्दनः। तथा स्वनाम
धेयेषु दाक्षायिण्यः समुत्थिता। एते ताराग्रहाश्चापि बोधव्या नाग
वादयः। जन्मनक्षत्रपीडासु यान्ति वैगुण्यतां यतः। स्पृश्यन्ते तेन दोषे
ण ततस्तद्ग्रहभक्तितः। सर्वग्रहाणामेतेषामादिरादित्य उच्यते। तारा
ग्रहाणां शुक्रस्तु केतूनां चापि धूमवान्। बुधः किल ग्रहाणां च किन्तु

क्षाणां चतुर्दशी। नक्षत्राणां श्रविष्ठास्या दयनानां तथोत्तरं वर्षाणां
पंचपंचानामाद्यः संवत्सरस्मृतः। ऋतूनां शिशिरश्चापि मासानांमा
घ उच्यते। पक्षाणां शुक्लपक्षस्तु तिथिनां प्रतिपत्तथा। अहोरात्री
विभागानाम् अहश्चापि प्रकीर्त्तितः। मुहूर्त्तानां तथैवादौ मुहूर्त्तो रुद्र
दैवतः। अक्षोश्चापि निमेषादिकालः कालविदां हि सः। श्रवणां तु धन
िष्ठादिमु~~हूर्त्तोरुद्रदैवत~~युगं स्यात्पंचवार्षिकं। भानोर्गतिविशेषे
ण चक्रवत्परिवर्त्तते। दिवाकरस्ततः स्तस्मात्कालस्त्वादिरीश्वरः। १७०
चतुर्विधानां भूतानां प्रवर्त्तक निवर्त्तकः। तस्यापि भगवान्रुद्रः सा
क्षाद्देवं प्रवर्त्तकः। तस्यापि भगवान्रुद्रः साक्षाद्देवप्रकीर्त्तितः। इत्ये
षज्योतिषामेवं सन्निवेशोर्थनिश्चयात्। लोकसंव्यवहारार्थं महादेवेन

निर्मितः। बुद्धिपूर्वं भगवता कल्पादौ संप्रवर्त्तितः। साश्रयः सात्विमानश्च
सर्वस्य ज्योतिषात्मकः। वैश्यरूपस्य प्रधानस्य परिणामोयमद्भुतः। नैष
शक्यः प्रसंख्यातुं याथातथ्येन केनचित्। गतागतं मनुष्येण ज्योतिषां
शास्त्रचक्षुषा। आगमादनुमानाच्च प्रत्यक्षादुपपत्तितः। परिक्षा नि
पुणं बुध्या श्रद्धातव्यं विपश्चिता॥ ॥इति श्रीलैंगे भुवनकोश ज्यो
तिप्रकारे एकषष्टितमोध्यायः॥ ॥ऋषयऊ॥ ॥कथं द्विज
प्रसादाद्वै ध्रुवो बुद्धिमतां वरः। मेढीभूतो ग्रहाणां वै वक्तुमर्हसि सां
प्रतं॥ ॥सूत उ०॥ ॥एतमर्थं पुरा पृष्ठ सर्वशास्त्रविशारदा मार्कं
डेयो महाप्राह तं पृष्टो ध्वे द्विजोत्तमाः॥ ॥मार्कंडेयउ॥ ॥सर्वज्ञो
सौ महातेजाः सर्वशास्त्रभृतांवरः। उत्तानपादो राजा वै पालयामास मे

स्वपुत्रं पीतमनसास्त्रुरु।चिरंस्यन्यमेराद्

स्विनी। तस्य भार्याद्वयमभूत् सुनीतिः सुरुचिस्तथा। अग्रजायामभू-
त्पुत्रः सुनीत्यां तु महायशाः। ध्रुवो नाम महाप्राज्ञः कुलदीपो महाद्यु-
तिः। कदाचित्सप्तवर्षान्ते पितुरंकमुपाविशत्। तमुत्थाप्य तु विप्रेन्द्र
ह्यंके स्वपेणमानिनी। अलब्ध्वा स पितुर्धीमान् अंके दुःखितमानसः खि।
मातुः समीपमागम्य प्ररुरोद पुनः पुनः। रुदंतं पुत्रमाहेदं माया शोकप- ता ५
रिप्लुता। सुरुचिर्दयिता भर्तुः। तस्य पुत्रोपि तादृशः। मम त्वं नस्य भाग्या- १५६
याज्जातस्तुत्रोपि तादृशः। किं शोचसि किमर्थं त्वं रोदमानः पुनः २ सांत-
स्तरुदयो भूत्वा मम शोकं करिष्यसि। स्वच्छस्थाने ध्रुवं पुत्र स्वशक्त्यात्म-
मवाप्नुहि। इत्युक्तः स तु मात्रा वै निर्जगाम तदा वने। विश्वामित्रं ततो
दृष्ट्वा प्रणिपत्य यथाविधि। उवाच प्रांजलिर्वाक्यं भगवान् वक्तुमर्हसि।

सर्वेषामुपरि स्थाने केन प्राप्स्यामि सत्तमः। पितुरंकसमासीनं मा-
तामां सुरुचिः पुरा। अधून्नयच्छतो राजा पिता नोवाच किंचन। एतस्मा-
त्कारणाद्ब्रह्मन् स सोहं मातरं गतः। सुनीतिराह मां माता मा कृथा
शोकं मांदरात्तास्वकर्मणा परं स्थानं प्राप्तुमर्हसि पुत्रकः। तस्माहं व-
चनं श्रुत्वा स्थानं प्रेप्सुर्महामुने। प्राप्तो वनमिमं ब्रह्मन् अद्य त्वान्
दृष्टवान् प्रभो। तव प्रसादात्प्राप्तोहं स्थानं मद्भुतमुत्तमं। इत्युक्तः
ब्रह्मर्षिसत्तम त्त।५ स मुनिः श्रीमान् अद्य त्वां न दृष्टवान् प्रभो। तव प्रसादात्प्राप्तोहं स्था-
न मद्भुतमाप्स्यसि। आराध्य जगतामीशं केशवं क्लेशनाशनं। दक्षि-
णा भगवन्नांगो महादेवस्य धीमतः। जपं दिव्यं महाप्राज्ञः सर्वपापवि-
नाशनं। इष्टदं परमं शुद्धं पवित्रं मंगलास्पदं। ब्रूहि मंत्रमिमं दिव्यं प्रण-
मुत्तमं। इत्युक्तः स मुनिः श्रीमान् प्रहसन्निदमब्रविन्। राजपुत्र शृणुष्वेदं स्थानमुत्तम १८

स्वपत्नं पीत मनसा ... [illegible]

... [illegible] भीषणाः। स जप्त्वा वासुदेवेति दिव्यं [illegible]
न्त्र पश्यति।

धेनसमन्विता। नमोस्तु वासुदेवायेत्येवं नियतेंद्रियः। ध्यायन्नूस
नातनं विष्णुं जपहोमपरायणः। इत्युक्तः प्रणिपत्यैवं विश्वामित्रम
हायशाः। प्राङ्मुखो नियतो भूत्वा जजाप प्रीतमानसः। शाकमूलफ
लाहारः संवत्सरमतंद्रितः। जजाप मंत्रमनिशं [illegible] नश्नन्स पुनः २
वेतालाराक्षसा घोरा सिंहाद्याश्च तथा द्विजाः। मुनीतिरस्य या माता
तस्या रूपेण संवृता। पिशाची समनुप्राप्ता पुत्रपुत्रेति वा सती। माम
नाथामेकपुत्रोसि किमर्थं क्लिश्यते भवान्। मामनाथामपहाय न ए १८०
क्त्रा तिष्ठेवानसि। एवमादीनि वाक्यानि नायमाणं महातपाः अनि
रीक्ष्येव धर्मात्मा हरेर्नाम जजाप सः। ततः प्रनेशुः सर्वाणि विघ्नरूप
णि तस्य वै। ततो गरुडमारुह्य कालमेघसमद्युतिः। सर्वदेवैः परि

वृतः स्तूयमानो महर्षिभिः। आययौ भगवान्विष्णुर्ध्रुवांतिकमरा
तिहा। तमागतं त्रिलोक्याथ कोसावित्येव चिंतयन्। पिबन्निव हृषी
केशं नयनाभ्यां जगत्पतिं। जपन्हि वासुदेवेति ध्रुवस्तस्थौ महामु
निः। शंखप्रांतेन गोविंदः यस्पर्शास्यं हि तस्य वै। ततः स परमं ज्ञान
मवाप्य पुरुषोत्तमान्। तुष्टाव प्रांजलिर्भूत्वा सर्वलोकेश्वरं हरिं।
प्रसीद देव देवेश शंखचक्रगदाधर। लोकात्मन् देवगुह्यात्मन् त्वां
प्रपन्नोस्मि केशवं। न विदुस्त्वां महात्मानं सनकाद्या महर्षयः। स
कथं त्वामहं विद्यां नमस्ते भुवनेश्वर। तमाह प्रहसन्विष्णुरेहि व
त्स ध्रुवान्नवान्। स्थानं ध्रुवं समासाद्य ज्योतिषामग्रभुग्भवान्। मात्रा
स्व सहितस्तत्र ज्योतिषां स्थानमाश्रु हि। मस्थानमेतत्परमं ध्रुवं नि

त्पेसुश्रोमनः। तपसाराध्यदेवेशो पुरा लब्धं हि शंकरात्। वासु
देवेति यो नित्यं प्रणवेन समन्वितं। नमस्कारसमायुक्तं भगव
च्छब्दसंयुतं। जपन्नेव हि यो विद्वान् ध्रुवे स्थाने प्रपद्यते। ततो दे
वाः सगंधर्वा सिद्धाश्च परमर्षयः। मात्रा सह ध्रुवे सर्वे तस्मिन्
स्थाने न्यवेशयन्। विष्णो राज्ञो पुरस्कृत्य ज्योतिषां स्थानमाप्तवान्
एवं ध्रुवो महातेजा द्वादशाक्षरविद्यया। ॥सूत उ॥ ॥तस्मै
द्वो वासुदेवाय प्रणामं कुरुते नरः। प्रयाति ध्रुवसालोक्यं ध्रुवत्वं
तस्यैतत्तथा॥ ॥इति श्रीम० लैंगे ध्रुवचरिते द्विषष्ठितमोध्यायः १८
॥ ॥ऋषय ऊ॥ ॥देवानां दानवानां च गंधर्वोरगरक्षसां। उत्पत्तिं
ब्रूहि सूत त्वं यथाक्रममनुत्तमां॥ ॥सूत उ॥ ॥संकल्पाद्दर्शनात्स्प

दर्शात्स्वाचेतसात्सर्वस्राष्टिमैथुनसंभवात्। यथानुसृतात्तस्य देव
र्षिगणपन्नगान्।१

र्शात्पूर्वेषां सृष्टिरुच्यते। न वृद्धिमगमल्लोकस्तथा मैथुनयो
गतः। दक्षपुत्रसहस्राणि पंचसूत्यामजीजनत्। तांस्तु दृष्ट्वा महा
भागान् सिसृक्षुर्विविधाः प्रजाः। नारदः प्राह हर्यश्वान् दक्षपुत्रा
न् समागतान्। भुवः प्रमाणं सर्वं तु ज्ञात्वोर्ध्वमधएव च। ततः सृष्टिं
विशेषेण कुरुध्वमृषिसत्तमाः। ते तु तद्वचनं श्रुत्वा प्रयाताः सर्वतो
दिशं। अद्यापि न निवर्तंते समुद्रादिव सिंधवः। हर्यश्वेषु च नष्टेषु
पुनर्दक्षः प्रजापतिः। वीरण्यामेव पुत्राणां सहस्रं जनयत्प्रभुः। शब
लाश्वा नाम ते पुत्राः समेताः सृष्टिहेतवः। नारदोनुगतान्प्राह ततस्तान्पू
र्ववद्वचः। भुवः प्रमाणं सर्वं तु ज्ञात्वानः स्वं तथा पुनः। आगत्य चाथ
सृष्टिं च करिष्यथ विशेषतः। तेपि तेनैव मार्गेण जग्मुर्भ्रातृगतिं तदा।

LIBRARY THE BOMBAY BRANCH OF THE ROYAL ASIATIC SOCIETY

न्त तस्तेषु पिनष्टेषु षष्टिकन्याः प्रजापतिः। वीरण्यां जनयामास
।दृ दक्ष प्राचेतसः प्रभुः। प्रदात्स दश धर्माय कश्यपाय त्रयोदश॥
सप्तविंशति सोमाय। चतस्रोरिष्टनेमये। द्वे चैव भृगुपुत्राय द्वे कृ
शाश्वाय धीमते। द्वे चैवांगिरसे तद्वत् तासां नामानि विस्तरात्॥
मरुत्वती वसूर्यामा लंबा भानुरुंधती। संकल्पा च मुहूर्त्ता च सा रुं
ध्या विश्वा च भामिनी। धर्मपत्न्यः समाख्यातास्तासां पुत्रान्वदामि ते॥
विश्वेदेवास्तु विश्वायाः साध्या साध्यानजीजनत्। मरुत्वतो मरुत्व १८२
त्यां वसोस्तु वसवस्तथा। भानोस्तु भानवस्तेन मुहूर्त्तायां मुहू
र्त्तकाः॥ लंबायां घोषनामानो नागवीथिस्तु यामिजः॥ संकल्पाया
स्तु संकल्पो वसुसर्गं वदामि ते। ज्योतिष्मंतश्च ये देवाः आपकाः सर्वतो

दिक्षु। वसवस्ते समाख्याताः सर्वभूतहितैषिणः। आपो ध्रुवश्च सो
मश्च धुरश्चैवानलोनिलः॥ प्रत्यूषश्च प्रभासश्च वसवोष्टौ प्रकीर्ति
ताः। एते रुद्राः समाख्याता एकादश गणेश्वराः। कश्यपस्य प्रवक्ष्या
मि पत्नीभ्यः पुत्रपौत्रकं। अदितिश्च दितिश्चैव दनुश्च सुरसा पुं मु४
। सुरभिर्विनता ताम्रा तथा क्रोधवशा इला। कद्रुस्त्विषा वसुस्तथ
स्तासां पुत्रान्वदामि वः। तुषिता नाम ये देवाश्चाक्षुषस्यान्तरे मनोः। वै
वस्वतेन्तरे ते वै आदित्या द्वादश स्मृताः। दितिपुत्रद्वयं लेभे काश्य
पाद्दितिनश्कृतं। हिरण्यकशिपुश्चैव हिरण्याक्षस्तथैव च। दनुपु
त्रान् लेभे कश्यपाद्बलवत्तरं। विप्रचित्तिप्रधानान्तेषां मध्ये हि
तोत्तमा। ताम्रा च जनयामास षट्कन्या द्विजपुंगवा। शुकीं श्येनीं

वंतासीच सुग्रीवां गृध्रिकां शुचिं। शुकी शुकानुलूकांश्च जनयामा
स धर्मतः। श्येनी श्येनांस्तथा भासी कुररांश्चाप्यजीजनत्। गृध्री गृध्रा
न्कपोतांश्च पारावतविहंगमान्। हंससारसकाकांश्च प्लवगान् शु
चिरजीजनत्। अजाश्वमेषोष्ट्रखरान् सुग्रीवी चाप्यजीजनत्। वि
नता जनयामास गरुडं चारुणं शुभा। सौदामिनी तथा कन्यां सर्वलो
कभयंकरीं। सुरसायाः सहस्रं तु सर्पाणाममवसुराः। कद्रू सहस्रशि
रसां सहस्रं प्राप सुव्रता। प्रधानास्तेषु विख्याताः षड्विंशतिरनुत्तम। १८३
शेषवासुकिकर्कोटकृशैरावततक्षकाः। धनंजयमहापद्मनीलाश्व
तरकंबलाः। एलापत्रस्तथापद्मधृतराष्ट्रबलाहकाः। शंखपालमहा
[illegible]खपुष्पदेव[illegible]मानना। शबरोनश्च नुघ्नाघ्नौ वामनः फाणितस्तथा॥

---

कपिलो दुर्मुखश्चापि पतंजलिरिति स्मृताः। रक्षोगणान् क्रोधवशाः स्व
सुरसायामजीजनत्। रुद्राणां च गणं शुभ्रं गोमहिष्यौ वरांगना। सुर
भिर्जनयामास कश्यपाददितिस्तथा। मुनिर्मुनीनां च गणं गणमप्स
रसां तथा। तथा किंनरगंधर्वानरिष्टाजनयद्बहून्। तृणवृक्षलता
गुल्मानिला सर्वमजीजनत्। त्वष्टा तु यक्षरक्षांसि जनयामास कोटि
शः। एते कश्यपदायादाः संक्षेपात्परिकीर्तिताः। एतेषां पुत्रपौत्रा
दिवंशाश्च बहुशः स्मृताः। एवं प्रजासु सर्वासु कश्यपेन महात्मना।
अधिष्ठिता सुसर्वासु स्थावरासु चरासु च। अभिषिच्याधिपत्येषु पिं २
तेषां चक्रे प्रजापतीन्। स खेमनुष्याधिपतिं चक्रे देवसुतं मनुं। स्वा
यंभुवेंतरे पूर्वं ब्रह्मणा ये निषेचिताः। तैरियं पृथिवी सर्वा सप्तद्वीपा

सेपन्नगाः । यथोपदेशमद्यापि धर्मेण प्रतिपाल्यते । स्वयंभुवादि
षु कृते मनवो ये भवंति वै । मन्वंतरेषु ते तेषु स्थितेष्वे तेषु पार्थिवा
ए ॥ समहान्येष्वपि कृते ये प्राप्ते मन्वंतरे ततः । अतीतानागताः सर्वे नृ
४ स्वा पं मन्वंतरेष्वथ । एवमुक्त्वा द्युपुत्रो स्तु प्रजासंतानकारणात् । क
ञ्का ५ श्यपो गोत्रमस्तु चचार स पुनस्तपः । पुत्रौ गोत्रकरौ मह्यं भवेतामिति
चिंतयन् । तस्य प्रध्यायतो ह्येवं कश्यपस्य महात्मनः । ब्रह्मिष्ठौ सु
सुतौ पश्चात् प्रादुर्भूतौ महौजसौ । वत्सरश्चासितश्चैव तावुभौ ब्र १८
ह्मवादिनौ । वत्सरान्नैध्रुवो यज्ञे रैभ्यश्चैव महायशाः । रैभ्यस्य रैभ्या
विज्ञेया नैध्रुवस्य वदामि वः । च्यवनस्य सुकन्यायां सुमेधाः समपद्यत ।
नैध्रुवस्य तु सा पत्नी माता वै कुंडपायिनः । असितस्यैकपर्णायां ब्रह्मिष्ठः

समपद्यत । शांडिल्यानां वरः श्रीमान् देवलः सुमहातपाः । शांडिल्या
नैध्रुवा रैभ्यास्त्रयः पक्षाश्च काश्यपाः । नरः प्रकृतयो देवाः पुलस्त्य
स्य वदामि वः । चतुर्युगे ह्यतिक्रांते मनोरेकादशे प्रभो । अर्धावशि
ष्टे तस्मिंस्तु द्वापरे संप्रकीर्तिताः । माता यस्य वपुष्मान्त पुत्र आसीत्
दमः किल । दमस्य तस्य दायादस्तृणबिंदुरिति स्मृतः । त्रेतायुगमु
खे राजा तृतीये संबभूव ह । तस्य कन्या त्विलविला रूपेणाप्रतिमाभ
वत् । पुलस्त्याय स राजर्षिस्तां कन्यां प्रत्यपादयत् । ऋषिरैलविलो
यस्यां विश्रवाः समपद्यत । तस्य पत्न्यश्चतस्रस्तु पौलस्त्यकुलवर्ध
नाः । बृहस्पतेः शुभा कन्या नाम्ना वै देववर्णिनी । पुष्पोत्कटा च वाका च ।
तृतीया मालवतः शुभा । केकसी मालिनः कन्या तासां वै शृणुत प्रजाः । कु
ज्ये अथ वैश्रवणं तस्य सुषुवे देववर्णिनी । केकस्य जनयत् पुत्रं रावणं
राक्षसाधिपं १

कोर्णं सूर्पनखीं धीमं तेच विभीषणं । पुष्पोत्कटायां जनयत् पुत्रा
न्तस्मा द्विजोत्तमा । महोदरं प्रहस्तं च महापार्श्वं खरं तथा । कुंभीन-
सीं तथा कन्यां वाकायां श्रृणु ततः प्रजा । त्रिशिरा दूषणश्चैव विद्युज्जिह्व
श्च राक्षसः । कन्यैका श्यामिका नाम वाकायां प्रसवः स्मृतः । इत्येते क्रू
रकर्माणः पौलस्त्या राक्षसा नव । विभीषणो विशुद्धात्मा दशमः प
रिकीर्त्तितः । पुलहस्य मृगाः पुत्राः सर्वे व्यालाश्च दंष्ट्रिणः । भूताः पिशा
चाः सर्पाश्च शूकरा हस्तिनस्तथा । वानराः किंनराश्चैव यक्षाः किंपुरुषा १८५
स्तथा । अनपत्यः क्रतुस्तस्मिन् स्मृतो वैवस्वतेन्तरे । अत्रेः पत्न्यो दशै
वासन् सुंदर्यश्च पतिव्रताः । भद्राश्वस्य घृताच्यां वै दशाप्सरसः सू
नाः । भद्रा शूद्रा च मद्रा च जला दामलदा तदा । ऊर्णापूर्णा च विश्रुता याच

वा: १

गोपबला स्मृताः । तथा तामरसा नाम दशमी रत्नकोटिका । आत्रे
य वंश प्रभवास्तासां भर्त्ता प्रभाकरः । स्वर्भानुनिहते सूर्ये पतिते
स्मिन् दिवो महीं । तमोभिभूते लोकेस्मिन् प्रभा येन प्रवर्त्तिता । स्वस्ति
ते स्वस्ति ते चोक्ते पतन्निह दिवाकरः । ब्रह्मर्षिवचनात्तस्य न पपात
प्रभुर्दिवि । ततः प्रभाकरस्त्वेक प्रभुरत्रिर्महर्षिभिः । भद्रायां जनयामा
स सोमं पुत्रं यशस्विनं । स तु सं जनयामास पुनः पुत्रां स्तपोधनान्
स्वस्त्यात्रेया इति ख्याता ऋषयो वेदपारगाः । तेषां द्वौ ख्यातयशसौ ब्र
ह्मिष्ठौ सुमहौजसौ । दत्तो ह्यत्रिवरस्तेषां दुर्वासास्तस्य चानुजः । स्व
सा च यवीयसी तेषां अबला ब्रह्मवादिनी । तत्र गोत्रद्वये जाताश्च ता
स्व पितानुचिः श्यावश्च प्रवरश्चापि बलकश्च गविष्ठिरः । आत्रेयाणां

या २

चत्वारः स्मृता पक्षा महात्मनां। कश्यपो वत्सकश्चैव वत्सकेश्च ह
वसिष्ठिरः। आत्रेयेण तु चत्वारो हि रुंधस्य निबोधत॥ नारदस्तु वसिष्ठा
योरुंधती प्रत्यपादयत्। ऊर्ध्वरेखांगतेजा दक्षशापात्तु नारदः॥ पु
रा देवासुरे युद्धे घोरे वै तारकामये। अनावृष्ट्या हते लोके ह्यल्पलोके
षु तैः सह। वसिष्ठः स्तपसा धीमान् धारयामास वै प्रजाः। अन्नोदकं
मूलफलमौषधीश्च प्रवर्तयन्। तानेव जीवयामास कारुण्यादौष
धेन च। सोऽरुंधत्यां वसिष्ठस्तु शतमुत्पादयन् सुतान्। तेषां शक्ति
र्ज्येष्ठतां ज्येष्ठो यज्ञेपराः सरः॥ रुसान्नक्तिः शक्तिरुचिरेण तु वै तदा
काली पराशराज्जज्ञे कृष्णद्वैपायनं प्रभुं। द्वैपायनो ह्यरण्यां वै शुकमु
त्पादयत् सुतं। उपमन्युं च पीवर्यां विद्धि मे शुकसूनवः॥ कालीपसूनवः॥ १०६

हि २

भूरिश्रवाः प्रभुः शंभुः कृष्णो गौरश्च पंचम। कन्या कीर्तिमती चैव योग
माता दृढव्रता। जननी ब्रह्मदत्तस्य पत्नी सा चानुहस्य च। श्वेत
कृष्णश्च गौरश्च श्यामो धूम्रस्तथारुणः। नीलो बादरिकश्चैव सर्व
एते पराशरात्। पराशराणामष्टौ ते पक्षाः प्रोक्ता महात्मनां। अत ऊ
र्ध्वं निबोधध्वं इंद्रप्रमति संभवं। वसिष्ठस्तु कपिंजल्यां घृताच्यां
पादयत्। त्रीणि त्रय समाख्याता इंद्रप्रमतिरुच्यते। पृथ्वीः सुता
याः संभूतो भद्रस्तस्यात्मजः प्रभुः। उपमन्युः सुतस्तस्य पंचैते ह्यौपम
न्यवः। मित्रावरुणयोश्चैव कौंडिन्याः परिकीर्तिताः विश्रुताः। एकार्षेयास्तथा
न्ये वासिष्ठा नाम विश्रुताः। एते पक्षा वसिष्ठानां स्मृता दश महा
त्मनां। इत्येते ब्रह्मणः पुत्रा मानुषा विश्रुता भुवि। त्राता तारस्तु महाभागा

तेषां वंशप्रकीर्त्तिता। त्रिलोकधारणे शक्ता देवर्षिकुलसंभवा॥
तेषां पुत्राश्च पौत्राश्च शतशोऽथ सहस्रशः। यैश्च व्याप्तास्त्रयो लो
काः सूर्यस्येव गभस्तिभिः॥ ॥इति श्रीलैंगे सर्वक्रमे त्रिषष्टितमो
ध्यायः॥ ॥ऋषय ऊ॥ ॥कथं हि रक्षसा शक्तिर्भक्षितः सानुजः स
हा। वासिष्ठो वद तां श्रेष्ठ तन्नो वक्तुमिहार्हसि॥ ॥सूत उ॥ ॥राक्ष
सो रुधिरो नाम विश्वामित्रस्य तत्पुरा। शक्तिं सन्नक्षयामास शक्तेः शापा
त्सहानुजं। वसिष्ठयाज्यं विप्रेन्द्रास्तदा विष्येव नृपतिं। कल्माषपादं १८७
रुधिरो विश्वामित्रेण नोदितः। भक्षितः स इति श्रुत्वा वसिष्ठस्तेन रक्ष
सा। सशक्तिं शक्तिमतां श्रेष्ठो भ्रातृभिः सह धर्मवित्। हा पुत्र पुत्र पुत्रेति
क्रंदमानो मुहुर्मुहुः। अरुंधत्या सह मुनिः पपात भुवि दुःखितः। नष्ट

कुलमिति श्रुत्वा स्मर्तुं चक्रे मतिं तदा। अस्मात्पुत्रशताच्छ्रैव शक्तिर्ज्येष्ठ
श्च शक्तिमान्। तं विनाहं न जीविष्य इति निश्चित्य दुःखितः। आत्म
द्युमूर्धनि नमज्जात्मजो सौ जितात्मवान् सर्ववित् सर्ववित्प्रभुः। धराध
रश्चापि तदा धरायां पपात तं मा सह साश्रु दृष्ट्वा। धराधरान्नापति
तो धरायां दधार तत्रापि विचित्रकंठी। वरांबुजाक्षी करिखेलगामि
नी रुदंतमादाय रुरोद साध्वी। तदा तस्य स्नुषा प्राह पत्नी वाक्यै महा
मुनिं। वसिष्ठं वदतां श्रेष्ठ रुदंति जयविह्वला। भगवन् ब्राह्मणः श्रे
ष्ठ तवदेहमिमं शृणु। पालयस्वात्मनः इष्टं तव पौत्रं ममात्मजं।
त्याज्यं न च विप्रेन्द्र देहमेतद्विना शिशुं। गर्भस्थो मम सर्वार्थसाध
कः शक्तिजो यतः। एवमुक्त्वाथ धर्मज्ञा करस्थाकमलेक्षणा। तस्याप्य

श्वसुरं नत्वा नेत्रे सन्मार्ज्य वारिणा। दुःखितापि परित्रातुं श्वसुरं दुःखितं
तदा। अरुंधती च कल्याणी प्रार्थयामास दुःखिता। स्नुषावाक्यं तदा श्रु
त्वा वसिष्ठोत्थाय भूतलात्। संज्ञामवाप्य चलितस्तां पपात पुरो भुवि॥
अदृश्यंतीकरात्तां तां संस्थाप्य स्वकुलेश्वरीं। रुरोद मुनिशार्दूलो
ऽनार्यया सुतवत्सलः। अथ मासे प्रपूर्णे विप्रो यथा तस्याश्च तनुर्भवः। दशमा
सीनो गर्भशय्यायां कुमार एवमाह सः॥ ततो निशम्य भगवान् वसिष्ठ
ऋचश्च महादरात्। किंनो कृमिति संविश्य तदा तिष्ठन् समाहितः। श्रोमा
गणस्याथ हरिं पुंडरीकनिभेक्षणः॥ वसिष्ठमाह विश्वात्मा घ्राणया १८८
सघ्राणां निधिं ज्ञो वत्स वत्स विप्रेंद्र वशिष्ठसुतवंशजा। तव पौत्र मुख
स्तो जात कृगोषाग्रविनिःसृता नामस्मस्तव पौत्रो सो राक्षिजः शक्तिमान्मुने॥

गपिदू
रगा

तस्माद्दुःखं संत्यज्य मोहं च लभसुतोत्तमः। रुदन्नश्च गर्भस्थो रुद
पूजापरायणः। रुद्रदेवप्रसादेन कुलं ते संतरिष्यति। एवमुक्त्वा
घृणी विप्रं भगवान् पुरुषोत्तमः। वसिष्ठं मुनिशार्दूलं तत्रैवांतरधीय
त॥ ततः प्रणम्य शिरसा वसिष्ठो वारिजेक्षणं। अदृश्यंत्यां महातेजा
यः स्पर्शे दरमादरात्। हा पुत्र पुत्र सुतेति पपात च सुदुःखितः। प्र
जल्पाद्दृश्यती प्रेक्ष्य तदारुंधती द्विजा। पुत्रकं संस्मरन् दुः
खात् स्मिताह सुतवत्सलः। तव पुत्र महद्दृष्टो नाशकं कुलतारणात्
वातिकां गमिष्यामि सहमंत्रानसे त्रायः। एवमुक्ते रुदन् विप्र आलिंग्या
रुंधतीं तदा पपात सा जघानाले शक्ते कुक्षिं करेण वै। अदृश्यंती
जघानाथ शक्तिजस्यालयं शुभे। करास्तां दुःखितान् मा पपात स वसुं

लापचारुंधतीतदानीतावशिष्ठश्चमहामतिः। उत्थाप्यतोस्तकपोचैवक्र
चेमुर्तुजविकलौ। विचारमुग्धेतवगर्भमंडलेकरोबुजाःमा। विनिहंत्य
दुर्लभौ। कुलंवशिष्टस्यसमस्तमस्यवैनिहंतुमार्यकथमुद्यतावद
तवात्मजेशक्तिसुतेचदृष्ट्वाश्रास्थाद्यवेक्षामृतमार्यसूनोःत्रातुंयतो
देहमिसंमुनिंद्रः मुनिश्चितःपाहिततः शरीरं॥ ॥सूतउ॥ ॥एवंस्त
षामुपालस्यमुनिसारुंधतीस्थितो। अदृश्यंतीवशिष्ठश्चप्राहचोर्ज
वा पितश्रुतः। त्वय्येवजीवितंस्यमुनेर्यस्त्रुतेममा। जीवितंयस्त्वदेहस्य १८९
रक्षपात्रीकुलस्यतत्॥ ॥अदृश्यंतीउवाच॥ ॥मयायदिमुनिश्रे
ष्ठत्रातुंवैनिश्चितंस्वकं। ममाश्रुतेश्रुतेदेहेकथंचित्स्यालयात्महो
यःदुःखंप्रतियात्रानीमापुत्रीनात्रसंशया। स्यान्नदुःखंमहेत्रात्रीयतः

।पीतामातापितृपुत्रश्वश्रुश्वशुरएवच।एतेनबाधंवास्त्रीणांभर्त्तां
बंधुपरागा।२

पुत्रोमुनेस्तवः। अहोकृतंमयादृष्टुं दुःखधात्रीयहं विभो। दुःखपा
त्रीनवाद्यैप्यबुलसूनोःजगद्गुरोः। तथापिभर्त्रारक्षितायानारीसापरा
भवैः। दिवानिशंनार्येवपरिभूतानविप्पतिः। आत्मनोयदिकष्ट
तमर्थमित्यथपंडितैः। तदप्यत्रमृषाह्यासीन्गतशक्तिःस्थितागृहे
अहोत्रममकाविन्नेमनसोमुनिपुंगवः। पतिप्राणसमंत्यक्ताजीवा
म्यत्रकृणंयतः। वशिष्ठश्चत्यमाश्रित्यगृहंनानुयथालतानिमू
ला५ भूनासानुसक्रीनाप्यहेनया। स्तुषायावाक्येनिशम्यैनंवशिष्ठोम
र्ययासह। तथाचक्रेमतिंधीमान्गंतुंस्वाश्रममाश्रमी। कृच्छ्रात्ठतार्ये
भगवान्वशिष्ठस्वाश्रमेशुभे। अदृश्यंत्यासमंधीमान्संविवेशस
वित्तमान्। सागर्भपालयामासकथंचिन्मुनिपुंगवाः। कुलसंतम

णार्थाय शक्तिपत्नी समाहिता। अथ सासूत तनयं सौम्ये ह्नि शुभे
ने। शक्तिपत्नी यथा शक्तिं शक्तिमंतमरुंधती। असूत सा दितिर्विष्णुं यं
यथा स्वाहा षडाननं। अग्नीयथारणी पद्मो शक्रे साह्वात्पराशरं। यदा त
दा शक्तिसूनुं रवतीर्णो महीतले। शक्तिस्सक्तात ततो दुःखं पितृलोकसं
न्निधिं ययौ। भ्रातृभिः सह पुण्यात्मा आदित्यैरिव भास्करः। राजन्पितृ
लोकस्थो वासिष्ठो मुनिपुंगवः। जगुस्तदा च पितरो ननृतुश्च पितामहाः
प्रपितामहाश्च विप्रेंद्रा अवतीर्णे पराशरे। येब्रह्मवादिनो भूमौ नन १९०
ऋतुर्दिवि देवताः। पुष्कलाद्याश्च सस्रजुः पुष्पवर्षं च खेचराः। पुरेषु रा
ष्ट्रसानां तु प्रणेदे विषमं द्विजाः। आश्रमेषु मुनीनां तु विरुद्धि हर्षसंमतं। अ
वतीर्णे यथा त्वं राजन्नगन्नाथो पराशरः। अदृश्यंत्यास्तु वक्त्रो मेघजाला

दिवाकरः। सुखं तु दुःखमभवद्ददृश्ये त्यास्तथा द्विजाः। दृष्ट्वा पुत्रं पति
स्मृत्वा ह्यरुंधत्याः पुनस्तथा। सा दृष्ट्वा तनयं बाला पराशरमतिं कृतिं।
विलापविक्लवालोला सन्नकंठं पपात च। सा पराशरमुनिं तदा सुतं दे
वदानवगणैश्च पूजितं। जातमार्यमनघं सुविस्मिता वीक्ष्य सात्रमचर
द्विलापसैव। हा वसिष्ठसुतं कुत्र विद्युतः पश्य पुत्रमनघं सहानुजैः।
त्यज्य दीनवदनो हि यज्ञतः पुत्रदर्शनपरो सिमां व्रजे। शक्तिकांतवसु
तं पश्य भ्रातृभिः सह पप्रमुखो यथा महेश्वरो पश्यन्सगणो हर्षिता
ननः। अथ तस्यास्तदालापं वसिष्ठो मुनिसत्तमः। श्रुत्वा स्नुषामुवाचे
दं मा रोदीरिति दुःखिता। आत्तया तस्य सा शोके वसिष्ठस्य कुलांगना।
स्पृष्ट्वा हि पालयद्वाले बाला बालमृगेक्षणा। दृष्ट्वा स्वमातरं प्राह अस्मिं

ष्प १

त्र.सो र्विना। आसीन्नो माकुला सा विध्वी बाष्पपर्याकुलेक्षणा॥ ।परा
सर उ०॥ ॥अंब मंगलविभूषणैर्विना देहयष्टिरधुनेन शोभते। वक्तुमर्
हसि तन्मामकारणं चंद्रविबरहितेव शर्वरी॥ मातर्मातः कथं त्यक्ता मंग
लाभरणानि वा। आसीनाऽनष्टहीनेव वक्तुमर्हसि शोभने। अदृश्यंती त
दा वाक्यं श्रुत्वा तस्य सुतस्य सा। न किंचिदब्रवीत्सुश्रुः शुभे वा यदि वा वरं।
अदृश्यंती पुनः प्राह शक्तेर्यो गतवान्ममः। मातः कुत्र महातेजाः पिता व
द वदेति नो। श्रुत्वा रुरोद सा वाक्यं पुत्रस्यार्त्ती व विकला। नोहितो रक्ष
सा तात तवेति निपपात च। श्रुत्वा वसिष्ठो विमनास्तदासीत्पौत्रस्य
वाक्यं हि रुदन् दयालुः। अरुंधती चाश्रमवासिनस्तदा ये सर्व वसिष्ठा
श्च मुनीश्वराश्च। नक्षितो रक्षसा मातुः पिता तव पुरा दिति। श्रुत्वा १०८

पराशरोऽधीमान् प्राह साश्रुविलेक्षण॥ ॥पराशर उवाच॥
दहिष्येऽस्य चाद्य देवेशं त्रैलोक्यं सचराचरं। क्षणेन मातः पितरं दर्श
यामि निमेमेति। सा निशाम्य वचनं तदाश्रुनेस्मितानन यमा हर्
स्मिता। तथ्यमेतदिति तं निरीक्ष्य सा पुत्र पुत्र भव मर्चयेति च॥
ज्ञात्वा शक्तिसुतस्याथ संकल्पं मुनिपुंगवः। वसिष्ठो भगवान्प्राह पौ
त्रं धीमान् घृणानिधिः। स्थाने पौत्र मुनिश्रेष्ठ संकल्पस्तव सुव्र
तः। तथापि शृणु लोकस्य क्षयं कर्तुं न चार्हसि। राक्षसानामभावाय
कुरु सर्वेश्वरार्चनं। त्रैलोक्यं शृणु शाक्तेय पराध्यति किं तव। ता
तस्तस्य वसिष्ठस्य नियोगात्शक्तिनंदनः। राक्षसानामभावाय मतिं
चक्रे महामतिः। अदृश्यंती वसिष्ठं च प्रणम्याथ मुनीन्ततः। कृत्वैवालि

॥ हृत्पीठं पंचनामा मुनिपोतकः। संपूज्य शिवसूक्तेन त्र्यंबकेन शम्भुना च वाज्ञ
होतारं लिंगसूक्तं च अथर्वशिर एव च। अष्टांगार्घ्यं च रुद्राय दत्वा सम्यग्यथा
विधि॥ ॥परासर उ॥ ॥भगवान् रुद्रसारुद्र भक्तितो रुधिरेण वै।
पितामहमहातेजा भ्रातृभिः सह शंकरः। दृष्टुमिच्छामि भगवान् भ्रा
तृभिः पितरं सह। एवं विज्ञापयाञ्चक्रे प्राणिपत्य मुहुर्मुहुः। हा रुद्र
देति रोरवीति हरेति च। तं दृष्ट्वा भगवान् रुद्रस्तदोमामाह शंकरः। प
श्य बालं महाभागे बाष्पपर्याकुलेक्षणं। ममानुस्मरणे युक्तं ममारा १९२
धनतत्परं। ~~पश्य बालं महाभागे~~ साच दृष्ट्वा महादेवी पराशरम
ती कृती। दुःखार्त्तं स क्लिन्न सर्वांगमस्राकुलविलोचनं। लिंगार्चनवि
धौ सक्तं हर रुद्रेति वादिनं। प्राह भर्त्तारमीशानं कारुण्या जगतामुमा॥

इच्छितं यच्च तस्यैकलं प्रसीद परमेश्वर॥ निशम्य वचनं तस्याः शंक
रः सर्वदेहिनां। भार्यां महाक्षेत्रयातामाह देवो हालाहलाशनः॥ र
क्षाम्येनं द्विजं बालं फुल्लेन्दीवरलोचने। ददामि दृष्टिमद्रूपं दर्शनक्ष
मं एव वै। एवमुक्त्वा गणैर्देव्या भगवान्नीललोहितः। सोपि दृष्ट्वा महा
देवमानंदास्रविलेक्षणः। विनष्य पातरुद्रास्य पादयोस्तस्य सा
दरं। पुनर्भवान्यापादौ च नंदिनश्च गणैः सह। सफलं जीवितं मेद्य
ब्रह्माद्यांस्तानुवाच सः। रक्षार्थं मागतस्त्वद्य मम बालस्य शंकरः। को
न्यः समो मया लोके देवो दानवो पि वा। अथ तस्मिन् क्षणादेव ददर्श
दिवि संस्थितं। पितरं भ्रातृभिः सार्धं शाक्तेयस्तु पराशरः। सूर्यमंडल
संकाशे विमाने विश्वतो चिषी। भ्रातृभिः सहितं दृष्ट्वा ननाद च जहर्ष च।

तदानृशानको देवः सनार्थः स गणेश्वरः। वशिष्ठपुत्रमाहेदं पुत्रदर्शनत
त्पर। शाक्तेय नृपमिमं बालमानंदाश्रुविलोचन। अदृश्यंतीच विप्रेंद्र
वशिष्ठपितरं तव। अरुंधती महासाध्वी त्वाद्दृष्टनपरायणा। अदृश्यंती
च विप्रेंद्र मातरं पितरं चोज्ञो नमस्कुरु महामते। तदाहरं प्रणम्यादौ दे
वदेवमुमां तथा। वशिष्ठं च मुनिश्रेष्ठं शाक्तिर्वै शंकराज्ञया। मातरं
च महाभागां कल्याणीं पतिदेवतां। अरुंधतिं जगन्मातुर्नियोगात्स्वा हो
शाक्तिजः॥ ॥शाक्त उवाच॥ ॥जोवत्सवत्स विप्रेंद्र पराशर महाद्युते रक्षि १९३
तोहं त्वया पापात् गर्भस्थेन महात्मना। अणिमादिगुणैश्वर्यं मयावत्स
पराशरः। लब्धं मया नहं दृष्टं तव वांछैमम मास्तुनः। अदृश्यंती महा
भागां रक्षवत्स महामते। सारुंधतीकं पितरं वशिष्ठं देवं सर्वदा। अव्ययः

सकलो वत्स मम संतारितः त्वया। पुत्रेण लोकान् जायंती त्वं साक्षि
मिमा द्यवै। आराधय महेशानं जगतां प्रभवं प्रभुं। गमिष्यमि वं वै
रं भ्रातृभिः सह शंकरं। एवं पुत्रमुपामंत्र्य प्रणिपत्य महेश्वरं। निरीक्ष्य
भार्यां स दृशि जगाम पितरं वशी। एवं सदृष्टा पितरं दृष्ट्वा स्मर्म च शंक
रं॥ तुष्टाव वाग्भिरिष्टाभिः शाक्तेयः शशिभूषणं। ततः स्कष्टो महादे
वः कामांधकविमर्दनः। अनुग्राह्य च शाक्तेयं तत्रैवांतरधीयत। गते
महेश्वरे सांबे प्रणम्य च पिनाकिनो दग्धुं राक्षसानां वै कुलं मंत्रेण
मंत्रवित्। तदाह पुत्रं धर्मज्ञो वशिष्ठो मुनिभिर्वृतः। अलमद्य तु को
पेन तात क्रोधमिमं जहि। राक्षसानां प्रध्वंसे पितुस्ते विहितं तथा
मूढानामेव भवति क्रोधो बुद्धिमतां नहि। हन्यंते तात कः केन यतः स्व

कृतं त्वनुकम्पमानः। संचितस्यातिमहतो वक्तुं शक्तेन मानवैः यशसस्तप
सश्चैव क्रोधेनाग्निकरः परः। अलं हि राक्षसैर्दग्धैर्दीनैरनपराधिभिः।
सत्रं ते विरमत्वेतत् क्षमासारा हि साधवः। एवं वशिष्ठवाक्येन शाक्तेयो मु
निपुंगवः। उपसंहृतवान् सत्रं सद्यः स्तद्वाक्यगौरवात्। ततः प्रीतश्च
भगवान् वशिष्ठो मुनिसत्तम। संप्राप्तश्च तदा तत्र पुलस्त्यो ब्रह्मणः सु
तः। वशिष्ठेन च दत्तार्घः कृतासनपरिग्रहः। पराशरमुवाचेदं प्राणिप
त्यास्थितं मुनिः। वैरे महति यद्वाक्याद्गुरोरद्याश्रिता क्षमा। त्वया तस्मात्स १९४
मस्तानि भवान् शास्त्राणि वेत्स्यति। संततेर्न ममोच्छेदः क्रुद्धेनापि यतः कृ
तः। त्वया तस्मान्महाभाग ददाम्यन्यं महावरं। पुराणसंहिताकर्ता भवा
न्वत्स भविष्यति। देवतापारमार्थ्यं च यथावद्वेत्स्यते भवान्। प्रवृत्ते च निवृत्ते च

कर्मण्येतेमला मतिः। मत्प्रसादादसंदिग्धा तव वत्स भविष्यति। ततश्च प्रा
ह भगवान् वशिष्ठो वदतां वरः। पुलस्त्येन यदुक्तं ते सर्वमेतद्भविष्यति। इ
ति तस्य पुलस्त्यस्य वशिष्ठस्य च धीमतः। प्रसादाद्वैष्णवं चक्रे पुराणं वै परा
शरः। षट्प्रकारं समस्तार्थसाधकं ज्ञानसंचयं। दशसाहस्रसमितं
सर्ववेदार्थसंचयं। चतुर्थं हि पुराणानां संहितासु सुशोभनं। एतत्क
थितं सर्ववाशिष्ठानां समासतः। प्रभावं शक्तिसूनोश्च महात्म्यं मुनि
पुंगवः॥ ॥इति श्रीलैंगे सृष्टिक्रमे चतुःषष्टितमोऽध्यायः॥ ॥ऋषय ऊ॰
आदित्यवंशं सोमस्य वंशं वंशविदां वरः। वक्तुमर्हसि चास्माकं संक्षेपा
द्रोमहर्षण॥ ॥सूत उ॰॥ ॥अदितिः सुषुवे पुत्रमादित्यं कश्यपाद्द्विजा
तस्यादेवस्य चैवासीद्भार्याचतुष्टयमथापरा। संज्ञा राज्ञी प्रभा छाया तासां भुक्तावदामि वः॥

संज्ञात्वाष्ट्री तु सुषुवे सूर्यात्मनुमनुत्तमं। यमं च यमुनां चैव राज्ञी रैवंतमे
व च। प्रभा प्रभातमादित्या छायां संज्ञाप्यकल्पयत्। छाया च तस्मात् सु
षुवे सावर्णिं भास्करात्मजं। ततः शनिं च तपतीं विष्टिं चैव यथाक्रमं। छायास्व
पुत्रेष्वधिकं स्नेहं चक्रे मनौ तदा। मातुः स्नेहं न चक्षाम यमस्तु क्रोधमूर्छितः।
सन्ताड्या मास रूषा पादमुद्यम्य दक्षिणं। यमेन ताडिता सा तु छाया वै दुःखि
ता भवत्। छायां हेतुपदे नैछन् मातुर्देहसमुद्भवां। निवारितोपि मनुना दुः
ःखिता सा तदाभवत्। छाया शापात्पदं चैकं यमस्य क्लिन्नमुत्तमं। पूयशोणि
तसंपूर्णं कृमीणां निचयैः स्तृतं। सोपि गोकर्णमाश्रित्य फलकेनानिला १९५५
शनः। आराधयन्महादेवं तत्वा वर्षायुतायुतं। भवप्रसादादगमन् लोक
पालत्वमुत्तमं। पितॄणामाधिपत्यं च शापमोक्षं तथैव च। लब्धवान् देवदेवस्य

---

पंभावाछूलपाणिनः। असहन्ती पुरा भानोस्तेजोमयममिंदिता। रूपत्वा
ष्ट्री स्वदेहात्तु छायाख्यं सा त्वकल्पयत्। वडवा रूपमास्थाय तपस्तेपे स्व
येच सा। कालात्स्वयत्नतो ज्ञात्वा छायां छायापतिः प्रभुः। वडवामगमत्संसे
मश्वरूपेण भास्करः। वडवा च तदा त्वाष्ट्री संज्ञा तस्माद्दिवाकरात्। सुषुवे
वाश्विनौ देवौ देवानां तु भिषक्वरौ। लिखितो भास्करः पश्चात् संज्ञापि
त्रा महात्मना। विष्णोश्चक्रं तु तेनैव घोरं मण्डलाद्भास्करस्य तु। निर्ममेनावं
स्त्वष्टा प्रधाने दिव्यमायुधं। रुद्रप्रसादाच्च शुभं सुदर्शनमिति स्मृतं
जं हूधान् भागोश्चक्रं कृत्सकालानलप्रभं। मनोस्तु प्रथमस्यासन् सो
र्यस्य सुतान् नव। इक्ष्वाकुश्च नृगश्चैव धृष्टः शर्यातिरेव च। नरिष्यंत
श्च वै धीमान् नाभागो रिष्ट एव च। करूषः कृषभश्चैव ~~धृष्टः शर्यातिरेव~~

नवैते मां नवास्मृता। इला ज्येष्ठाः प्रथमतः पुंस्त्वं प्राप्तेष्ठि संभवः। सुद्युम्न इ
ति विख्याता पुंस्त्वप्राप्ता इला पुरा। मित्रावरुणयोस्तत्र प्रसादान्मुनिपुं
गवात्। पुनः शरवणं प्राप्य स्त्रीत्वं प्राप्तो भवात्मया। सुद्युम्नो मानवः श्रीमान्
सोमवंशविवर्द्धये। इक्ष्वाकोरश्वमेधेन इलाकिंपुरुषोऽभवत्। इलाकिंपु
रुषे त्वेपि सुद्युम्न इति नोच्यते। मासमेकं पुमान्वीरः स्त्रीत्वं मासमगात्पुनः।
इला बुधस्य भवनं सोमपुत्रस्य चाश्रिता। बुधेनांतरमासाद्य मैथुनायोप
मंत्रिता। सोमपुत्राद्बुधाद्वापि ऐलो जातः पुरूरवाः। सोमवंशाग्रजो धीमान् १९६
भवनकः प्रतापवान्। इक्ष्वाकुः सूर्यवंशस्य तथैवाग्रजो नृपः। पुत्रत्रय
मभूत्तस्य सुद्युम्नस्य द्विजोत्तमाः। उत्कलश्च गयश्चैव विनताश्वस्तथैव
च। उत्कलस्योत्कला राष्ट्रं विनताश्वस्य पश्चिमे। गया गयस्य चाख्याता पु

री पुरमशोभनो। सुराणां संस्थितिर्यस्यां पितृणां च सदा स्थितिः। इक्ष्वाकु
र्ज्येष्ठदायादो मध्यदेशमवाप्तवान्। वशिष्ठवचनात्चासीत्प्रतिष्ठानेम
हाद्युतिः। प्रतिष्ठा धर्मराजस्य सुद्युम्नस्य महात्मनः। स पुरूरवसे प्रा
दात् राज्यं प्राप्य महायशाः। मां नवेयो महाभागास्त्रीपुंसोर्लक्षणान्वितः। इ
क्ष्वाकोरभवद्वीरो विकुक्षिर्धर्मवित्तमः। ज्येष्ठः पुत्रशतस्यासीद्दशपंच च
तत्सुताः। अनुत्तज्येष्ठः ककुत्स्थस्तत्र सर्वेषु तत्तो नृपः। ततः पृथुर्जि वि
शोष्टो जिश्वकः पार्थिवस्ततः। विश्वकस्यार्द्धको धीमान्युवनाश्वः सुत
स्तु तेन श्रावस्तिश्च महातेजा वंशकस्तत्सुतोऽभवत्। श्रावस्ती निर्मिताये
न गौडदेशे पुरी शुभा। श्रावस्ताद्बृहदश्वस्तु बृहदश्वोऽभवत्ततः। बृहद
श्वात्तनोयज्ञे कुवलाश्व इति स्मृतः। धुंधुमारत्वमापन्नो हत्वा धुंधुमहा

व त्तां। धुंधुमारस्य तनया त्रयः त्रैलोक्यविश्रुताः दृढाश्वश्चैव दंडाश्वः क
पिलाश्वश्च ते स्मृताः। दृढाश्वस्य प्रसेनस्तु हर्यश्वस्तस्य वै सुतः। हर्यश्व
स्य निकुंभस्तु संहताश्वश्च तत्सुतः। कृशाश्वो वरुणाश्वास्यु संहतस्यात्मजा श्व २
वुभौ। युवनाश्वो रणाश्वस्य मांधाता तस्य वै सुतः। मांधातापुरुकुछोभू
दंबरीषश्च वीर्यवान्। मुचुकुंदश्च पुण्यात्मा त्रयस्त्रैलोक्यविश्रुताः। अंब
रीषस्य दायादो युवनाश्वोपरः स्मृतः। हरितो युवनाश्वस्य हरितास्तयतः
स्मृताः। एते ह्यंगिरसः पक्षे क्षत्रोपेता द्विजातयः। पुरुकुछस्य दायादः १८७
त्रसदस्युर्महायशाः। संभूतिरपरं पुत्रमनरण्यमजीजनत्। रावणेन ह
तो योसौ त्रैलोक्यविजये द्विजाः। पृषदश्वो नरण्यस्य हर्यश्वस्तस्य चात्मजः
हर्यश्वात्तु दृषद्वत्यां जज्ञे वसुमना नृपः। तस्य पुत्रोभवद्राजा त्रिधन्वा भव

भावितः। प्रसादात् ब्रह्मसूनोर्वै तंडिनः प्राप्य शीर्ष्यंतो। अश्वमेधस
हस्रस्य फलं प्राप्य तदाज्ञया। गाणेश्वरमनुप्राप्तो भव भक्तप्रतापवा
न्। कथं हि वाश्वमेधं वै करोमीति प्रचिंतयन्। धनहीनस्य धर्मात्मा
दृष्टवान् ब्राह्मणं सुतं। तंडीसंज्ञं द्विजं तस्माल्लब्धवान् नृपसत्तम॥
नाम्नां सहस्रं रुद्रस्य ब्रह्मणा कथितं पुरा। नाम्नां सहस्रं जप्त्वा वै क
र्मेति प्रचिंतयन्। गाणपत्यमवाप्तवान्॥ ॥ऋषय ऊचुः॥ १
नाम्नां सहस्रं रुद्रस्य तंडिना ब्रह्मयोनिना। कथितं सर्ववेदार्थसं
चितं तद्वद सुव्रता। नाम्नां सहस्रं विप्राणां वक्तुमर्हसि शोभनं॥ ॥सू
त उ॥ ॥सर्वभूतात्मभूतस्य हरस्यामिततेजसः। अष्टोत्तरसहस्र
तु नाम्नां शृणुत सुव्रताः। यः श्रुत्वा मानवः प्राज्ञो भुयाद्गणसंपदं।

॥ ॥३॥ स्थिरः स्थाणुः प्रभुर्भानुः प्रवरो वरदो वरः॥ सर्वात्मा सर्ववि
ख्यातः सर्वः सर्वकरो भवः। जटिदंडी शिखंडी च सर्वगः सर्वभावन
हरिश्च हरिर्नेत्रश्च सर्वभूतहरः प्रभुः प्रवृत्तिश्च निवृत्तिश्च शांता
त्माशाश्वतो ध्रुवः। श्मशानचारी भगवान् खेचरो गोचरोर्दनः॥ अभि
वाद्यो महाकर्मा तपस्वी भूतधारणः। उन्मत्तवेशप्रछन्नः सर्वलोकप्र
जापतिः। महारूपो महाकायो महावेशो महायशाः। महात्मा सर्वभूत
श्च विश्वरूपोथ वामनः। स्वयंभु सर्वकर्मात्मा आदिरादिकरो निधिः॥ १०८।
सहस्राक्षो विशालाक्षः सोमो नक्षत्रसाधकः। चंद्रः सूर्यः शनिः केतुर्ग्र
होग्रहपतिर्दमः। अद्रिरप्यालयः कर्त्ता मृगबाणार्पणोनघः॥ महातपा
घोरतपा आदर्शो धनसाधकः॥ संवत्सरकृतो मंत्रः प्रमाणं परमं तपः॥

योगी योग्यो महाबीजो महारेता महाबलः॥ सवर्णरेता सर्वज्ञ सुबीजो
वृषवाहनः। दशबाहुस्त्वनिमिषो नीलकंठ उमापतिः। विश्वरूप
स्वयंश्रेष्ठो बलवीरो बलो गणः॥ गणकर्त्ता गणपतो दिग्वासा कामए
व च। मंत्रवित्परमो मंत्रः सर्वभावकरो हरः॥ कमंडलुधरो धन्वी बाणह
स्तकपालवान्। अशनीशतघ्नी खड्गी च पट्टिशी चायुधो महान्॥ अजश्च
मृगरूपश्च तेजस्तेजस्करो निधिः। उष्णीषी च सुवक्त्रश्च उदग्रो विनत
स्तथा। दीर्घश्च हरिकेशश्च सुतीर्थः कृष्ण एव च। शृगाल सर्वसर्वा
र्थमुंडः सर्वशुभंकरः॥ सिंहशार्दूलरूपश्च गंधधारी कपर्दी। ऊर्ध्व पर्व
रेता ऊर्ध्वलिंगी ऊर्ध्वशायी नभस्तलः। त्रिजटाश्चीरवासाश्च रुद्र सेना
पतिर्विभुः॥ अहोरात्रश्च नक्तश्च तिग्ममन्युः सुवर्चसः। गजहा दैत्यहा कालो

लोकधाता गुणाकरः ॥ सिंहशार्दूलरूपाणामार्द्रचर्मसदांबरः ॥ निशा
चरः प्रेतचारी भूतचारी महेश्वरः । बहुभूतो बहुध्यातः सर्वधार्योमितो ह
रः ॥ नृत्यप्रियो नित्यनृत्यो नर्त्तनः सर्वसाधकः ॥ घोरो महातपाः पाशो नि
त्यो गिरिरू विरोचनः ॥ सहस्रहस्तो विजयो व्यवसायो ह्यनिंदितः ॥ अम
र्षणो मर्षणात्मा यज्ञकामादिशासनः ॥ दक्षयज्ञपहारी च सहामध्य
मस्तथा । तेजोपहारी बलवान् वंदितो व्यर्थितो बुधः ॥ गंभीरघोषो गं
भीरो गंभीरबलवाहनः ॥ न्यग्रोधरूपो न्यग्रोधो विश्वकर्मा च विश्व
भुक् । तिक्ष्णोपयश्च हर्यश्वः सहायः कर्मकालवित् । विष्णुः प्रसादितो यज्ञः १९९
समुद्रो वडवामुखः । हुताशनः सहायश्च प्रशांतात्मा हुताशनः । उग्रतेजा
महातेजा जयो विजयकालवित् । ज्योतिषामयनः सिद्धिः संधिविग्रह एव च

शंखी शिखी जटी ज्वाली खेचरो द्युचरो बली । वैणीवी पणवी तन्त्री ना
ली च कटकस्तथा ॥ सर्वतूर्यनिनादी च सर्वव्याधिविमोचकः ॥ व्यालरू
पो बिलावासी गुहावासी तरंगवित् । वशः श्रीमांत्रहृल्लोककर्मबंध
विमोचकः ॥ बंधनस्त्वसुरेंद्राणां युधि शत्रुविनाशनः ॥ सांख्यप्रसादो दु
र्बोधिः सर्ववायुनिषेवितः ॥ प्रस्कंदो विभागश्च अतुल्यो यज्ञभागवि
त् । सर्ववासः सर्वचारी दुर्वासा वासवपुनः ॥ नीमो नीमकरो यज्ञः सर्व
धारी धरोत्तमः ॥ आकाशो निर्विकारूपश्च निर्वैरी कुंडपः खगः ॥ त्रिदृश्च
त्रिदेहरूपश्च रौद्ररूपः सुरूपवान् । वसुरश्मीः सुवर्चस्वी वसुवेगो महा
बलः ॥ मनोवेगो निशाचरः सर्वलोकसुखप्रदः ॥ सर्पवासात्रपावासः
संपदेशः कचोत्कचः ॥ मुनिरात्मा मुनिर्लोकिः सहस्रांशः सहस्रभुक् ॥

पक्षीचपक्षिरूपश्चअतिदीप्तोदिशांपतिः।दुर्मदोमर्दनःक्रूरोह्युर्य्यर्थिकं
रोयशः।वासुदेवश्चवामश्चप्रदक्षिणश्चवामनः।सिद्धयोगापहारीच
सिद्धिसर्वार्थसाधकः।अहरणाहरणरूपश्चवृषणोमृदुरव्ययः।महासे
नोविशाखश्चषष्ठिभागोगवांपतिः।शक्तिहस्तःप्रतिष्ठनी– चमू
२५ स्तंभएवच।कृताकृतकरःकालोमधुर्मधुकरोवरः।वानस्पत्योवा
जसनोनित्यमाश्रमपूजितः।ब्रह्मचारीलोकचारीसुचारीसर्वचारवि
त्।ईशानईश्वरःकालोदिव्याचारोअनेकधृक्।निमित्तस्थोनिमि २००।
त्तश्चनन्दिर्नन्दिकरोहरिः।नंदीश्वरःसुनंदीचनंदनोप्ययवर्द्धनः।
भगकारीनिहंताचकालोबलपितामहः।चतुर्मुखोमहालिंगश्चारु
लिंगस्तथैवचः।लिंगाध्यक्षसुराध्यक्षःकालाध्यक्षोयुगावहः।बी

जाध्यक्षोबीजकर्ताअध्यात्मानुगतोबलः।इतिहासश्चकल्पश्च त
मोहीजगदीश्वरः।दंभोदंभवहोदंभोवंशोवंशकरःकलिः।लोक
कर्ताप्रशुपतिर्महाकर्ताह्यधोक्षजः।अक्षरंचपरंधामबलवान्शु
क्रएवच।नित्योह्यनीशःशुद्धात्मासर्वात्मानोगतोगतिः।बहुप्रसाद
स्वप्नोदर्पणोथर्वमंत्रवित्।वेदकारःसूत्रकरोविद्वांश्चपरमर्द
नः।महामेघनिवासीचमहाघोरवशीकरः।अग्निज्वालोमहाज्वालो
अतिधूम्रोहुतोहविः।वृषणोशंकरोनित्योवर्चस्वीधूमकेतवः।नी
लस्तथांगलुब्धश्चशोभनोनिरवग्रहः।स्वस्तिस्वस्तिभावश्चभागी
भागकरोलघुः।उत्संगश्चमहांगश्चमहागर्भःपरायणः।कृष्णवर्ण
सुवर्णश्चइंद्रियःसर्ववर्णिकः।महापादोमहाहस्तोमहाकायोमहायशः।

महामूर्धा महानेत्रो महामायो महालयः। महांतको महाकर्णो म
हादंष्ट्रो महाद्रुमः। महानासो महाकंबुर्महाग्रीवः स्मशानहृक्
महावृक्षो महोरस्को ह्यंतात्मा मृगालयः। लंबनो लंबनोष्ठश्च म
हामायुः पयोनिधिः। महादेवो महादंष्ट्रो महाजिह्वो महासुरः। महा
नखो महारोमा महाकेशो महाजटः। असंपन्नप्रसादश्च प्रत्ययो गिरि
साधनः। प्रत्तिहनोऽकृपातश्च अर्द्दनश्च महामुनिः। वृषको वृषकेतुश्च
~~प्रत्ययोगिरिसाधनः~~। अनलो वायुवाहनः। मंडली मेघवाहश्च देवदा
नवदर्पहा। अथर्वशीर्षः सामास्यो ऋक्सहस्रौंजसः ~~यक्षु~~। यजुःपादभु २०१
ग जो गुह्यः प्रकाशो जः स्तथैव च। अमोघार्थः प्रसादश्च अंतर्गम्यः सुदर्शनः।
उपहारः प्रियः शर्वः कनकः कांचनस्थितः। नाभिर्नंदीकरो हव्यः पुष्करस्थ

जितौ

पतिस्थिरः। द्वादशस्त्रावरश्चाद्यो यज्ञो यज्ञसमाहितः। रक्तो नीलक
लिः कालो कमठः कालपूजितः। सगणो गणकारश्च भूतवाहनसा
रथी। भस्मशायी भस्मगोप्ता भस्मभूतस्तरुर्गणः। आगमश्च विलोप
श्च महात्मा सर्वपूजितः। शुक्लस्त्री शुक्लसंपन्नः शुचिर्भूतनिषेवितः।
आश्रमस्थः कपोतस्थो विश्वकर्मापतिर्वरः। विशालशाखस्ताम्रोष्ठो
ह्यंबुजालः सुनिश्चयः। कपिलः कपिशः स्थूलस्त्वायुश्चैव परोऽमरः।
गंधर्वो ह्यदितिस्तार्क्ष्यो ह्यविज्ञेयः सुमारदः। परश्वधायुधो देवो अ
र्धनारी सुपुंगवः। तुंबवीणो महाकोप ऊर्ध्वरेता जलेशयः। उग्रो वं
शकरो वंशो वंशवादी ह्यनिंदितः। सर्वांगरूपो मायावी सुहृदो ह्यनि
लोऽनिलः। बंधनो बंधकर्ता च सुबंधनविमोचनः। ससंज्ञारिश्च कोमारः

महादंष्ट्रा समायुधी। बाहुस्त्वनिर्मितः शर्वः शंकरो थाप्यकोपनः। अ
मरेशो महामेघो विश्वमेघः सुरारिहा। अहिर्बुध्न्यो निर्ऋतिश्च चेकि
तानो हरिस्तथा। अजैकपाच्च कापाली त्रंकुशजा महागिरा धन्व
न्तरिर्ध्रूमकेतुः सूर्यो वैश्रवणस्तथा। धाता विष्णुश्च शक्रश्च उग्रत्वष्टा
धरो ध्रुवः। प्रभावः सर्वगो वायुरर्यमा सविता रविः। धृतिश्चैव वि
धाता च मांधाता भूतभावनः। तीरं तीर्थश्च जीमस्थ सर्वकर्मगुण
वह। पद्मगर्भो महागर्भश्चंद्रवक्त्रो नलोनघा फलवांश्च पुराणश्च
एव कुसुम एव कुत्तमः। क्रूरकर्ता क्रूरवासी क्रूरभूतो महौषधः। स २०२
र्वाशयः सर्वचारी प्राणेश प्राणिनां पति। देवदेवसुखोत्सिक्त सदसत्स
र्वरत्नवित्। कैलासस्थो गुहावासी हिमवज्गिरिसंश्राय। कुलहारी कुल

सि २

कर्त्ता बहुजीवो बहुप्रजा। वसुभृत्सर्वभूतात्मा निश्चलः सविमुर्त्तु
वः। अमोघसंन्नायो ह्यश्वपौ गंडोप्राणधारणं। धृतिमान्मतिमान्
अदक्ष संकृतश्च युधांपति। गोपालो गोपतिर्ग्रामो गोचर्मवसनो हरः
हिरण्यबाहुश्च तथा गुहापालः प्रवेशिनां। महामनो महाकायो म
तै हर्षो विजितेंद्रियः। संधानश्च सुरूपश्च तथा कर्मकरो हरः। महागी
तो भूतनृत्तो ह्यप्सरोगणसेवितः। महाकेतुर्मनोधातुर्नैकतानरतः
स्वयं। अवेदनीय आवेशः सर्वगश्च सुखावह। तारणो धारणो धाता
परबाधनिवारकः। संयोगी वर्धनो वृद्धो महावृद्धो गुणाधिकः। नि
त्यात्मसहायश्च देवासुरपतिः पति। युक्तश्च युक्तबाहुश्च देवावि
धिस्क्तपर्वणः। आषाढश्च सुषाढश्च ध्रुवदो हरिदो वरः। वसुरावर्त्त

मानोन्यो वपुश्श्रेष्टो महापथः। शिरो विमर्शनिः सर्वसर्वलक्षणभूषि
तः। अक्षीच सर्वयोगीच सर्वक्रीडी महाबलः। साम्नायोथ महा
म्नायस्तीर्थदेवो महातपाः। निजीर्वनो मंत्रसुगो विनिंद्योबहुकर्क
शः। रत्नभूतोथ रत्नांगो महार्णवनिनादवान्। मूलं विशालो ह्यमृतो
व्यक्ताव्यक्तस्तपोनिधी। आरोहणो विरोहश्च शीलधारी महातपाः
महाकल्पो युगाद्योगी युग्यो युगकरो हरिः। युगरूपो महारूपो वनगा
गहनो नगः। न्यायनिर्वचनः पादपंडितो ह्यचलोपमः। बहुमालो महा २०२
मालस्सिमिलीकः सुलोचनः। विस्तरोलवणः कूपकुसुमांगफलोदयः
ऋषभो वृषभो नंगो मणिजीवी जटाधरः। इंदुर्विसर्गस्सुमुखः सूरस
र्वायुधः सहः। निवेदनस्सुताजातः सर्गद्वारो महाधनुः गिरिं सारो विस

र्गश्च सर्वलक्षणलक्षवित्। गंधमालीच भगवानूर्ध्वराकः स्मक
र्मतिः। साधनो बहुलो बाहुः सकलः सर्वपावनः। तलस्याली
करस्याली ऊर्ध्वसंहननो वहः। यंत्रतंत्रसुविख्यातो लोकसर्वा
श्रयो द्विजः। मंडो विरूपो विकृतो दंडी कंडी विकुर्वणः। वार्यक्ष
ककुभो वाजी दिप्ततेजास हस्रपात्। सहस्रमूर्धा देवेंद्रः सर्वदे
वमयो गुरुः। सहस्रबाहुः सर्वांगः शरण्यः सर्वलोककृत्। पवित्र
त्रिमधुर्मंत्रकनिष्टः कृष्णपिंगलः। ब्रह्मदंडविनिर्माता। शतघ्नशात
पाशध्वक। कालंकाष्ठाकलामात्रामुहूर्ताहक्षिपाक्षणः। विश्वक्षेत्र
प्रदो बीजलिंगमाद्यस्तनिर्मलः। सदसव्यक्तमव्यक्त पितामातापि
तामहः। सर्गद्वारं प्रजाद्वारं मोक्षद्वारं त्रिविष्टपं। निर्वाणहृदयं चैव

ब्रह्मलोकः परा गतिः। देवासुरगणाध्यक्षो देवासुरगणाग्रणीः। देवाधि
देवो देवर्षिर्देवासुरवरप्रदः। देवासुरेश्वरो विश्वो देवासुरमहे
श्वरः। सर्वदेवमयोऽचिंत्यो देवतात्मात्मसंभवः। उद्भिदस्त्रिक्रमो वै
द्यो वरदो वरजो वरः। दीपी हस्ती तथा व्याघ्रो देवसिंहो महर्षभः।
विबुधाग्रचरः श्रेष्ठः सर्वदेवोत्तमोत्तमः। गुरुकांतो निजः सर्वपवि
त्रः सर्ववाहनः। प्रयुक्तः शोभनो वज्र ईशानः शंभुरव्ययः। शृंगी शृं
गप्रियो बभ्रू राजराजो निरामयः। अभिरामः सुरगणो विरामः स
र्वसाधनः। ललाटाक्षो विश्वदेहो हरिणो ब्रह्मवर्चसः। स्थावराणां प २०४।
तिश्चैव नियमेंद्रियवर्धनः। सिद्धार्थः सर्वभूतार्थो नित्यसत्यव्रतः शु
चिः। व्रतादीर्यपरं ब्रह्म मुक्तानां परमा गतिः। विमुक्तो दीप्ततेजाश्च श्रीमा

न् श्रीवर्धनो जगत्। महाप्रसादो भगवानिति युक्तास्ततो नयाऽ
ष्टोत्तरसहस्रं तु नाम्नां कृत्वैव सुव्रताः। पठित्वा रुद्रसालोक्यं पुमा
न्नाप्नोत्य संशयः॥ ॥इति श्रीलैंगे पंचषष्टितमोऽध्यायः॥
पितात्वेन मथो वा च श्वपाकैः सह वर्त्तयः। इत्युक्तः स निराक्रामन्नग
राद्वचनात्पितुः। स तु सत्यव्रतो धीमान् श्वपाकावसथांतिके। पित्रा
त्यक्तो वसद्वीरः पिता चास्य वनं ययौ। स एव लोके विख्यातस्त्रिशंकु
रिति विश्रुतः। वसिष्ठकोपात्सुधर्मात्मा राजा सत्यव्रतः पुरा। विश्वामि
त्रो महातेजास्त्रिशंकुं नृपसत्तमं। राज्येऽभिषिच्य तं पित्र्ये याजयामा
स तं पुरा। मिषतां देवतानां च वसिष्ठस्य च कौशिकः। सशरीरं तदा
तं वै दिवमारोपयद्विभुः। तस्य सत्यधना नाम भार्या केकयवंशजा॥

कुमारं जनयामास हरिश्चंद्रमकल्मषं। हरिश्चंद्रस्य च सुतो रोहितो
नाम वीर्यवान्। हरितो रोहितस्याथ धुंधुर्हारितउच्यते विजयश्च सु
देवश्च धुंधुपुत्रो बभूवतुः। जेता क्षत्रस्य सर्वस्य विजयस्तेन सः स्मृतः
कुरकस्तस्य तनयो राजा परमधार्मिकः। द्वे भार्ये सगरस्यापि प्रभा भा
नुमती तथा। ताभ्यामाराधितः पूर्वमौर्वोग्निः पुत्रकाम्यया। और्वस्तुष्ट
स्तयोः प्रादाद्यथेष्टं वरमुत्तमं। एका षष्टिसहस्राणि सुतमेकं परा त
था। अग्रहद्दंशकर्तारं प्रभा गृह्णान् सुतान् बहून् ~~सुतान् बहून्~~ २०५
एकं भानुमती पुत्रमगृह्णाद्समंजसं। ततः षष्टिसहस्राणि सुषुवे या
दवी प्रभा। खनंतः पृथिवीं दग्धा विष्णुना ये च मार्गणाः। असमंजस्तु तन
यो सोंशुमान्नाम विश्रुतः। तस्य पुत्रो दिलीपस्तु दिलीपात्तु भगीरथः।

येन भागीरथी गंगा तपः कृत्वावतारिता। भगीरथसुतश्चापि श्रुतो
नाम बभूव ह। नाभागस्तस्य दायादो भवनकः प्रतापवान्। अंबरी
षसुतस्तस्य सिंधुद्वीपस्ततोभवत्। नाभागेनांबरीषेण सिंधुद्वीपे
न पालिता। प्रबभूव प्रजात्यर्थं तापत्रयविवर्जिता। अयुतायुश्च त
स्तस्य सिंधुद्वीपस्य वीर्यवान्। पुत्रोयुतायुषो धीमान् ऋतुपर्णो महा
यशाः। दिव्याक्षहृदयज्ञोसौ राजा नलसखो बली। नलौ द्वावेव विख्या
तौ पुराणेषु दृढव्रतौ। वीरसेनसुतश्चान्यो यश्चेक्ष्वाकुकुलोद्भवः। ऋत्
तः कल्माषपादो वै नाम्ना मित्रसहश्च सः। वसिष्ठश्च महातेजाः क्षेत्रे
कल्माषपादके। अश्मकं जनयामास तमिक्ष्वाकुकुलोद्भवं। अ
श्मकस्योत्कलायां तु उत्कलश्च सुतोभवत्। स हि राम नया द्वजास्त्री

भिः परिवृतश्चरन्। नारीकवच इत्येव ततः ख्यातिमुपागमत्। उत्कल
स्यापि धर्मात्मा राजाऽनरण्यः सुतः। तस्माच्छतरथाज्जज्ञे राजा त्विलि
विलो बली। आसीत्त्वैलिविलः श्रीमान् कृत्स्ने धर्मप्रतापवान्। पुत्रो
विश्वसहस्तस्य पितृकस्याप्यजायत। दिलीपस्तस्य पुत्रोऽभूत् खट्वाङ्ग इ ख ४
ति विश्रुतः। येन स्वर्गादिहागत्य मुहूर्तं प्राप्य जीवितं। त्रयोऽग्निः सं
धिता लोका बुध्या सत्येन चैव हि। दीर्घो नाम सुतस्तस्य रघुस्तस्माद
जायत। अजः पुत्रो रघोश्चापि तस्माज्जज्ञे तु वीर्यवान्। राजा दशरथो २०६
नाम श्रीमानिक्ष्वाकुवंशकृत्। रामो दाशरथिर्वीरो धर्मज्ञो लोकविश्रु
तः। भरतो लक्ष्मणश्चैव शत्रुघ्नश्चेति तत्सुताः। तेषां ज्येष्ठो महातेजा रा
मो राजीवलोचनः। रावणं सगणं हत्वा यज्ञैरिष्ट्वा च धर्मवित्। एकादश

सहस्राणि राज्यं कृत्वागमद्बली। रामस्य तनयो यज्ञे कुश इत्यभि
विश्रुतः। लवश्च सुमहातेजाः सर्वतत्त्वार्थवित्सुधीः। अतिथिस्तु कुश
जज्ञे निषधस्तस्य चात्मजः। नलस्तु निषधात्तस्मान्नभस्तस्मादजाय
त। नभसः पुण्डरीकाख्यः क्षेमधन्वा ततः स्मृतः। तस्य पुत्रोऽभवद्वी श्रो ४
रो देवानीकः प्रतापवान्। अहीनगुः सुतस्तस्य सहस्राश्वस्ततः परः। च स्त ५
न्द्रश्चन्द्रावलोकस्तु तारापीडस्तथाऽभवत्। तस्यात्मजश्चन्द्रगिरिर्भा
नुमित्रस्ततोऽभवत्। श्रुतायुरभवत्तस्माद् बृहद्बल इति स्मृतः। भार
ते यो महातेजाः सौभद्रेण निपातितः। एते इक्ष्वाकुदायादा राजानः
प्रायशः स्मृताः। वंशे प्रधाने ये तस्मिन् प्राधान्येन प्रकीर्त्तिताः। सर्वे पाशु
पतज्ञानमधीत्य परमेश्वरं। समभ्यर्च्य यथान्यायमिष्ट्वा यज्ञैर्यथाविधि।

दिवं गता महात्मानः केचिन्मुक्तात्मयोगिनः। धृष्टस्य धृष्टकेतुश्च
चभूतातश्च वीर्यवान्। रणधृष्टश्च ते पुत्रास्त्रयः परमधार्मिकाः। आ
नर्त्तानाम सर्यातिः सुकन्या चैव दारिका। आनर्त्तस्यात्मजस्तु रोचमानः
प्रतापवान्। रोचमानस्य रेवोऽभूद्रेवाद्रैवतयेवचानकुशिश्चापं राज्येष्ठ
ः पुत्रपुत्रशतस्य तु। रेवती यस्य सा कन्या भार्या रामस्य विश्रुता।
करूषिदत्तस्य पुत्रोऽभूत् अह्नो नाम महाबलः। नाभागस्यांबरीषस्य विष्णुभक्तः
प्रतापवान् नृ। कृतस्तस्य सुतः श्रीमान् सर्वधर्मविदांवरः। ततः कृतस्य २०१
कार्यश्च एवतोऽनुवितस्तुतः। एवतो हिंसयत्वात्तु गुरोः शापमुकल्पवं
शाद्धाधूद्रत्वमापन्नः श्चैधेनधम- ःस्मृतः। दन्तपुत्रेति विख्यातो राजा
सीद्राज्यवर्द्धनः। एते समासतः प्रोक्ता मनुपुत्राः सहानुजाः। इक्ष्वाको पु

त्रपौत्राश्च इलस्यापि वदामि ते॥ ॥सूत उ॥ ॥ऐलः पुरूरवानाम नव म
क्तः प्रतापवान्। चक्रे त्वकंटकं राज्यं देशे पुण्यतमे द्विजाः। उत्तरे यमुना
याश्च प्रयागे मुनिसेविते। प्रतिष्ठानमिति ख्याते स तत्रैव प्रतिष्ठितः।
तस्य पुत्रा बभूवुर्हि षड् इन्द्रसमतेजसः। त्रैलोक्यवेदिताः सर्वे भव भ
क्ता महाबलाः। आयुर्वायुरमावायुर्विश्वायुश्चैव वीर्यवान्। श्रुतायु
श्च रूतायुश्च दिव्याश्चैवोर्वशीसुताः। आयुषस्तनया वीराः पंचैवास
न्महौजसः। स्वर्भानुतनयायां ते प्रभायां जज्ञिरे नृपाः। नहुषः प्रथमः
स्तेषां धर्मज्ञो लोकविश्रुतः। नहुषस्य तु दायादाः षड् इन्द्रसमतेज
सः। उत्पन्नाः पितृकन्यायां विरजायां महौजसः। यतिर्ययातिः संया
तिरायातिश्च तथांधकः। यतिर्मोक्षं समास्थाय ब्रह्मभूतोऽभवन्मुनिः

तेषांययातिःपंचानांज्येष्ठोराजाबभूवह।देवयानीमुशनसःसुतांभार्या
मवापसः।शर्मिष्ठामासुरींचैवतनयांवृषपर्वणः।यदुंचतुर्वसुंचैवदे
यानीव्यजायत।तौसुतौश्रुतकर्माणौश्रुतौविप्राविचारतं।द्रुह्युंचा
नुंचपूरुंचशर्मिष्ठावार्षपर्वणी।अस्त्राणिचरथंतस्मैददौशक्रःप्रता
पवान्।तोषितःस्तेनविप्रेन्द्रःप्रीतःपरमभास्करं।असंगंकांचनंदि
व्यं।अक्षयेचमहेषुधी।युक्तंमनोजवैरश्वैर्येनकन्यांसमुद्वहन्।सो
तेनरथमुख्येनषड्रात्रेणाजयन्महीं।ययातिर्युधिदुर्धर्षोदेवदा २०८
नवमानवैः।नवनक्रसुपुण्यात्माधर्मनिष्ठोजितक्रमः।यज्ञयाजीजि
तक्रोधःसर्वभूतानुकंपनः।पौरवाणांचसर्वेषांसोभवद्रथउत्तमः।या
यंवान्तरेद्रुपवरःकौरवोजनमेजयः।कुरोःपुत्रस्तुराज्ञस्तुराज्ञःपरिक्षि

तःस्यह।जेगामस्वरथोनश्यत्शापाद्गर्गस्यधीमतः।गर्गस्यहिसु
तंबालंसराजाजनमेजयः।वाक्क्रूरंहिंसयामासब्रह्महत्यामवा
पसः।सलोहगंधीराजर्षिःपरिधावन्नितस्ततः।पौरजानपदैस्त्यक्तो
नलेभेशर्मकर्हिचित्।ततःसुदुःखसंप्राप्तोनलेभेसंविदंक्वचित्।ज
गामशौनकमृषिंशरणंव्यथितोतिथीः।इंद्रोतिनामविख्यातोयोसौ
मुनिरुदारधीः।याजयामासकारुण्यात्शौनकोजनमेजयं।अश्व
मेधेनराजानंपावनार्थंद्विजोत्तमः।सलोहगंधःनिर्मुक्तःस्तम
सश्चमहायशाः।तस्यावभृथमासाद्यसवद्दिव्योरथःशुभः।तस्मा
द्वंशात्परिभ्रष्टोवसोश्चेदिपतेःपुनः।दत्तःशक्रेणतुष्टेनलेभेतस्मा
द्बृहद्रथः।ततोहत्वाजरासंधंभीमस्तंरथमुत्तमं।प्रददौवासुदेवाय।

प्रीत्या कौरवनंदनः॥ ॥सूत उवाच॥ ॥अभिषिंचतुरं पुत्रं ययातिर्नि
हुषः प्रभु। कृतोपकारस्तेनैव पुरूणो द्विजपुंगवा॥ अभिषेक्तुं कामं स
च नृपं पुरुं पुत्रं कनीयसं। ब्राह्मणः प्रमुखा वर्णा इदं वचनमब्रुवन्।
कथं शुक्रस्य नप्तारं देवयान्याः सुतं प्रभो। ज्येष्ठं पुत्रमतिक्रम्य कनीया
नू राज्यमर्हती॥ ॥ययातिरु॥ ॥ब्राह्मणः प्रमुखाः सर्वे वर्णाश्चैव
तु मे वचः। ज्येष्ठः प्रतिरथो राज्यं न मे देयं कथंचन। मम ज्येष्ठेन यदुना
या नियोगो नैव पालितः। प्रतिकूलमतिर्यस्तु न स पुत्रः सतां मतः। स २०७
पुत्रः पुत्रवाद्यस्तु वर्तते पितृमातृषु। यदुनाहमवज्ञातस्तथा तुर्वसुना
पि च। द्रुह्येणा चानुना चैवममावज्ञा कृता भृशं। पूरुणा च कृतं वाक्यं मा
नितश्च विशेषतः। कनीयान्मम राज्यार्हो जरा जेन धृता मम। शुक्रेण मे स



मादिष्टा देवयान्याः कृते जरा। प्रार्थितेन पुनस्तेन जरा संचारिणी कृता। शु
क्रेण च वरो दत्तः प्रार्थितेन मया स्वयं। पुत्रो यस्त्वानुवर्तेत स ते राज्यप्रव
र्त्तिती। भवतामप्यनुज्ञातः पुत्रं राज्येभिषिंचये॥ प्रकृतय ऊ॥ ॥यः
पुत्रो गुणसंपन्नो मातापित्रोर्हितः सदा। वरदानाच्च शुक्रस्य न शाक्यं
कर्तुमन्यथा॥ ॥सूत उ॥ ॥पौरजानपदैस्तुष्टैरित्युक्तो नाहुषस्तथा।
अभिषिच्य ततः पूरुं राज्ये सुतमात्मनः। दिशि दक्षिणपूर्वस्यां तुर्वसुं
पुत्रमादिशत्। दक्षिणापरयोराजा यदुं ज्येष्ठं नियोजयेत्। प्रतीच्यामु
त्तरायां तु द्रुह्यं चानुं च तावुभौ। सप्तद्वीपां ययातिस्तु जित्वा पृथ्वीं स
सागरां। व्यभजत्पंचधा राजा पुत्रेभ्यो नाहुषस्तदा। तैरियं पृथिवी स
र्वा सप्तद्वीपा ससागरा। यथाप्रदेशमद्यापि धर्मेण प्रतिपाल्यते। एवं विभ

हिरण्यं पशवः स्त्रियः। नालमेकस्य पर्याप्तमिति मत्वा शमं कुर्वेत्। यदा न कुरुते
भावं ५

अपृथिवीं पुत्रेभ्यो नाकुर्वस्तदा। प्रीतिमानभवद्राजा भारमावेश्य बंधु
षु। पुत्रसंक्रामितश्रीस्तु हर्षनिर्भरमानसः। तेन गाथा महाराज्ञा हर्षगी
ता ययातिना। यो ति प्रीत्याहरेत्कामान् सर्वशोंगानि कूर्मवत्। सो तिमाति
नरः श्रीमान् नान्यथा कर्मकोटिभिः। न जातु कामः कामानामुपभोगेन शाम्य
ति। हविषा कृष्णवर्त्मेव भूय एवाभिवर्त्तते। यत्पृथिव्यां व्रीहियवं सर्वं भूते
षु दारुणं। कर्मणा मनसा वाचा ब्रह्म संपद्यते तदा। यदुस्त्यक्तुं दुर्मति
भिः। जीर्यते या न जीर्यते। चक्षुःश्रोत्रे च जीर्येते तृष्णैका न तु जीर्यते। जीर्यं २१०
ते देहिनः सर्वे स्वभावादेव नान्यथा। जीविताशा धनाशा च जीर्यतोपि
न जीर्यते। यच्च काममुखं लोके यदिदं च महत्सुखं। तृष्णाक्षयसुखस्य
व कलां नार्हति षोडशीं। एवमुक्त्वा स राजर्षिः सदारः प्रविशद्वनं। भृगु

तुंगे तपः कृत्वा तत्रैव च महायशाः। साधयित्वा त्वनशनं स दारः
स्वर्गमाप्तवान्। तस्य वंशास्तु पंचेमे पुण्या देवर्षिसत्कृताः। यैर्व्या
प्ता पृथिवी कृत्स्ना सूर्यस्येव मरीचिभिः। धन्यः प्रजावानायुष्मान् की
र्तिमांश्च भवेन्नरः। ययातिचरितं पुण्यं पठञ्छृण्वंश्च बुद्धिमान्॥
इति श्रीमहापुराणे लैंगे सोमवंशे ययातिचरिते षट्पंचाशत्तमोध्या
यः॥ ॥सूत उवाच॥ ॥यदोर्वंशं प्रवक्ष्यामि ज्येष्ठस्योत्तमतेजसः। संक्षेपे
णानुपूर्व्याच गदतो मे निबोधत। यदोः पुत्रा बभूवुर्हि पंच देवसुतो
पमाः। सहस्रजित् सर्वजिच्च क्रोष्टुर्नीलो ऽजितो लघुः। सहस्रजित्सुतस्तस्य
शतजिन्नाम विश्रुतः। सुताः शतजितो ख्याता नाम त्रयः परमधार्मिकाः
हैहयश्च हयश्चैव राजा वेणुहयश्च यः। हैहयस्य तु दायादो धर्मनेत्र इति

स्मृतः। धर्मनेत्रस्य कीर्त्तिस्तु संज्ञितस्तस्यात्मजः। संज्ञितस्य तु दाया
दो महिष्मान्नाम धार्मिकः। आसीन्महिष्मतः पुत्रो भद्रश्रेणी प्रतापवान्
भद्रश्रेण्यस्तु दायादो दुर्दमो नाम पार्थिवः। दुर्दमस्य सुतो धीमान् कन
कस्तस्य वृत्त। चरको नाम पार्थिवः। चरकस्य तु दायादाश्चत्वारो लो
कसंमताः। कृतवीर्यः कृताग्निश्च कृतवर्मा तथैव च। कृतौजाश्च चतुर्थो
भूत् कार्त्तवीर्यकृतार्जुनः। जज्ञे बाहुसहस्रेण सप्तद्वीपेश्वरेश्वरः। तस्य श
मस्तदा त्वासीन्नृसिंहो नारायणांशजः। तस्य पुत्रशतान्यासन् पंच तत्र महार २१९
थाः। कृतास्त्रा बलिनः शूरा धर्मात्मानो मनस्विनः। सूरश्च सूरसेनश्च
धृष्टी क्रोधस्तथैव च। जयध्वजश्च राजाभूववेतिश्च विशांपतिः। जय
ध्वजस्य पुत्रोभूत्तालजंघो महाबलः। शतं हि तालजंघस्य तालजंघाः

ता०म

तालजंघास्तथैव च। सूरश्च सूरवीराश्च शूरसेनाश्च चानघाः। शूरसेना इति ख्यात ६

स्तिस्मृताः। तेषां ज्येष्ठो महावीर्यो वीतिहोत्रो भवन्नृपः। वृषप्रभृतयश्चा
न्ये यादवाः पुण्यकर्मिणः। वृषो वंशकरस्तेषां तस्य पुत्रो भवन्मधुः। म
धोः पुत्रशतं त्वासीत्। वृषणीस्तस्य वंशभाक्। वृषणात् सत्वयः सर्वे म
धोर्वै माधवाः स्मृताः। यादवा यदुवंशेन निरुच्यन्ते च हैहयाः। तेषां पं
चगणा ह्येते हैहयानां महात्मनां। वीतिहोत्राश्च भोजाश्च तथा चावन्त
यः परे। तुण्डिकेराश्च विख्यातास्तथा तेषां महात्मनां। वी। तिहोत्र
सुतश्चापि विश्रुतो नर्त्तसुतः। दुर्मेधस्तु तस्य बभूवामित्रकर्ष
णः। क्रोष्टोश्च शृणु वंशं वै राजर्षि पौरुषं। यस्यान्ववाये संभूतो विष्णु
र्वृष्णिकुलप्रभुः। क्रोष्टोरेकोभवत्पुत्रो वृजिनीवान् महायशाः। तस्य
पुत्रोभवद्राजा त्रिशंकुर्वदतां वरः। त्रिशंकोस्त्वभवत्पुत्र रूपजाः प्रजातन्तः
न्त्र

महाक्रतुभिरिष्टीजे सो विविधैराप्तदक्षिणैः। लेभे चित्ररथं पुत्रं पुत्रकर्मनिर
न्वितैः। अथ चैत्ररथिर्वीरो यज्वा विपुलदक्षिणः। शशबिन्दुस्स वै राजा अन्वया
छ तमुत्तमं। चक्रवर्त्ति महासत्वो महावीर्यो महाप्रजाः। शशबिन्दोस्तु पुत्राणां
सहस्राणामभूच्छतं। सन्तीह पुराणज्ञास्तस्यात्मजमनन्तकं। अनन्तका
त्तु यज्ञस्तु यज्ञस्य तनयो धृतिः। उशनास्तनयस्तस्य संप्राप्य महीमि
मां। आजहाराश्वमेधानां शतमुत्तमधार्मिकः। स्मृतयोशनसः पुत्रः
शितेषु जितपार्थिवः। मरुत्तस्य तनयो राजर्षिर्वंशवर्धनः। वीजरः कं २१२
बलबर्हिश्च मरुत्तः स्तनयस्मृतः। पुत्रस्तु रुक्मकवचो विद्वान् कंबलबर्हि
षः। निहत्य रुक्मकवचो वीरान् कवचिनो रणे। धन्विनो निशितैर्बाणैरवा
पः श्रियमुत्तमां। अश्वमेधे तु धर्मात्मा ऋत्विग्भ्यः पृथिवीं ददौ। जज्ञिरे रुक्म

भा॰ श्री

ज्या॰ २५

कवचात् परावृत्परवीरहा। जज्ञिरे पंच पुत्रास्तु महासत्वापरावृतः। रुक्मे
षुः पृथुरुक्मश्च ज्यामघः परिघो हरिः। परिघं च हरिं चैव विदेहेषु पिता न्य
सत्। रुक्मेषुरभवद्राजा पृथुरुक्मस्तथाश्रयात्। तेभिः संपाद्धि ते राज्ये। मे ज्या
मघः सुतश्राश्रमे। प्रशान्ते स वनकेन्नोजे प्रसन्नाद्वारमाप सः। जंगाम धनुरा
दाय देशमन्यं ध्वजी रथी। नर्मदाकूलमेकाकी मेखलां कृत्तिकावतीं। २५
ऋक्षवन्तं गिरिं गत्वा शुक्तिमत्यामुवास सः। ज्यामघस्याभवद्भार्या शैब्या बल घ
वती सती। राजपुत्रसुतायां तु विद्वांसौ क्रथकैशिकौ। पुत्रौ विदर्भराजाय
यज्ञे शूरौ रणविशारदौ। रोमपादस्तृतीयस्तु बभ्रुस्तस्यात्म
जः धियः। आभूतिस्तनयस्तस्य धिजः परमधार्मिकः। कैशिकस्य सु
तश्चेति। यस्माच्चैद्यान् नृपास्मृताः। क्रथो विदर्भस्य सुतः कुन्तिस्तस्यात्मजोऽभवत्।

कुंतान्वृसिंस्ततोयज्ञे रुणधृष्टः प्रतापवान्।रुणधृष्टसुतोयज्ञे निवृत्ति
परवीरहा। दशार्हो नैवृतेश्चापी नाम्ना विशणसूदनः। दशार्हस्यसुतोव्योमोजी
मूतउच्यते। ~~दशार्हो नैवृतेश्चापी दशार्हो नैवृतैश्चापी~~। जीमूतंपुत्रो विकृति
: तस्य भीमरथः सुतः। तस्य भीमरथस्यासीत्पुत्रो नवरथः किल। दानध
र्मरतो नित्यं सत्यशीलपरायणः। तस्य चासीद्दृढरथः शकुनीस्तस्य चात्मजः
तस्मात्करंभसंभूतो देवरातो भवत्यतः। देवरातोभवद्राजा देवगर्भो महा
यशाः। देवगर्भाद्धिमोयज्ञे मधुस्तस्मादजायत। मधोश्च वंशात्कुद्राजा प्र
ख्यातं पुरुषस्त्वभूत्। आसित्पुरुषपुत्रस्तु भस्रएवान्पुरुषोत्तमः। जज्ञे
भस्रएवान्वै देशां भद्रारव्यायां प्रतर्दनः। ऐक्ष्वाकी चाभवद्भार्या तस्यां यज्ञे
त्रनर्दनात्। सत्ववान्गुणसंपन्नो सात्वतः कुलवर्द्धनः। यामघस्यमयाप्रो २१३

क्रोष्टुर्वैविस्तरेणतु। यः पठेत्शृणुयाद्वापी धारयेद्धारयेत्तु यः। प्र
जावानृवित्तवान्धीमान्भवेज्जन्मनि जन्मनि। ॥इतिलैंगेसोमवंशो
सप्तत्रिंशत्तमोध्यायः॥ ॥सूत उ॥ ॥सात्वतः सत्वसंपन्नः प्रजज्ञे
चतुरः सुतान्। कुकुरंभजमानं च दिव्यं देवावृधं नृपं। अंधकं च
महाभागं वृष्णिं च यदुनंदनः। तेषां निसर्गांश्चतुरः शृणुध्वं विस्तरे
ण वो। भजमानस्य सृंजय्यां भजमाना द्विजज्ञिरे। अयुतायुः सहस्रायुः
बलवान्देवीकः परः। अथ देवावृधो राजा चचार परमं तपः। पुत्रः
सर्वगुणोपेतो मम भूयादिति प्रभुः। जातो बभ्रुरिति ख्यातः पुण्यश्लो
कोनृपोत्तमः। पुरुषाः पंच षष्टिश्च षट्सहस्राणि चाष्ट च। येमृतत्व
मनुप्राप्ता बभ्रोर्देवावृधादिति। यज्ञदानपतिर्वीरो ब्रह्मण्यः सुदृढः

युधः कीर्त्तिमांश्च महातेजाः सात्वतानां महारथः। तस्यान्वये च सं
भूता यादवा देवतोपमाः। गांधारी चैव माद्री च वृष्णेर्भार्ये बभूवतुः
गांधारी जनयामास सुमित्रं मित्रनंदनं। माद्री युधाजितं पुत्रं ततस्तौ दे
वमीढुषं। अनिमित्रं सुतं चैव प्रसूतः पुरुषोत्तमः। अनमित्रसुतो निघ्नो
निघ्नस्य द्वौ बभूवतुः। प्रसेनश्च महाभाग सत्राजिच्च सुतावुभौ। तस्य स
त्राजितस्यासीत् सूर्यः प्राणसमः सखा। [illegible] स्यमंतकं दत्तौ तस्मै सखा स
ख्येन कर्मणा। कदाचिन्मृगयायातः स हतेन प्रसेनजित्। बध्वा स ११८
सहाश्वः केसरिहा द्विसुदारुणेन। अनमित्रात्त्वनिर्यज्ञे कनिष्ठाद्वृ
ष्णिनंदनात्। ततः शूरोभव तस्माज्जातश्चानकदुंदुभिः। तस्माद्विजा [illegible]
देवक्यां जाता कीर्तिमदादयः। कंसेन हतास्ते जननन्तु [illegible] केति च हताश्च षट्
म॰

हत्वा सुधर्मश्च भगवाननंतो रजतप्रभः। गुणपाच्छसेनेव मानुषं तनुमा
स्थितः। बभूव तस्यां देवक्यां वसुदेवाज्जनार्दनः। २
सप्तमो वै समवेधाम देवक्या जठरात्तदा। न वेत्ति तस्तु रोहिण्या उद
रे योगमायया। अष्टमे तु देवक्या गर्भे यत्तस्तु यं हरिः। स एव पर
मात्मासौ देवदेवो जनार्दनः। उमा देह समुद्भूता कौशिकी योगनिद्
रा। नियोगाद्देवदेवस्य यशोदा तनयाह्यभूत्। सा चैव प्रकृतिः साक्षा
८ त् सर्वलोकनमस्कृतः। पुरुषो भगवान् विष्णुर्धर्ममोक्षफलप्रदः।
तां कन्यां जगृहे धीमान् कंसभीत्यानकं तथा। चतुर्भुजं विशालाक्षं
श्रीवत्सांकितवक्षसं। शंखचक्रगदापद्मधारयं तं जनार्दनं। य
शोदायै प्रदत्वानुनिहत्यानकदुंदुभिः। हत्वैनं नंदगोपस्य रक्षत
मिति चाब्रवीत्। रामेण सार्धं दत्वा तं वरदं वारिजेक्षणं। भूभार
नियहार्थं वै चावतीर्णं जगद्गुरुं। अतो वै सर्वकल्याण यादवानां भवि

ष्यति। अयं स गर्भो देवक्या योऽष्टमः केशान्धरिष्यति। उग्रसेनात्मजा
याय कंसायानकदुंदुभिः। निवेदयामास तदा कन्येति श्रुत्वा लक्षणः॥
अस्यास्तु वाष्टमो गर्भो देवक्याः कंस सुव्रतः। मृत्युरेव न संदेह इति
वाणी पुरातनी। ततस्तां हंतुमारेभे कंसः सोद्यघ्य चांबरां उवाच
ष्टभुजा देवी मेघगंभीरया गिरा। रक्षस्वेनं स्वकं देहं आयातो मृत्यु
रेव ते। स्मर न्वा त्वं हि ते मृत्युर्देवक्यास्तनयोऽष्टमः। यत्नेन प्रतिकर्त्त
यत्नं भोजराज वृथा हरौ। प्रभावादित्युक्त्वा सा व्योम्नीयं तत्र २१५
धीयत॥ कंसोऽपि निहतस्तेन कृष्णेनाक्लिष्ट~~…~~कर्मणा
निहता बहवश्चान्ये देवब्राह्मणघातिनः। अस्य कृष्णस्य तनया
प्रद्युम्नप्रमुखा द्विजाः। बहवः पारसंख्याताः सर्वायुधविशारदाः॥ ७

शतमेवं तथाविधं। कृष्णस्यैतासु सर्वासु ज्येष्ठश्चैश च रुक्मिणीयतो द्वादशवर्षा
णि२

प्रयुक्ता निद्दशाष्टौ च कृष्णेन स्वदशाङ्गना। पुत्रे वै तेषु सर्वेषु चा
रुदेष्णाद योर्हरेः। विशिष्टा बलवंतश्च रौक्मिणेया रिसूदना। षोड
शस्त्री सहस्राणि कृष्णस्याक्लिष्टकर्मणः। शुष्यतावायुनकेण पुत्रार्थं
५८ पूजितोरैः। चारुदेष्णः सुचारुश्च चारुवेगो यशोधरः। चारुश्रवाश्चारु
यशा प्रद्युम्नः शंख एव च। एते लब्धाः सुकृष्णेन प्रसादाच्छूलपाणिन
ता नु दृष्ट्वा तनयान्वीरान् रौक्मिणेयान् जनार्दनः। जांबवत्यब्रवीत्कृ
ष्णं भार्या कृष्णस्य धीमतः। मम त्वं पुंडरीकाक्ष विशिष्टं गुणवत्तरं। सुरे
न्द्रसंमितं पुत्रं प्रसन्नो दातुमर्हसि। जांबवत्या वचः श्रुत्वा जगन्नाथस्त
तो हरिः। तपस्तप्तुं समारेभे तपोनिधिररिंदमः॥ सोऽपि नारायणः कृ
ष्णः शंखचक्रगदाधरः। व्याघ्रपादस्य मुनेर्गत्वा चैवाश्रमोत्तमं दृष्ट्वा य

मस्तं तस्मैन्नारसा प्रणिपत्य जनार्दनं। दिव्यं पाशुपतं योगं लब्धवानन्न
स्य चाज्ञया। प्रद्युम्नश्च महस्रः केतुश्चाद्य नाक्रोमं जमेखली। दीक्षितो
भगवान् कृष्णस्तत्राप परमं तपः। ऊर्ध्वबाहुर्निरालंबः पादांगुष्ठेन
धिष्ठितः। फलांबुनिलभोजी च ऋतुत्रयमधोक्षजः। ततस्तस्य च संतु
ष्टो ददौ रुद्रो वरान् बहून्। सांबं जांबवतीपुत्रं कृष्णाय च महात्मने। ल
ब्ध्वा जांबवती चैव सांबं भार्या हरेः सुतं। प्रहर्षमतुलं लेभे लब्ध्वादि
त्यं यथादितिः। बाणस्य च तदा दत्तेन छेदितं मुनिपुंगवा। भुजानां चैव २१६
सहस्रं शापाद्रुद्रस्य धीमतः। अथ दैत्यवधं चक्रे हलायुधसहायवा
न्। तथा दुष्कृतीशानां लीलयैव रणाजिरे। स हत्वा दैत्यसंघातं नर
कं दैत्यपुंगवं। ब्रह्मणश्चार्धवक्त्रस्य वरदानेन महात्मनः। सोपभोग्यानि षु

एयानां षोडशातुलविक्रमः। शताधिकानि जग्राह सहस्राणि महा
बलः। शापव्याजेन विप्राणामुपसंहृतवान् कुलं। संहृत्य च कुलं चैव
प्रभासे तिष्ठदच्युतः। तदा तस्यैव तु गतं वर्षाणामधिकं शतं। कृष्णस
द्वारका चैव मासिद्धी रार्णवांभसि। विश्वामित्रस्यासितस्य नारदस्य
च धीमतः। शापं पिंडारके रहं दुर्वाससस्य च वचस्तथा। स्पृष्टा च मानुषं
देहं लुब्धकास्त्रछलेन तु। अथ गृह्य च तं कृष्णो लुब्धकं प्रययौ दिवं। अ
ष्टावक्रस्य शापेन भार्याः कृष्णस्य धीमतः। चौरैरुपहृताः सर्वास्तस्य मा
याबलेन च। बलभद्रोऽपि संत्यज्य नागो भूत्वा जगाम च। महिष्यस्तस्य कृ
ष्णस्य रुक्मिणीप्रमुखाश्च याः। सहाग्नौ विविशुः सर्वाः कृष्णेनाक्लिष्टकर्म
णा। रेवती च तदा देवी बलभद्रेण धीमता। प्रविष्टा पावकं विप्राः सा च भर्त्रा

पथं गताः । प्रेतकार्यं हरेः कृत्वा पार्थः परपुरंजयः । रामस्य च तथा मे
त्रस्त्रीणामपि सुव्रताः । कंदमूलफलैस्तस्य बलिकार्यं चकार सः । ड
व्या नावान् स्वयं पार्थो भ्राटमित्र्य दिवं गतः । एवं संक्षेपतः प्रोक्तो कृष्ण
स्याक्लिष्टकर्मणः । प्रभावो विमलश्चैव स्वेच्छयैव महात्मनः । इत्येतः सोम
वंशानां नृपाणां चरितं द्विजाः । यः पठेच्छृणुयाद्वापी ब्राह्मणां श्रावयेच्चसो वा
सयाति विष्णुसालोक्यं नात्र कार्या विचारणा ॥ ॥ इति श्री महापुराणे
श्रीलैंगे सोमवंशे यदुवंशप्रकीर्त्तने वासुदेवबलभद्रकथा चंडिको २१७
त्पत्तिकंसवध द्वारिकाजलप्लावकृष्णबलभद्रस्वर्गगमन गोपीचौरो
पद्रवरुक्मणी रेवतीप्रमुखपट्टमहिष्यनलसहगमन वर्णनो नाम त्र्य
ष्टषष्ठितमोध्यायः ॥ ६८ ॥ छ ॥ ॥ आदिसर्गस्त्वया सूत सूचितो

न चक्राद्भितः । सांप्रतं विस्तरेणैव वक्तुमर्हसि सुव्रतः ॥ ॥ सूत उ ॥ ॥
महेश्वरो महादेवः प्रकृतेः पुरुषस्य च । परत्वे संस्थितो देवः परमात्मा
महेश्वरः । अव्यक्ताच्चेश्वरात्तस्मादभवत्कारणं परं । प्रधानं प्रकृतिं
चेति यदाहुस्तत्त्वचिंतकाः । गंधवर्णरसैर्हीनं शब्दस्पर्शविवर्जितं । अज
रं ध्रुवमक्षय्यं नित्यं स्वात्मन्यवस्थितं । जगद्योनिं महाभूतं परं ब्रह्म सना
तनं । विग्रहं सर्वभूतानां ईश्वराज्ञाप्रचोदितं । अनाद्यंतमजं सूक्ष्मं त्रिगु
णं प्रभवाव्ययं । असांप्रतमविज्ञेयं ब्रह्माग्रे समवर्त्तत । अस्यात्मना सर्व
मिदं व्याप्तं त्वासीच्छिवेच्छया । गुणसाम्ये तदा तस्मिन्नविभागे तमोमये ।
सर्गकाले प्रधानस्य क्षेत्रज्ञाधिष्ठितस्य वै । प्रधानाद्वाध्यमाने वै महा
न्प्रादुर्बभौ वसः । सूक्ष्मेण महता चाथ अव्यक्तेन समावृतः । सत्वोद्रिक्तो
स
गा२

विशेषेभ्यो गुणेभ्यो महानिति ततः स्मृतः ॥४७

महानन्ये सत्तामात्रप्रकाशकः ॥ मनो महांस्तु विज्ञेयमेकं तत्कारणं स्मृतं ॥
समुत्पन्नं लिंगमात्रं क्षेत्रज्ञाधिष्ठितं तनुः ॥ धर्मादीनां च रूपाणि लोकं
तत्त्वार्थहेतवः ॥ महान् सृष्टिं विकुरुते चोद्यमानः सिसृक्षया ॥ मनो मह
न्मतिर्ब्रह्मा बुद्धिः ख्यातिरितीश्वरः ॥ प्रज्ञा चितिः स्मृतिः संविद्विपुर
मं चेति तत्स्मृतः ॥ ~~बृहत्त्वाद्बृंहणत्वाच्च~~ मनुते सर्वभूतानां यस्माच्चेष्टास्व
यं तु वै ॥ सोऽस्मात्तेन विभक्तं तु येन तन्मन उच्यते ॥ तत्त्वानामग्रजो यस्मान्म
हांश्च परिमाणतः ॥ ~~पुरुषो भोगसंबंधात्तेन चासौ मतिस्मृतः~~ विभक्ति २८
मानं मनुते विभागं मन्यते पि वा पुरुषो भोगसंबंधात् तेन चासौ मतिस्मृतः ॥
बृहत्त्वाद्बृंहणत्वाच्च भावानां सलिलाश्रयात् ॥ यस्माद्बृंहयते भावान्
ब्रह्मा तेन निरुच्यते ॥ आप्लावयति यस्माच्च देहान्देवान्नमुदहेत्

तत्त्वज्ञावापनीयं च तेन पूरिति चोच्यते ॥ बुध्यते पुरुषश्चात्र सर्वान्का
मान् हिताहितान् ॥ यस्माद्बोधयते यत्र बुद्धिस्तेन निरुच्यते ॥ ख्या
तिप्रत्ययभोगश्च यस्मात्संवर्त्तते ततः ॥ भोगस्य ज्ञाननिष्ठत्वात् तेन
ख्यातिरिति स्मृतः ॥ ख्यायते तद्गुणैर्वापि ज्ञानादिभिरनेकशः ॥ तस्मा
च्च महतः संज्ञा ख्यातिरित्यभिजायते ॥ महान्सर्वं विजानाति महात्मा
तेन चेश्वरः ॥ यस्मात् ज्ञानगुहा चैव प्रज्ञा तेन स उच्यते ॥ ज्ञानादीनि
च रूपाणि क्रतुकर्मफलानि च ॥ चिनोति यस्माद्भोगार्थं तेनासौ चिति
रुच्यते ॥ कृत्स्नं च विंदति ज्ञाने यस्मान्माहात्म्यमुत्तमं ॥ तस्माद्विदो
र्दश्चैव संविदित्यभिधीयते ॥ विद्यते चापि सर्वस्मिन् तस्मिन्सर्वं च
विद्यते ॥ तस्माच्छविदिति प्रोक्तो महद्भिर्बुद्धिसत्तमैः ॥ ज्ञानी ते ज्ञानमि
वर्त्तमानान्यतीतानि तथा चानागतान्यपि ॥ स्मरते सर्वकार्याणि तेनासौ स्मृतिरुच्यते ॥ ३

त्माकुं भगवान् ज्ञानसंनिधि। दंधानो विपरीभावात् चित्परं प्रोच्यते बु
धैः। पर्यायवाचकैः शब्दैस्तत्त्वमाद्यमनुत्तमं। व्याख्यातं तत्त्वभावज्ञैरेवं सद्भ
वचिंतकैः। महान् सृष्टिं विकुरुते चोद्यमानसिसृक्षया। संकल्पोध्यवसायश्च
तस्य वृत्तिद्वयं स्मृतं। त्रिगुणः सतु विज्ञेयः सात्त्वराजसतामसः। त्रिगुणाद्रा
जसाद्विक्ताद्दहंकारस्ततोभवत्। महतावृत सर्गोभूतभूतादिर्बाह्यतस्तुसः
तस्माद्देवतमोद्रिक्ताद्दहंकारादजायत। भूततन्मात्रसर्गस्तु भूतादिस्तामं
सस्तु सः। भूतादिस्तु विकुर्वाणः। शब्दमात्रं ससर्ज ह। आकाशं शुषिरं तस्मा २१६
दुत्पन्नं शब्दलक्षणं। आकाशं शब्दमात्रं तु भूतादिश्चावृणोत्पुनः। शब्दमात्रं
तदाकाशं स्पर्शमात्रं ससर्ज ह। बलवानभवद्वायुस्तस्य स्पर्शो गुणो मतः
आकाशं शब्दमात्रं तु स्पर्शमात्रं समावृणोत्। वायुश्चापि विकुर्वाणो रूपमात्रं

ससर्ज ह। ज्योतिरुत्पद्यते वायोस्तद्रूपगुणमुच्यते। स्पर्शमात्रस्तु वै
वायू रूपमात्रं समावृणोत्। ज्योतिश्चापि विकुर्वाणं रसमात्रं ससर्ज ह। सं
भवंति तथा ह्यापस्ता वै सर्गरसात्मिकाः। रसमात्रास्तु ता ह्यापो रूपमात्रो
ग्निनावृणोत्। आपश्चापि विकुर्वाणो गंधमात्रं ससर्जिरे। संघातो
जायते यस्मात्तस्य गंधो गुणो मतः। तस्मिंस्तस्मिंस्तु तन्मात्रं तेन तन्मा
त्रता स्मृता। अविशेषवाचकत्वाद् विशेषास्तु उच्यते। प्रशांतघोरमूढ
त्वादविशेषास्ततः पुनः। भूततन्मात्रसर्गोयं विज्ञेयस्तु परस्परात्। वै
कारिकादहंकारात्सत्त्वोद्रिक्तात्तु सात्त्विकः। वैकारिकः स सर्गस्तु
युगपत्संप्रवर्तते। बुद्धींद्रियाणि पंचैव पंचकर्मेंद्रियाणि वा सा
धकानींद्रियाणि स्युर्दैवा वैकारिका दश। एकादशं मनस्तत्र स्वगुणे

नेत्रयात्मकं। श्रोत्रं त्वक्चक्षुषी जिह्वा नासिका चैव पंचमी। शब्दादीनां
मवाप्त्यर्थं बुद्धियुक्तानि वक्ष्यते। पादौ पायुरुपस्थं च हस्तौ वाक् पंचं
मी भवेत्। गतिर्विसर्गो ह्यानंदः शिल्पं वाक्यं च कर्म तत्। आकाशं शब्द
मात्रं यत् स्पर्शमात्रं समाविशत्। संहता गंधमात्रेण त्र्यविन्वति महीमि
मां। तस्मात्पंचगुणा भूमिः स्थूला भूतेषु विद्यते। त्रिगुणश्च ततस्त्वग्निः
शब्दस्पर्शश्च रूपवान्। शब्दस्पर्शं च रूपं च रसमात्रं समाविशत्। तस्मा
च्चतुर्गुणा ह्यापो विज्ञेयास्तु रसात्मिकाः। शब्दस्पर्शश्च रूपं च रसश्च गंधमा २२०
विशत्। शांता घोराश्च मूढाश्च विशेषास्तेन ते स्मृताः। परस्परानुप्रवेशा
द्धारयंति परस्परं। भूमेरंतस्त्विदं सर्वं लोकालोकं घनावृतं। विशेषाश्चेंद्रि
यग्राह्यानियतत्वाच्च ते स्मृताः। गुणं पूर्वस्य पूर्वस्य प्राप्नुवंत्युत्तरोत्तरं।

पू

तेषां यावच्च यावच्च तत्तावत्तु गुणं स्मृतं। उपलभ्याप्सु चेद्गंधं केचिद्ब्रू
युरनैपुणा। पृथिव्यामेव तं विद्याद्यपां वायोश्च संश्रयात्। एते सप्त
महात्मानो ह्यन्योन्यस्य समाश्रयात्। पुरुषाधिष्ठितत्वाच्च अव्यक्तानुग्र
हेण च। महदादयो विशेषांता ह्यंडमुत्पादयंति ते। एककालसमुत्प
न्नं जलबुद्बुदवच्च तत्। विशेषेभ्योंडमभवद्बृहत्तदुदकेशयं। अ
द्भिर्दशगुणाभिस्तु बाह्यतोंडं समावृतं। आपो दशगुणेनैव बाह्यतो
नलसावृताः। तेजो दशगुणेनैव बाह्यतो वायुनावृतं। आकाशेनावृतो
वायुः खं तु भूतादिनावृतं। भूतादिर्महता वापि अव्यक्तेनावृतो महान्।
सर्वश्चांडकपालस्थो भवश्चांतासि मुखतारुद्रोग्निमध्ये भगवानुग्रो
वायुर्महेश्वरः। भीमस्त्वाकाशमध्यस्थो अहंकारो महेश्वरः। एतेरावरणै
बुद्धौ भगवानीशः सर्वज्ञः परमेश्वरः।।

रंउ सप्तभिः प्राकृतैर्वृतं। एतमाहुरथान्योन्यमष्टौ प्रकृतयः स्थिताः। प्र
सर्गकाले स्थितास्तानुग्रसंस्थेता परस्परं। एवं परस्परोत्पन्ना धारयंति
परस्परं। आधार्याधारभावेन विकारास्ते विकारिषु। महेश्वरः परोव्यक्त
देउमव्यक्तसंभवः। अंडाज्जातेस एवेशः पुरुषोर्कसमप्रभः। तस्मिन् कार्य
स्य करणं संसिद्धं स्वेच्छयैव तु। स वैशरीरी प्रथमः स वै पुरुष उच्यते।
तस्य वामांगजो विष्णुः सर्वदेवनमस्कृतः। लक्ष्म्या देव्याद्य तु देवः इच्छ
या परमेष्ठिनः। दक्षिणांगभवो ब्रह्मा सरस्वत्या जगद्गुरुः। तस्मिन्नंडेइ २२१
मे लोका अंतर्विश्वमिदं जगत्। चंद्रादित्यौ सनक्षत्रौ सग्रहौ सह वायु
ना। लोकालोकं च यत्किंचिदंडे ह्यस्मिन् समर्पितं। यद्यतश्चणत संख्यातं
मया लोकोत्तरे द्विजाः। एतत् कालांतरं ज्ञेयं अहर्वै परमेश्वरं। रात्रिश्चैता

वती ज्ञेया परमेशस्य कृत्स्नशः। अहस्तस्य तु या सृष्टि रात्रिश्च प्रलय
स्मृतः। अहर्न विद्यते तस्य न रात्रिरिति धारयेत्। उपकार एष क्रि
यते लोकानां हितकाम्यया। इंद्रियाणींद्रियार्थश्च महाभूतानि पंच
च। तन्मात्राण्यथ भूतादि बुद्धिश्च सह दैवतैः। अहस्तिष्ठंति सर्वाणि
परमेशस्य धीमतः। अहरंते प्रलीयंते रात्र्यंते विश्वसंभवाः। स्वात्मन्य
वस्थिते व्यक्ते विकारे प्रतिसंहृते। साधर्म्येणावतिष्ठेते प्रधानपुरु
षावुभौ। तमः सत्वगुणावेतौ समत्वेन व्यवस्थितौ। अनुद्रिक्तावुभौ तौ
च ओतप्रोतौ परस्परं। गुणसाम्ये लयो ज्ञेयो वैषम्ये सृष्टिरुच्यते। तिले
षु वा यथा तैलं घृतं पयसि वा स्थितं। तथा तमसि सत्वे च रजोप्यनु
सृतं स्थितं। उपास्य जननी कृत्स्नं परं माहेश्वरीं तदा। अहर्मुखे प्रवृत्तस्क

परःप्रकृतिसंभवः।क्षोभयामासयोगेनपरमेणमहेश्वरः।प्रधानंपु-
रुषंचैवप्रविश्याशुमहेश्वरः॥महेश्वरात्त्रयोदेवाजज्ञिरेजगदीश्वराः।
शाश्वताःपरमागुह्याःसर्वात्मानःशरीरिणः॥एतएवत्रयोवेदाएतएव
त्रयोगुणाः।एतएवत्रयोलोकाएतएवत्रयोग्नयः॥परस्पराश्रिताह्येते
परस्परमनुव्रताः।परस्परेणवर्त्तन्तेधारयन्तिपरस्परं॥अन्योन्यमिथु-
नाह्येतेह्यन्योन्यमुपजीविनः।क्षणंवियोगोनह्येषांनत्यजन्तिपरस्परं॥
ब्रह्मातुरजसायुक्तःसर्गादौहिप्रवर्त्तते।परःसपुरुषोज्ञेयःप्रकृतिश्च २२२
परास्मृता।अधिष्ठितासाहिमहेश्वरेणप्रवर्त्ततेचोद्यमानासमन्तात्।
प्र अनुप्रवर्त्ततिमहान्तमेनंचिरस्थितत्वाद्विषयप्रियत्वात्।प्रधानगुणवैष-
म्यात्सर्गकालेप्रवर्त्तते।ईश्वराधिष्ठितात्पूर्वंतस्मात्सदसदात्मकात्॥सं

इश्वरस्तुपरोदेवोविष्णुश्चमहतःपरः ५

सिद्धकार्यकरणेविष्णुस्तस्मादवर्त्ततः।तेजसाप्रतिमोधीमान्अव्य-
क्तःसं॰प्रकाशकः।सवैशरीरिप्रथमःसवैपुरुषउच्यते।ब्रह्माचभग-
वांस्तस्माच्चतुर्वक्त्रःप्रजापतिः।संसिद्धकार्यकरणस्तथावैसमवर्त्तत॥
एकएवमहादेवस्त्रिदेवंस्येव्यवस्थितः।अप्रतीपेनज्ञानेनऐश्वर्ये-
णसमन्वितः।धर्मेणाप्रतीपेनवैराग्येनचतेद्विजाः।अव्यक्ताज्जाय-
तितेषांमनसायद्यदिछितं।वशीकृतत्वात्त्रैगुण्यात्सापेक्षत्वात्स्वभा-
वतः।चतुर्मुखस्तुब्रह्मत्वेकालत्वेचांतकस्मृतः।सहस्रमूर्द्धापुरु-
षस्तिस्रोवस्थाःप्रजापतेः।ब्रह्माकमलगर्भाभोरुद्रकालाग्निसं-
द्विजान् सर्वान् ब्रह्मलोकं स गच्छति। मानसैर्वाचिकैः पापैस्तथा वै-
कायिकैः पुनः। स्थूलैः सूक्ष्मैश्च वै तदा महापातकसंभवैः। पातकैश्च
द्विजः श्रेष्ठ उपपातकसंभवैः। पापैश्च मुच्यते जंतुः श्रुत्वाध्यायमिदं
शुभं। शत्रवो नाशमायांति संग्रामे विजयी भवेत्। सर्वरोगैर्न बाध्येत
आपदो न स्पृशंति तं। धनमायुर्यशो विद्या प्रभाव मतुलं लभेत्॥ ॥
इति श्रीमहापुराणे लैंगे त्रिपुरविजये एकसप्ततमोध्यायः॥ सूत उ०
गते महेश्वरे देहे दग्ध्वा च त्रिपुरं क्षणात्। प्रहस्याह सुरेंद्राणां भगवा-

नृपत्र्यसंभवः॥ ॥पितामह उ॥ ॥संपूज्य देवदेवेशं लिंगमूर्त्तिं म
हेश्वरं। तारपौत्रो महातेजास्तारकस्य सुतो बली। तारकाक्षो दिति
श्रेष्ठः कमलाक्षश्च वीर्यवान्। विद्युन्माली च देवेशं लिंगमूर्त्तिं मह
ईश्वरं दैत्याश्च सबांधवाः। त्यक्त्वा देवं महादेवं मायया च हरेः प्रभोः
सर्वे विनष्टा प्रध्वस्ताः स्वपुरैः पुरसंभवैः। तस्मात्सदा पूजनीयो लिं
गमूर्त्तिः सदाशिवः। यावत्पूजा सुरेशस्य तावद्देवस्थितिर्यतः। पूजनी
यः शिवो नित्यं श्रद्धया देवपुंगवैः। सर्वे लिंगमयो लोकः सर्वं लिं
गे प्रतिष्ठितं। तस्मात्संपूजयेल्लिंगं यदीच्छेत्सिद्धिमात्मनः। सर्वे २६०
लिंगार्चनाद्देवदेवा दैत्याश्च दानवाः। यक्षा धरासिद्धाराक्षसा पि
त्रिताशनाः। पितरो मुनयश्चैव पिशाचाः किंनरादयः। अर्चयित्वा लिंग

विद्या २

मूर्त्तिं संसिद्धा नात्र संशयः। तस्माल्लिंगे यजेन्नित्यं येन केनापि
वा सुराः। पशवः पशवश्चैव यतस्तस्य देवदेवस्य धीमतः। पशुत्वं च परित्या
ज्य कृत्वा पाशुपतं व्रतं। पूजनीयो महादेवो लिंगमूर्त्तिः सनातनः
विशोध्य चैव भूतानि पंचभिः प्रणवैः स्वयं। प्राणायामसमायुक्तैः
पंचभिः सुरपुंगवाः। चतुर्भिः प्रणवैश्चैव प्राणायामैस्तथाविधैः। त्रि
भिश्च प्रणवैश्चैव प्राणायामैस्तथाविधैः। द्विधान्यस्य तथोंकारं
प्राणायामपरायणः। ततः श्चोंकारमुच्चार्य प्राणायामो नियम्य च
ज्ञात्वा तेन सर्वं गात्या पूर्य प्रणवेन च। तमोगुणमभूतारम्यम
हंकारं च सुव्रताः। तन्मात्राणि च भूतानि यथा बुद्धीन्द्रियाणि च। क
र्मेन्द्रियाणि संशोध्य पुरुषं पुष्कले तथा। चिदात्मना तनुं कृत्वा ना

ग्निर्नमस्येत्तिसंस्पृशेत् । वायुर्नमस्यति व्योमं च तथा ततः पृथिवीं त
था ।। त्रियायुषं त्रिसंध्यं च धूपितेनासितेन च । सयोगो । सर्वतत्व
ज्ञो वृतं पाशुपतेत्विदं । अनेन पशुमोक्षार्थं कथितं देवसत्तमाः ।
सर्वपाशुपतिं कृत्वा संपूज्य परमेश्वरं । लिंगमयात्पुरा दृष्टं विष्णु
ना च महात्मना । पराद्यो नैवजायेते वर्षमात्रेण देवता । अस्मान्नि
सर्वकार्याणि देवमभ्यर्चयेत्ततः । बाह्ये चाभ्यंतरे चैव मन्ये कर्त्तृ
त्वमीश्वरः । प्रतिज्ञा मम विप्रेन्द्र दैत्यासुरसत्तमाः । मुनीनां च २६१
न संदेहो । सूक्ष्मान्ते तत्पूजयेच्छिवे । साहाय्यास्तन्महल्लिंगं सांध
ता साधमूकता । यज्ञेन यन्मुहूर्त्तं च शिवमेकेन चिंतयेत् । अनव
क्रियपरायेतु भवेद्गुणं तं चेतसः । भवसंस्मरणे क्षणं ते दुःख

स्थानानि नः । भवनानि मनोज्ञानि विस्त्रमाभरणास्त्रियः । धनं चतु
ष्टियेर्जं तं शिवपूजाविधेः फलं । ये वांछंति महाभागा वस्त्रनात्रि
दशालये । तेर्चयंतु सदाकालं लिंगमूर्त्तिमहेश्वरं । हत्वा भित्वा
च भूतानि भुक्त्वा सर्वमिदं जगत् । यजेद्देवं विरूपाक्षं न स पापैः प्र
लिप्यते । शैलं लिंगमयं दिव्यं सर्वदेवनमस्कृतं । इत्युक्त्वा पूर्वमभ्यर्च्य
२ स्तुत्वा त्रिभुवनेश्वरं । तुष्टाव वाग्भिरिष्टाभिर्देवदेवं त्रियंबकं । तदाप्रभृ
ति शक्राद्याः पूजयामासुरीश्वरं साक्षात्पशुपतं कृत्वा भस्मोद्धूलित
विग्रहाः ।। ।। इति लैंगे द्विसप्ततितमोध्यायः ।। सूत उवाच
लिंगानि कल्पयित्वैवं चाधिकारानुरूपतः । विश्वकर्मा ददौ तेषां नि
योगाद्ब्रह्मणः प्रभोः । पद्मरागमयं शक्रो हेमं विश्रवसः सुतः । विश्वे

कर्मसिद्धौ तेस्थिता ॥ इंद्रनीलमयं लिंगं विष्णुः पूजयते सदा । विश्वेदेवा
स्तथा रौप्यं वसवः कांस्यकं शुभं । आरकूटमयं वायुरश्विनौ पार्थिवं वं २
तं ॥ स्फाटिकं वरुणो राजा आदित्यास्ताम्रनिर्मितं । मौक्तिकं सोमरा
जा च वज्रलिंगं विभावसोः । अनंताद्या महानागाः प्रवालकमयं शुभं
दै दैत्या ह्ययोमयं लिंगं राक्षसाश्च महाबलाः । त्रैलोहिकं गुह्यकाश्च सर्वलो
हमयं गणाः । चामुंडा सैकतं साक्षान्नवनीतं गवां कुलं । दारुजं नैऋ
तिर्नित्यं यमो मारकतं शुभं । नीलाद्याश्च तथा रुद्राः शुद्धभस्ममय
मुत्तमं । लक्ष्मी वृक्षमयं लक्ष्मी गोमयं च गुहः स्वयं । मुनयो मुनिशार्दू २६२
लाः कुशाग्रमयमुत्तमं । वामाद्याः पुष्पलिंगं तु गाध लिंगं न नीन्मनि ।
सरस्वती तथा दुर्वामयं रुद्रस्य वाग्रवाः । दुर्गापिष्टमयं सर्वमंत्राश्चाज्य

---

मयं शुभं । देवाः सर्वे दधिमयं पिशाचाः शीशनिर्मितं । लेभिरे च
यथान्यायं प्रसादान्नूक्ष्मलाः पदं । बहुनात्र किमुक्तेन चराचर
मिदं जगत् । शिवलिंगं समभ्यर्च्य स्थितमत्र न संशयः । षड्विधं लिं
गमित्याहुर्द्रव्याणां च प्रभेदतः । तेषां भेदाश्चतुष्काश्चत्वारिंशदिति
स्मृताः । शैलजं प्रथमं प्रोक्तं तद्धि साक्षाच्चतुर्विधं । द्वितीयं रत्नजं त
त्र सप्तधा मुनिसत्तमाः । तृतीयं धातुजं लिंगं अष्टधा परमेष्ठिनः ।
तुरीयं दारुजं लिंगं तत्तु षोडशधोच्यते । मृन्मयं पंचमं लिंगं द्विधा
भिन्नं द्विजोत्तमाः । षष्ठं तु क्षणिकं लिंगं सप्तधा मुनिसत्तमाः । श्रीप्र
दं रत्नजं लिंगं शैलजं सर्वसिद्धिदं । धातुजं धनदं साक्षाद्दारुजं भो
गसिद्धिदं । धातुजं धनदं साक्षाद्दारुजं भोगसिद्धिदं । मृन्मयं चैव वि

प्रेन्द्राः सर्वसिद्धिकरं शुभं। शैलजाद्यकमतेष्वेकं मध्यमं चतथाधमं
बहुधा लिंगभेदास्तु नवधैव समासतः। मूले ब्रह्मा तथा मध्ये विष्णुः
स्त्रिभुवनेश्वरः। रुद्रोपरि महादेवः प्रणवाख्यः सनातनः।। लिंगं दे
वी महादेवी लिंगं साक्षान्महेश्वरः। तयोः संपूजयेद्यस्तु देवी देव
श्च पूजितौ। शैलजं रत्नजं वापि धातुजं वापि दारुजं। मृन्मयं क्षणिकं
वापी।। न क्रास्थाप्य फलं शृणु। सुरेंद्रो जगतां श्रियमां बुधनेश्वरः।
सिद्धविद्याधराहींद्र यक्षदानवकिन्नरैः। स्तूयमानः सुपुण्यात्मा दिव २६३
दुंदुभिनिस्वनैः। भूर्भुवस्स्वर्महर्लोकान्क्रमाद्वै जनतः परं। तपः सत्यम
तिक्रम्यं स्नासयन् स्वेन तेजसा।। लिंगस्थापनसन्मार्गनिहितस्वायिता
त्मनां। श्रुत्वा ह्यो उ मुष्णिद्यान्नीच्छिन्नि विशंकया। शैलजं रत्नजं वापी

धातुजं वापि दारुजं। मृन्मयं क्षणिकं सम्यक् स्थापयेच्छकलं पुनः।
विधिनाचैव कृत्वा तु स्कंदेन महितं शुभं। कुंदगोक्षीरसंकाशं लिंगं
यस्थापयेन्नरः। तेन तत्तु समास्थाय स्थितो रुद्रः स्वयं दर्श
नात्स्पर्शनात्तस्य लब्धं ते निर्वृतं नराः। तस्य पुण्यं संवेक्षु मया युग श
तैरपि। शक्यते नैव विप्रेंद्रास्तस्माद्वै स्थापयेत्तथा। सर्वेषामेव मर्त्यानां
विभोर्दिव्यं वपुः शुभं। सकलं नाव नायोग्यं योगिनामेव निष्कलं।।
इति श्रीलैंगे त्रिसप्ततितमोऽध्यायः।। ।।रूपयक।। ।।निष्कलो नि
र्मलो नित्यं सकलत्वं कथं गतः। वक्तुमर्हसि चास्माकं यथा पूर्वं त्वया
श्रुतं।। ।।सूत उ०।। ।।परमार्थविदः केचिदूचुः प्रणवरूपिणं। विज्ञा
नमिति विप्रेंद्राः श्रुत्वा श्रुतिशिरस्यजं। शब्दादिविषयं ज्ञानं ज्ञानं

मित्यभिधीयते। न तज्ज्ञानेनान्तरं हितं मन्यन्ते नेति चापरे। यत्ज्ञानेनि
र्मलं शुद्धं निर्विकल्पं निराश्रयं। गुरुप्रकाश्यकं ज्ञानमित्यन्ये मुनयः। अ
न्ये ज्ञानेनैव नान्येन मुक्तिः प्रसादो ज्ञानसिद्धये। उभाभ्यां मुच्यते योगी
तत्रानन्दमयो भवाव देति मुनयः केचित्कर्मणोऽन्यस्य संगतिः। कर्मणा
कल्पितं रूपं संकृतं स्वेच्छयैव तु। द्यौ मूर्धेति विज्ञेयस्तस्य खं नाभिप
रमेष्ठिनः। सोमसूर्याग्नयो नेत्रा दिशः श्रोत्रे महात्मनः। चरणश्चैव
पाताले समुद्रास्तस्य चाम्बरं। वेदास्तस्य भुजाः सर्वे नक्षत्राणि च भूष २६८
णं। प्रकृतिस्तस्य पत्नी च पुरुषो लिंगमुच्यते। ब्रह्मा वै ब्राह्मणाः सर्वे ब्र
ह्मा च भगवान् प्रभुः। इन्द्राविष्णू भुजाभ्यां तु क्षत्रियाश्च महात्मनः। वै
श्याश्चोरुप्रदेशात्तु शूद्राः पादात्पिनाकिनः। पुष्कलाः पल्लवा गाथाश्च

न्त१

केशास्तस्य प्रकीर्तिताः। वायवो घ्राणजास्तस्य गतिः श्रोत्रं स्मृतिस्तं
था। अनेनैव चक्रमनिलं प्रकृतेश्च प्रवर्तकः। पुंसां च पुरुषः श्रीमा
न् ज्ञानगम्यो न चान्यथा। कर्मयज्ञसहस्रेभ्यस्तपोयज्ञो विशिष्यते।
तपोयज्ञसहस्रेभ्यो जपयज्ञो विशिष्यते। जपयज्ञसहस्रेभ्यो ध्या
नयज्ञो विशिष्यते। ध्यानयज्ञात्परो नास्ति ध्यानं ज्ञानस्य साधनं।
सदा समरसे निष्ठो योगी ध्यानेन पश्यति। ध्यानयज्ञरतस्याथ त
दा सन्निहितः शिवः। नास्ति विज्ञानिनां चेति प्रायश्चित्तादिशोध
ना। विशुद्धा विद्यया सर्वे ब्रह्मविद्याविदो जनाः। नास्ति क्रिया च लोके
च सुखं दुःखं विचारतः। धर्माधर्मौ जपो होमो ध्यानी नो सन्निधिः सत
परानन्दात्मके लिंगे विशुद्धे शिवमव्ययं। निष्कलं सर्वसं ज्ञेयं योगीनां

दि संस्थितं लिंगं तु द्विविधं प्राहुर् बाह्यम् आभ्यन्तरं द्विजाः। बाह्यं स्थूलं मुनिश्रे
ष्ठाः सूक्ष्मम् अभ्यन्तरं द्विजाः। कर्मयज्ञरताः स्थूलाः स्थूललिंगार्चने रताः। अ
सतां भावनार्थाय सूक्ष्मेन स्थूलविग्रहाः। आध्यात्मिकं तु यल्लिंगं प्रत्यक्षं
यस्य नो भवेत्। सो ऽसौ मूढो मुनेः सर्वं कल्पयेच्चैव नान्यथा। ज्ञानिनां सूक्ष्म
ममलं भवेत् प्रत्यक्षम् अव्ययं। यथा स्थूलम् अयुक्तानां मृत्काष्ठाद्यैः प्रकल्पितं
अहो विचारतो नास्ति ह्यन्ये तत्त्वार्थवेदिनः। निष्कलं सकलं चेति सर्वं
शिवमयं ततः। व्योमैकम् अपि दृष्टं हि शरावेषु प्रतिसु [illegible] पृथक् कल्क १६५
ल्पृथक्त्वं च शंकरस्येति चापरे। प्रत्ययार्थं हि जगतां [illegible] त्वपि दिवाक
रः। एकोऽपि बहुधा दृष्टो जलाधारेषु सुव्रताः। जन्तवो दिवि भूमौ च सर्वे
वै पांचभौतिकाः। तथापि बहुधा दृष्टा जातिभक्तिविभेदतः। [illegible]

दृश्यते श्रूयते यद्यत् तत्तद्विद्धि शिवात्मकं। भेदो जनानां लोके
ऽस्मिन् प्रतिभासो विचारतः। स्वप्ने च विपुलान् भोगान् भुक्त्वा मर्त्यः
सुखी भवेत्। दुःखी च भोगान् दुःखं च नानुभूतं [illegible] रतः। एवम
कुत्सिताश्चात्र सर्वे वेदार्थतत्त्वगाः। रुद्रसंसारिणां मोक्षात् सकलः
परमेश्वरः। योगिनां निष्कलो देवो ज्ञानिनां च जगन्मयः। त्रिविधं
परमेशस्य वपुर्लोके प्रकीर्तितं। निष्कलं प्रथमं चैकं ततः सकल
निष्कलं। सर्वज्ञहृदये केचित् शिवलिंगं विभावसौ। तृतीयं सकलं
चैव नान्यथेति द्विजोत्तमाः। अर्चयन्ति मुकुः केचित् सदा सकलनिष्कलं
सकलं मुनयः केचित् सदा संसारवर्त्तिनः। सांबम् अभ्यर्च्यं सन्ये सदाऽण
सत्तु ता जनाः। यथा शिवस्तथा देवी यथा देवी तथा शिवः। तस्माद् भेदबु

ध्यातं सांबं संपूजयेच्छिवं ।
यजेत देहे बाह्ये च प ॥ ८
लोच पड्स्त्रके ॥ दशारे वा द
शारे च षोडशारे व्यपाश्रके ।

२६६

सृष्टिच्छायां शिवः साक्षाद्देव्या सार्द्धं स्थितं प्रभुं । संतारेणार्थं च विभुं
सदसद्व्यक्तिवर्जितः । तमेकमाहुर्द्विगुणं च केचित् केचित्त्रमाहुः
स्त्रिगुणात्मकं च । ऊचुस्तथा तेच । शिवं तथान्ये सकलं एवं द विदो व
दंति । तस्माथ योगेन शिवेन तस्मा शेष्याः सदा धर्मरता विशिष्टा
: यजंति योगान्नाम जेयमीशं षड्स्त्रमध्ये भगवंतमेव । ये तत्र प्र
त्रयंति शिवं त्रिकोणे त्र्यं लकं च त्रिगुणं त्रियक्षं । व्रयांति शैवं स्वतुर्य
गिनोन्ये तथा च देव्यापुरुषं पुराणं ॥ ॥ इति श्रीलैंगे चतुःसप्तति
मोध्यायः ॥ ॥ सूत उ ॥ ॥ अतः परं प्रवक्ष्यामि स्वेच्छाविग्रहसंभवं
सर्व २ प्रतिष्ठाप्य फलं सर्वं लोकानां हितायवै । स्कंदो मासहितं देवं संपूज्य वि
धिना सह कृतात्मफलं लेभे मत्स्तिद्वदामि यथाश्रुतं । सूर्यकोटिप्रतीकाशं
मोक्षानं परमैं सनेत् । कृत्वा तच्छ्या प्रतिष्ठाप्य सर्वान्कामानवाप्नुयात् स्कंदोमा सां २

म. २

रुद्रकन्यासमाकीर्णे गं[illegible]न्विते ॥ शिवं वा कृत्वा [illegible] तेनाप्नोति पादहुतिसंप्लवं ।
तत्र भुक्त्वा महाभोगान् विमाने सर्वकामके ॥१॥

विमाने सर्वकामिके । स्थाने कुमारमीशानं देवं सर्वात्मनैव च । प्रजा-
पत्यं महातेजा जनलोके महीयते । कृत्वा चैव भुवर्लोके भोगान् दिव्यान्
भुंक्ते ननान्न । मेरुमासाद्य देवानां भुवने प्रमोदते । भूमिपादे चतुर्बाहुं
त्रिनेत्रं शूलसंयुतं । दक्षिणे हरिं वामे दक्षिणे चतुराननं । अष्टाविंशति
रुद्राणां कोटिं चाष्टौ च सुव्रत । पंचविंशतिकं साक्षात् पुरुषं हृदयात्तनः ।
प्रकृतिं चाम तत्स्यैव बुद्धिं वै बुद्धिदेशतः । अहंकारमहंकारात् तन्मात्रा-
णी च तत्र वै । इंद्रियाणींद्रियादौ च लीलया परमेश्वरः । पृथिवीं पादमू- २६९
लात् गुह्यदेशाज्जलं तथा । नाभिदेशान्महावह्निं हृद्देशाद्भास्करं तथा ।
कंठान् सोमेन तन्मात्ना । भ्रूमध्यान्मस्तकाद्दिवं । सृष्ट्वैवं संस्थितं साक्षाज्ज-
गत्सर्वं चराचरं । सर्वं तं सर्वगं देवं कृत्वा सत्याविधानतः । प्रतिष्ठाच

स्थिर

यथान्याये ॥ शिवसायुज्यमाप्नुयात् । त्रिपादं सप्तहस्तं च चतुःशृंगं द्वि-
शीर्षकं । कृत्वा यज्ञेशमीशानं विष्णुलोके महीयते । तत्र भुक्त्वा महा-
भोगान् कल्पहृष्टं सुखी नरः । क्रमादागम्य लोकेस्मिन् [illegible] वेयस्तां तं गामि-
वेन्नः । वृषारूढं तु यः कृत्वा सोमं सोमार्धभूषणं । हर्यमध्ये पुते कृत्वा-
स्तुएयंते देवाप्सरः । कांचनेन विमानेन किंकिणीजालमालिना । ग-
त्वा शिवपुरं दिव्यं सर्वपापैः प्रमुच्यते । नंदिनासहितं देवं सांबं सर्व-
गणैर्वृतः । कृत्वा यत्फलमाप्नोति वक्ष्ये तद्वै यथाश्रुतं । सूर्यमंडलसं-
काशे विमाने वृषसंयुते । अप्सरोगणसंकीर्णे देवदानवदुर्लभः । स्तू-
त्वा चाप्सरोभिश्च सर्वतः समशोभिते । गत्वा शिवपुरं दिव्यं गाणपत्य-
मवाप्नुयात् । नृत्यंतं देवदेवेशं शैलजासहितं प्रभुं । सहस्रबाहुं देवेशं

सर्वालंकारसंयुक्तां नंदाद्यैर्भूतसंघैश्च संवृतं परमेश्वरं। त्रैलोक्यजास
हितं साक्षात् वृषभध्वजमीश्वरं। ब्रह्मेंद्रविष्णुसोमाद्यैः कृतांजलि
पुटैर्गणैः। मातृभिर्मुनिभिश्चैव सर्वतः समभिष्टुतं। कृत्वा भक्त्या प्रति
ष्ठाप्य यत्फलं तद्वदाम्यहं। सर्वयज्ञतपोदानतीर्थवेदेषु यत्फलं। तत्फ
लं कोटिगुणितं ततो याति शिवं पदं। तत्र भुक्त्वा महाभोगान् यावदा
भूतसंप्लवं। पश्चात्तरे पुनः प्राप्ते मानवं पदमाप्नुयात्। देवं चतुर्भुजं
श्वेतं त्रिनेत्रं भवपूजितं। कपालहस्तं देवेशं कुंकुमांचितमूर्धजं। कृ
त्वा भक्त्या प्रतिष्ठाप्य शिवसायुज्यमाप्नुयात्। इत्येवं तं। रुद्रं वै सौम्यं सि
द्धिदं तं प्रभुं। सुधूम्रवर्णं रक्ताक्षं त्रिनेत्रं चंद्रशेखरं। काकपक्षधरं मुं
डं गदाटंकधरं मुद्रां। सिंहाजिनोत्तरीयं च मृगचर्मांबरः प्रियं। नीलकं २६८



दं खड्गदाहस्तं कपालोत्पलपाणिनं। हुंफट्कारमहानादं शब्दिता
शिलादिमुखं। पुंडरीकाजिनं दोर्भ्यां चित्रकैः कंचुकं तथा। हस्तं मृतं
चैव क्रीडंतं नदंतं कल्पसागरं। नृत्यंतं भूतसंघैश्च संवृतं गणकैः प्रभुं। पे.३
कृत्वा भक्त्या प्रतिष्ठाप्य शिवलोके महीयते। सर्वान् लोकान् विनिर्जि
त्य शिवलोके महीयते। तत्र भुक्त्वा महाभोगान् यावदाचंद्रतारकं। न त्रैवै
त्यपरितं लब्ध्वा फलदे मर्त्यमोदता। अर्धनारीश्वरं देवं चतुर्भुजमनुत्त
मं। वरदाभयहस्तं च शूलपद्मधरं तथा। स्त्रीपुंभावेन संछन्नं सर्वाभर
णभूषितं। कृत्वा भक्त्या प्रतिष्ठाप्य शिवलोके महीयते। तत्र भुक्त्वा महा
भोगान् अणिमादिगुणैर्वृतः। आचंद्रतारकं ज्ञानं ततो लक्ष्मीविमुक्तमनो यः
कुर्याद्विवदेवेशं सर्वज्ञं कुलमीश्वरं। वृतं शिष्यप्रशिष्यैश्च व्याख्यानोद्य

तपालिने। कृत्वा नक्त्या प्रतिष्ठाप्य शिवलोकं स गच्छति। भुक्त्वा तु विपु
लांस्तत्र भोगान् युगशतं नरः। ज्ञानयोगं समासाद्य तत्रैव स विमुच्यते।
पूर्वं देवासुराणां च तत्र स्थाणुः स कालजित्। त्रिपुण्ड्रधारिणस्तस्य शिरो
मालाधरस्य च। ब्रह्मणः केशकेनैकमुपवीतं च बिभ्रतः। बिभ्रतो वाम
हस्तेन कपालं ब्रह्मणो विभोः। विष्णोदकधरं चैव बिभ्रतः परमेष्ठिनः।
कृतमुद्रस्य देवस्य चिताभस्मानुलेपनः। कृत्वा नक्त्या प्रतिष्ठाप्य शिवसा
युज्यमाप्नुयात्। कालकूटकराज्वं ते निधाय आसीनमासने। कृत्वा नक्त्या २६९
प्रतिष्ठाप्य मुच्यते भवसागरात्। ॐ नमो नीलकण्ठाय इत्युद्धारेण राष्ट्रके।
मंत्रमाहसकृत् पापैः पातकैः स प्रमुच्यते। मंत्रेणानेन गंधाद्यैर्मंत्रविता
नुसारतः। संपूज्य देवदेवेशं शिवलोके महीयते। जालंधरान्तकं देवं

सुदर्शनधरं प्रभुं। कृत्वा नक्त्या प्रतिष्ठाप्य द्विधाकृतजलंधरं। प्रया
ति शिवसायुज्यं। नात्र कार्या विचारणा। सुदर्शनप्रदं देवं साक्षात्पूर्वोक्त
लक्षणं। अर्च्यमाने च देवेशं नवार्चितं नेत्रपद्मना। कृत्वा नक्त्या प्रतिष्ठाप्य
विष्णुलोके महीयते। तिष्ठतो यतिकुंतस्य पूज्यतश्चरणांबुजे। वामेत
रं प्रविन्यस्य वामेनालिंग्य चांबिकां। शूलाग्रेकोपरि स्थाप्य कं कणी
कृतपन्नगं। संप्रेक्ष्य सा च कं पार्श्वे कृतांजलिपुटं स्थितं। रूपं कृत्वा
यथान्यायं शिवसायुज्यमाप्नुयात्। यः कुर्यात् देवदेवेशं त्रिपुरान्तकमी
श्वरं। धनुर्बाणसमायुक्तं सोमं सोमार्धभूषणं। रथे सुसंस्थितं दिव्यं
चतुराननसारथी। तदाकारतया सोपि गत्वा शिवपुरं सुखं। क्रीडते
नात्र संदेहो द्वितीय इव शंकरः। तत्र भुक्त्वा महाभोगान् यावदिच्छा वि

जोत्तमांतं।क्रीडं तेनात्र संदेहो ज्ञानं विचारितालब्धं तत्रैव सविमुच्यते
गंगाधरं सुखासीनं।चंद्रशेखरमेव च।उमयासहितं चैव वामेगंगांबिका
न्वितं।विनायकं तथा स्कंधं नंदि दुर्गां सुशोभनं।भास्करं च तथा सोमं ब्रह्मा
णीं च महेश्वरीं।कौमारी वैष्णवी देवी वाराही वरदां तथा।इंद्राणी चैव चा
मुंडा वीरभद्रसमन्वितां।विघ्नेशो नवमं संपूज्य शिवसायुज्यमाप्नुयात्।लिं
गमूर्तिमिहाज्वालामालासंवृतमव्ययं।लिंगस्य मध्ये वै कृत्वा चंद्रशेख
रमुत्तमं।ब्रह्मीकुर्यात्तथा लिंगे ब्रह्माणं हंसरूपिणं।विष्णुं वाराहरूपि
णं लिंगस्याधस्त्वधोमुखं।ब्रह्माणं दक्षिणे तस्य कृतांजलिपुटं स्थितं
वामे विष्णुं महाबाहुं कृतांजलिपुटं स्थितं।मध्ये लिंगं महाघोरं महाभै
रवमुत्स्थितं।कृत्वा ल्पापूतिष्ठाप्य शिवसायुज्यमाप्नुयात्।क्षेत्रं गंगरद्र

कं देवं तथा पाशुपतं शुभं।कृत्वा जन्यायधाम्यायं शिवलोके मही
यते॥ ॥इति लैंगे पंचसप्ततितमोध्यायः॥ ॥७५॥ ॥लिंगप्र
तिष्ठापुण्यं च विश्वस्थापनमेव च।विद्यानां चैव भेदं च श्रुतं तव मुखा
द्विहा।मृदादि रत्नपर्यंतं द्रव्यं कृत्वा शिवालयं।यत्फलं लभते मर्त्यस्त
त्फलं वक्तुमर्हसि॥ ॥सूत उ०॥ ॥यस्य भक्तापि लोकेस्मिन्पुत्रदारगृहा
दिभि।बाध्यते ज्ञानयुक्तश्च न च तस्य गृहे स्थितिः।तथापि भक्त्या परमे
श्वरस्य कृत्वा पुष्पैरपि रुद्रलोकं।प्रयाति दिव्यैर्हि विमानवर्यैः सुरे
न्द्रपद्मोद्भववादतश्चास्वसंचलो देवं शिवं च कृत्वा मृदादिना पांशु
भिरादि देवं।गृहं च वै ताद्दशमस्य मुंजो संपूज्य रुद्रत्वमवाप्नुयाद्धि।
तस्मात्सर्वप्रयत्नेन धर्मकार्यार्थमुक्तये।केसरं नागरं वापि द्राविडं वा

तथापरं। कृत्वा सवालयं भक्त्या शिवलोके महीयते। कैला
साख्यं तु यः कुर्यात्प्रासादं परमेष्ठिनः। कैलासशिखरप्रख्ये विमा
ने मोदते सुखं। मंदिरं चात्र कुर्वीत शिवाय विधिपूर्वकं। भक्त्या
वित्तानुसारेण उत्तमाधममध्यमं। मेदराद्यैर्विचित्रैश्च विमानै
र्विश्वतोमुखैः। अप्सरोगणसंकीर्णैर्देवदानवदुर्लभैः। गत्वा शिव
पुरं दिव्यं भुक्त्वा भोगानशेषतः। ज्ञानयोगसमासाद्य गाणपत्यं ल
भेन्नरः। यः कुर्यान्मेरुनामानं प्रासादं परमेष्ठिनः। स फलं समवाप्नो २७१
ति न तत्सर्वैर्महामखैः। सर्वयज्ञतपोदानतीर्थवेदेषु यत्फलं। तत्फलं
सकलं लब्ध्वा शिववन्मोदते चिरं। निषधनामकं यः कुर्यात्प्रासादं भक्ति
तः सुधी। शिवलोकमनुप्राप्य शिववन्मोदते चिरं। कुर्याद्यः श्रीवृक्षं

---

विप्रा हिमशैलाख्यमुत्तमं। हिमशैलोपमैर्मुक्तैर्गत्वा शिवपुरं सुखं
ज्ञानयोगं समासाद्य गाणपत्यमवाप्नुयात्। नीलाद्रिशिखराख्यं यः प्रा
सादं यः शुभोभनं। कृत्वा वित्तानुसारेण भक्त्या रुद्राय शंभवे। यत्फलं ज
नते मर्त्यस्तत्फलं प्रवदाम्यहं। हिमशैले कृते भक्त्या यत्फलं प्राक्प्रचो
दितं तत्फलं सकलं लब्ध्वा सर्वदेवनमस्कृतः। रुद्रलोकमनुप्राप्य रु
द्रैः सार्धं प्रमोदते। महेंद्रगिरिनामानं प्रासादं रुद्रसंमतं। कृत्वा य
त्फलमाप्नोति तत्फलं प्रवदाम्यहं। महेंद्रपर्वताकारैर्विमानैर्वृष
संयुतैः। गत्वा शिवपुरं दिव्यं भुक्त्वा भोगान्यथेप्सितान्। ज्ञानं विचार
तं रुद्रैः सम्प्राप्य मुनिपुंगवा। विषयान्विषयं त्यक्त्वा शिवसायुज्यमाप्नुया
त्। हेमाख्यं यस्तु प्रकुर्वीत प्रासादं रत्नशोभितं। द्राविडं नागरं वापि

केसरंवाविधानतः। कृतंवामंडलंवापीसमंवादीर्घमेववा। नतस्य
त्राक्यतेवक्तुंपुण्यंमुगनूांतैरपी। जीर्णंवापतितंवापीखंडितंस्फु
टितंतथा। पूर्ववत्कारयेद्यस्तुसुधाद्यैस्तुश्रमेद्विजाः। प्रासादंम
डपंवापीप्राकारंगोपुरंतथा। कर्त्तुरभ्यधिकंपुण्यंलभतेनात्रसंश
यः। नृत्यार्थंचात्रकुर्वीतनरःकर्मशिवालये। सयातिचनसंदेहः
स्वर्गलोकंसबांधवैः। यस्यात्मनोभोगासद्भिरपिरुद्रालयेसदा
कर्मकुर्याद्यदिसुखाल्लक्षावापिप्रमोदते। तस्माद्वायत्नतोमर्त्य २९२
यःकुर्यान्मुनिपुंगवाः। अभीष्टकामिवामर्त्यःशिवलोकेमहीयते।
प्रासादार्थंमहेशस्यप्रासादंमुनिपुंगवा। कर्त्तव्यंसर्वयत्नेनधर्मका
मार्थमुक्तये। अशक्तश्चेन्मुनिश्रेष्ठाः प्रासादेकर्त्तुमीश्वरे। सन्मार्ज

नादिभिर्वापीसर्वान्कामानवाप्नुयात्। सन्मार्जनंतुयःकुर्यात्मार्जन्यां
मृदुसूक्ष्मया। चांद्रायणसहस्रस्यफलंमासेनलभ्यते। यःकुर्याद्व
स्त्रपूतेनगंधगोमयवारिणा। आलेपनंयथान्यायं वर्षंचांद्रायणंल
भेत्। अर्द्धक्रोशंशिवक्षेत्रेशिवलिंगात्समंततः। यस्यजंतुस्त्यजा
प्राणान्तथावैजेभुकेश्वरे। ओंकारेश्वरेनागोकर्णेभास्करेयोगुहेश्व शे
कैलि रे। हिरण्यगर्भेनांदीशेसयातिपरमांगतिं। नियमेशोधयेद्देहंत्यजे
त्क्षेत्रेशिवस्यतु। संयातिशिवतांयोगेमानुषेदैविकेपिवा। आर्षेवापि
मुनिःश्रेष्ठास्तथास्वायंभुवेपिवा। स्वायंभूतेतथान्यापैनत्रिकार्याविचारणा
चारणात्। आधाराग्नित्रिवक्षेत्रेसंपूज्यपरमेश्वरं। स्वदेहपिंडेजुहु
यात्सयातिपरमंपदं। यावत्तावन्निराहारोभूत्वाप्राणान्परित्यजेत्

तस्मात्सततगुणं लिंगस्पर्शनं च प्रदक्षिणे २

शिवक्षेत्रे मुनिश्रेष्ठाः शिवसायुज्यमाप्नुयात् ॥ छित्वा पादद्वयं चापि शि
वक्षेत्रे व्रजेत्तु यः ॥ स याति शिवतां चैव नात्र कार्या विचारणा ॥ क्षेत्रस्य
दर्शनं पुण्यं प्रवेशं तु शताधिकं ॥ तस्मात्सततगुणं कूपे जलस्नानेन त
तः परं ॥ क्षीरस्नानेन ततो विप्राः शताधिकमनुत्तमं ॥ दध्ना सहस्रमाख्या
तं मधुना तच्छताधिकं ॥ घृतस्नानेन चानंतं संसेवा सततं छताधिकं ॥ शिव
क्षेत्रे समीपस्थाः नद्यः सर्वाः सुशोभनाः ॥ वापीकूपतडागाश्च शिवतीर्थानि
स्मृतानि ॥ स्नात्वा तेषु नरो भक्त्या तीर्थेषु मुनिसत्तमाः ॥ ब्रह्महत्यादिभिः पापै २९२
र्मुच्यते नात्र संशयः ॥ प्रातः स्नात्वा नरः श्रेष्ठ शिवतीर्थेषु मानवाः ॥ अश्वमे
धफलं प्राप्य रुद्रलोकं स गच्छति ॥ मध्याह्ने शिवतीर्थेषु स्नात्वा भक्त्या म
नराः ॥ गंगास्नानसमं पुण्यं लभते नात्र संशयः ॥ अस्तंगते तथार्के च स्नात्वा

गच्छेच्छिवं परं ॥ पातकं च समुत्सृज्य च शिवतीर्थेषु मानवाः ॥ द्विजास्त्रिष
वणं स्नात्वा शिवतीर्थे सकृन्नरः ॥ शिवसारूप्यमाप्नोति नात्र कार्या वि
चारणा ॥ द्विजास्त्रिषवणं स्नात्वा पुरा च शूकरः कश्चित् ॥ स्थानं दृष्ट्वा म
यात्यपि ॥ प्रसंगात्कारणात्स्पृष्ट्वा तु शिवतीर्थे विगाह्य वा ॥ मृतः स्वयं द्विजाः श्रे
ष्ठाः गाणपत्यमवाप्नुयात् ॥ यः प्रातर्देवदेवेशं शिवलिंगस्वरूपिणं ॥ प्र
ण्याघो याति सर्वान्पापान्दाधकां गतिमवाप्नुयात् ॥ मध्याह्ने च तथा देवं दृष्ट्वा
यज्ञफलं लभेत् ॥ सायाह्ने सर्वयज्ञानां फलं प्राप्य विमुच्यते ॥ अर्धमास
कृतं पापं दृष्ट्वा पर्वसु संत्यजेत् ॥ अष्टम्यां मध्यदिवसे कृतं सर्वं त्यजेन्नरः
प्रदोषे शंकरं दृष्ट्वा सर्वपापैः प्रमुच्यते ॥ मानसैर्वाचिकैः पापैः कायिकैश्च
महत्तमैः ॥ तथोपपातकैश्चैव पापैश्चैवोपपातकैः ॥ संक्रमे वृषमीशा

दृष्ट्वा लिंगगतं प्रभुं। मानसैर्यत्कृतं पापं त्यक्त्वा याति शिवं पदं। अयने चा
र्धमासैर्यद्दक्षिणे चोत्तरे तथा। विषुवे चैव संत्यज्य प्रयाति परमां गतिं॥
प्रदक्षिणत्रयं कुर्यात् यः प्रासादे समंततः। सव्यापसव्यन्यायेन मृदुगत्या
शुचिर्नरः॥ पदे पदेश्वमेधस्य यज्ञस्य फलमाप्नुयात्। वाचा वा यः शिवं
नित्यं स्तूयते परमेश्वरः॥ सोपि याति शिवस्थानं प्राप्य किं पुरुषैर्नरैः कैः
॥ कृत्वा मंडलकं क्षेत्रे गंधगोमयवारिणा। मुक्ताफलमयैश्चूर्णैः इन्द्र
नीलमयैस्तथा। पद्मरागमयैश्चैव स्फाटिकैश्च सुशोभनैः॥ तथा मारक २५४
तैश्चैव सौवर्णै राजतैस्तथा। पद्मरागमयैश्चैव स्फाटिकैश्च सुशोभनैः॥ त
था मारकतैश्चैव तं वर्णैर्लौकिकैर्वापि चूर्णैर्विकृतिवर्जितैः। आलिख्य क
मलं मध्ये दशहस्तप्रमाणतः॥ सकर्णिकं महाभागा महादेवसमीपतः।

तत्रावाह्य महादेवं तत्र भक्तिसमन्वितः। पंचभिश्च तथा षड्भिरष्टभिश्चै
ष्टमर्दनं। पुनरष्टाभिरीशानं दशारैर्द्वादशभिस्तथा। पुनर्बाह्ये च दशभिः सं
पूज्य प्रणिपत्य च। निवेद्य देवदेवाय क्षीरोदनफलेन तु। शालिपिष्टादि
भिर्वापि पद्ममालिख्य शास्त्रतः॥ पूर्वोक्तमखिलं पुण्यं लभते नात्र संशयः॥
द्वादशारं तथालिख्य मंडलं पद्ममुत्तमं। रलचूर्णादिभिश्चूर्णैस्तथा हाटकासू
त्रिभिः। मंडलस्य तु मध्ये तु भास्करं स्थाप्य पूजयेत्। ग्रहैश्च संहितं वापि सूर्य
सायुज्यमुत्तमं। एवं प्रकृतमाप्नोति यो षडस्रे परिकल्प्य च। मध्ये अहं च देवे
शं प्रकृतिब्रह्मरूपिणं। प्रदक्षिणे सत्वमूर्त्तिं वामतश्च रजोगुणं। कर्मे
द्रियाणि पंचैव तथा बुद्धींद्रियाणि च। अहंकारं च मनसा सर्वयज्ञफलं प्र
नेन्। एवं च कथितं सर्वं प्रकृतं मंडलं परं। वर्णं वक्ष्यामि विप्रेंद्राः सर्वका

मार्थसाधनं। गोचर्ममात्रमालिप्य मंडले गोमयेन तु। चतुरस्रं विधा-
नेन चाङ्गिरःसुसूक्ष्ममंत्रवित्। अलंकृत्य वितानाद्यैश्चित्रैर्वा विमनो-
रमैः। बुद्बुदैरर्धचंद्रैश्च हेमैरश्वत्थपत्रकैः। सितैर्विकसितैः पद्मैः
रक्तनीलोत्पलैस्तथा। मुक्तादामैर्वितानैश्च लंबितैश्च सितैर्ध्वजैः।
सितमृत्पात्रकैश्चैव सुसूक्ष्मैः पूर्णकुंभकैः। फलपल्लवमालाभिर्वीज-
यंतीभिरंशुकैः। पंचाशद्दीपमालाभिर्धूपैः पंचविधैस्तथा। पंचाशः
दलसंयुक्तमालिख्येत्तस्य मुत्तमं। तत्तद्वर्णैस्तथा चूर्णैश्च तच्चूर्णैरथा- २१५
पि वा। एकहस्तप्रमाणेन। कृत्वा पद्मं विधानतः। कर्णिकायां न्यसेद्देवं
देव्या देवेश्वरं नवं। वर्णानि च न्यसेद्वर्णैः प्रयोगाद्यमनुक्रमात्। प्रणवा-
दिनमोंतानि सर्ववर्णानि सुव्रता। संपूज्यैवं मुनिश्रेष्ठ गंधपुष्पादिभि-

क्रमात्॥ ब्राह्मणान् भोजयेत्तत्र पंचाशद्विधिपूर्वकं। अक्षमालोप-
वीतं च कुंडले च कमंडलुं। आसनं च तथा दंडमुष्णीषं वस्त्रमेव चा-
दत्वा तेषां द्विजः श्रेष्ठा देवदेवाय शंभवे। महास्तुतिं निवेद्यैव कृत्स्नं
गोमिथुनं तथा। अंते च देवदेवाय दीपये द्वर्णमंडलं। यागोपयोगी-
द्रव्याणि शिवाय विनिवेदयेत्। ॐकाराद्यं जपेद्धीमान् प्रतिवर्णमनु-
क्रमात्। एवमालिख्य यो भक्त्या वर्णमंडलमुत्तमं। यः फलं लभते म-
र्त्यस्तद्वदामि समासतः। सांगान् वेदान् यथान्यायमधीत्य विधिपूर्वकं।
इष्ट्वा यज्ञैर्यथान्यायं ज्योतिष्टोमादिभिः क्रमात्। ततो विश्वजिदंतैश्च
त्रानुत्पाद्य तादृशान्। वानप्रस्थाश्रमं गत्वा सादरः साग्निरेव च। चांद्रा-
यणादिकान् सर्वान् कृत्वा सम्यक् वै द्विजा। ब्रह्मविद्यामधीत्यैव ज्ञान

मापाद्यय त्वत्तः॥ ज्ञानेन ज्ञेयमालोक्य योगी यत्फलमाप्नुयात्॥ तत्फलं ल
भते सर्ववर्णमंडलदर्शनात्॥ येन केनापि वा मर्त्य प्रतिष्ठापयते नायतः॥
उन्नरे दारुणे वापीष्टे तोवापि द्विजोत्तमा॥ चतुःकोणेपि वा चूर्णैः स्थले स्त्र स
मेतनः॥ पुष्पाद्यैर्दातादिभिः पूज्य सर्वपापैः प्रमुच्यते॥ यस्तु गर्भगृहं नत्वा सम
द्वालिप्य सुव्रताः चंदनाद्यैः कर्पूरैः गंधद्रव्यैः समंततः॥ विकीर्य गंधकुसुमै
धूपैर्धूप्य चतुर्विधैः॥ प्रार्थयेद्देवमीशानं शिवलोके महीयते॥ तत्र भुक्त्वा महाभो
गान् कल्पकोटिशतैस्तरः॥ स्वदेहं गंधकुसुमैः पूजयेन् शिवमंदिरे॥ क्रमा २१६
गंधर्वमासाद्य गंधर्वैश्च सुपूजितः॥ क्रमादागत्य लोकेस्मिन् राजा ज
वतिवीर्यवान्॥ ॥ इति श्रीमहापुराणे षट्सप्ततितमोध्यायः॥ सूत उ
वस्त्रपूतेन तोयेन कार्यं चैव प्रवेशनं॥ शिव हे ते मुनिश्रेष्ठा नान्यथासि

द्धिरिष्यते॥ आपः पूतां भवंत्येव वस्त्रपूताः समुद्धृताः॥ अबुनामुनि
ग्राह्यन्ता श्रीदेयाश्च विशेषतः॥ तस्माद्वै सर्वकार्याणि दैविकानि द्वि
जोत्तमा॥ अद्भिः कार्याणि सततं स्वनाभिः सर्वसिद्धय॥ जंतुभिः मिश्रि
ताद्यापः स्थूल्मानि स्ता न्नीरीद्यपंतु॥ महापंसकत्वाश्च रपूतानि स्वि
रं जनेत्॥ सन्मार्जने तथा दृणे मार्जने च विशेषतः॥ अग्निकार्युक्त
केवै व पीषणे तोयसंग्रहे॥ हिंसा सदा गृहस्थानां तस्माद्धिंसां विव
र्जयेत्॥ अहिंसा हि परो धर्मः सर्वेषां प्राणिनां यतः॥ यस्मात्सर्वप्रय
त्नेन वस्त्रपूतेन कारयेत्॥ तद्दानमनयं पुण्यं सर्वदानोत्तमोत्तमं॥
तस्मात्तु परिहर्तव्यां हिंसा सर्वत्र सर्वदा॥ मनसा कर्मणा वाचा सर्वदा
हिंसकं नरं॥ रक्षंति जंतवः सर्वे हिंसकं बाधयंति च॥ त्रैलोक्यमाखिलं

व:१

दत्वा यत्फलं देवपार्श्वे । तत्फलं कोटिगुणितं लभते हि स को नरः ॥ मन
सा कर्मणा वाचा सर्वभूतहिते रताः । दयादृष्टिनिपन्ना ये रुद्रलोकं व्रजं
ति ते ॥ स्वामिवत्परिरक्षन्ति ये बहूनि विविधानि ये । पुत्रवत्पौत्रवत्तेहान्
रुद्रलोकं व्रजंति ते । तस्मात्सर्वप्रयत्नेन वस्त्रदानेन वारिणा । कार्यम
भ्युद्धरणं चैव धूपनेनानुलेपनैः । त्रैलोक्यमखिलं हत्वा यत्फलं परिकी
र्तितं । निर्वाणयेन्निहत्यैकमपि वृक्षं फलं लभेत् । त्रिवार्षं सर्वदा कार्यं २११
पुष्पहिंसादिजोत्तमैः । यज्ञार्थे पशुहिंसा च कृत्रिये ईश्वरासने । विहि
ता विहितं नास्ति योगिनां ब्रह्मवादिनां । यतस्ततस्मान्न हंतव्या निर्विघ्ना
नां नित्रो वर्णानां । सर्वकर्माणि ~~मनस्स~~ विन्यस्य संन्यस्ता ब्रह्मवादिनः । न
हंतव्याः सदा पूज्याः पापकर्मरता अपि । न हंतव्याः स्त्रियः सर्वा अत्रेश्च

कुलसंभवाः । ब्रह्महत्यासमं पापं आत्रेयविनिहत्यया । स्त्रियः स
र्वा न हंतव्याः सर्वे सर्वत्र सर्वदा । सर्ववर्णविशेषज्ञाः पापकर्मरता
अपि । मलिनारूपपत्स्य च विरूपा मलिनो बरा । न हंतव्या सदा म
र्त्यैः संपूज्या त्रिजगत्कया । वेदवादव्रताः सर्वे नवेद्याणकारणी ।
ये भक्ता देवदेवस्य शिवस्य परमेष्ठिनः । नागयवैतौ विमुच्यंते मुक्ता
योगानि दैवतां पुत्रे पुदारेषु गृहे पुत्रेण रक्षं यथा विमथादि देवेस
कृत्स्नसंगाद्यदि तापसानां तथा न हरः परमेशलोकः ॥ ॥ इति श्री
महापुराणे श्रीलैंगे सप्तसप्ततितमोऽध्यायः ॥ ॥ ऋषय ऊ ॥ ॥ कथं
पूज्यो महादेवो मर्त्यैर्मर्त्यैर्महामते । अल्पवीर्यैस्तथापुष्परत्य

स त्वै प्रजापतिः। संवत्सरसहस्रैश्च तपसा पूज्यत्नाकरः। न पश्यंति
सुराश्चापी कथं देवं यजंति कौ॥ ॥सूत उ०॥ ॥कथितं तत्यमेवात्र
मुख्यान्निर्मुनिपुंगवा। तथापि श्रद्धया दृश्यः पूज्यश्चात्माख्य एव चाप्र
संगाच्चैव संपूज्यो नक्तिहीनैरपि द्विजे। नावानुरूपफलदो नगःवा
निति कीर्तितं। उच्छिष्टपूजया चैव पैशाचं त्वं द्विजोत्तमा। संक्रुद्धो
राक्षसं स्थानं प्राप्नुयान्मूढ द्विजा। अनन्यमनसा संपूज्य याक्षं
प्राप्नोति स्थानं। गानशीलश्च गांधर्वं नृत्यशीलस्तथैव च। रत्नाति
शीलस्तथा कामं स्त्रिषु सक्तो नराधमः। यदर्थं पूज्ययेद्रुद्रं स तं
स्थानमाप्नुयात्। गायत्र्याद्यं समभ्यर्च्य प्राजापत्यमवाप्नुयात्॥ २१८

वा०

ब्रह्मलं हि प्रणवेनैव वैसवं चानिवेद्य च। श्रद्धया सकृद्देवापी
समभ्यर्च्य महेश्वरं। रुद्रलोकमनुप्राप्य रुद्रैः सार्धं प्रमोदते। सर्वा
ध्यक्षं सुरैर्लिंगमसुरासुरवंदितं। अग्निहोत्रैस्तथा पूर्णं देवमावा
ह्य नाकितः। दृष्ट्वा देवं यथाप्रोक्तं प्रणिपत्य च शंकरं। कल्पितं चास
ने स्थाप्य धर्मज्ञानमयेशुभे। वैराग्यैश्वर्यसंप्राप्ते सर्वलोकनम
स्कृते। उंकारपद्ममध्ये तु सोमसूर्याग्निसंभवे। पाद्यमाचमनं चा
र्घं दत्वा रुद्राय शंभवे। स्नापयेद्दिम्यतोयैश्च घृतेन पयसा तथा
दध्ना च स्नापयेद्रुद्रं शोधयेच्च यथाविधी। ततः शुद्धांबुना स्नाप्य
चंदनाद्यैश्च पूजयेत्। रोचनाद्यैश्च संपूज्य दिव्यपुष्पैः प्रपूजयेत्।
बिल्वपत्रैरखंडैश्च पद्मैर्नानाविधैस्तथा। नीलोत्पलैश्च राजीवै

नैद्यावर्तैश्च मल्लिकैः। चंपकैर्जातिपुष्पैश्च बकुलैः करवीरकैः।
शमीपुष्पैर्बृहत्पुष्पैरुन्मत्तैरपि नागजैः। अपामार्गकदंबैश्च भूष
णैरपि शोभनैः। दत्वा पंचविधं धूपं पायसं च निवेदयेत्। शुद्धान्नं
चैव मुद्गान्नं षड्विधं च निवेदयेत्। अथ पंचविधं वापी सघृतं च
निवेदयेत्। केवलं चापि शुद्धान्नं माठकं तंडुलं पचेत्। कृत्वा प्र
दक्षिणं चापि नमस्कृत्य मुहुर्मुहुः। स्तुत्वा च देवमीशानं पुनः संपू
ज्य मंत्रकैः। ईशानं पुरुषं चैव अघोरं वाममेव च। सद्योजातं तत्पंच २७९
पश्चात्पंचभिः पूजयेच्छिवं। अनेन विधिना देवः प्रसीदति महेश्वरः
बहुभिश्च पुष्पपत्राद्यैरुपयुक्तो शिवार्चने। गावश्चैव द्विजाश्चेष्टाः
प्रयांति परमां गतिं। पूजयेद्यस्त्रिवेरुद्रं सर्वत्र वमजं सकृत्। सयाति

शिवसायुज्यं त्रिसप्तकुलसंयुतः। पूजितं च महादेवं पूज्यमानं
मथापि वा। दृष्ट्वा प्रयाति वै मर्त्यो ब्रह्मलोकं न संशयः। कृत्वा लभो
दयेद्यापि स याति परमां गतिं। अर्चितं परमेशानं त्र्यंबं सर्वमुमापतिं
सकृत्स्वर्गाद्वा दृष्ट्वा सर्वपापैः प्रमुच्यते। संपूज्यमानं वा पश्येद्विधि
ना परमेश्वरं। स याति ब्रह्मणो लोकं श्रद्धया मुनिसत्तमाः। आवाहनं २५
च सान्निध्यं स्नापनं पूजनं तथा। प्रोक्तं रुद्रस्य गायत्र्या मर्दनं संप्रणवेन
वै। पंचभिः स्नपनं प्रोक्तं सद्योद्यैश्च दिशोपतः। एवं संपूज्य येन्नृत्यं दे
वदेवमुमापतिं। ब्रह्माणं दक्षिणे तस्य प्रणवेन समर्चयेत्। उत्तरे दे
वदेवेशं विष्णुं वै गायत्र्या यजेत्। वह्नौ कृत्वा यथान्यायं पंचभिः प्रणवे
न वा। स याति शिवसायुज्यं एवं संपूज्य शंकरं। इति सांख्येन तथा प्रोक्तं

लिंगार्चनविधिक्रमः॥ व्यासेन कथितं पूर्वं श्रुत्वा रुद्रमुखात्स्वयं।
इति श्रीलैंगे अष्टसप्ततितमोध्यायः॥ ॥७८॥ ॥
कथं पशुपतिं दृष्ट्वा पशुपाशविमोचकं। पशुत्वं तत्यजुर्देवाः सर्वं
वक्तुमिहार्हसि॥ ॥सूत उ०॥ ॥पुरा कैलासशिखरे भोगाख्ये स्वपु
रे स्थितं। समेत्य देवाः सर्वज्ञं तुष्टुवुस्तत्प्रसादतः। पशुभावं द्विज
श्रेष्ठास्तत्रैव ध्वंसमासतः। हिताय सर्वदेवानां ब्रह्मणा च जना
र्दनं। गरुडस्य तथा स्कंधमारुह्य पुरुषोत्तमः। जगाम देवता भि २८०
र्वै दैवतैर्वृतिकं हरिः। सर्वे संप्राप्य देवस्य सार्धं गिरिवरं शुभं। से
न्द्रासाध्याश्च संयमाः प्रणेमुर्गिरिमुत्तमं। भगवान्वासुदेवोपि गरुड
तु गरुडध्वजः। आरुरोह गिरिं मेरुमारुरोह सुरोत्तमैः सकलैर्दे

रित्वहीनं सर्वदं भोगमुख्यं मुदितकुररहंसैर्नादितं नागवृंदैः। म
धुरमधुरगीतं मालकाकान्वकारैः पद्मरचितवनांतं कांतया मंतते
यं। भवनमालसहस्रैर्जुष्टमादित्यकल्पैर्ललितगतिविदग्धैर्हंसवृं
दैश्च मित्रं। धवखदिरपलाशैश्चंदनाद्यैर्विशालैर्द्विजवरगणवृं
दैः कोकिलाद्यैर्विचालैः। क्वचिद्दिशापसुरद्रुमकानसं संकुलं कुरवकै
स्तिलकैः प्रियैश्चैस्तथा। गिरेः पुरं सर्वकल्पितं विश्वकर्मणा। क्री
डार्थं देवदेवस्य भवस्य परमेष्ठिनः। अपश्यंतः सुरेंद्राः सं दोपें
द्राः समाहिताः। प्रणेमुर्दूरतश्चैव प्रभावाद्देवशूलिनः। सहस्रसूर्य
प्रतिमं महांतं सहस्रशः सर्वगणैश्च मित्रं। जगाम कैलासगिरिं द्रु
मेंद्रं समप्रभं गोपुरमादिदेवः। सपादचारीगजवाजिसंकुलं रथैरने

केरमरारिसूदनः॥ गणैर्गणेशस्य गिरिंद्रसंनिभैर्महापुरद्वारमजो हरि
श्च॥ अथ जांबूनदमयैर्नवनैर्मणिभूषितैः॥ विमानैर्विविधाकारैः प्रा
कारैश्च समावृतां दृष्ट्वा शंभोः पुरं ब्राह्मं देवैः सब्रह्मकैर्हरिः॥ प्रहृष्टवद
म्प४ नो भूत्वा प्रविवेश ततः परं हर्म्यप्रासादसंबाधं महालयसमन्वितं। द्वि
तीयं देवदेवस्य चतुर्द्वारं सुशोभनं। वज्रवैडूर्यमाणिक्यमणिशालैः स
मावृतं। दोलाविक्षेपसंयुक्तं घंटाचामरभूषितं। मृदंगमुरजोत्कृष्टवीणा
वेणुनिनादितं। नृत्यद्भिः सुरसंघैः संघैर्भूतसंघैश्च संवृतं। देवेंद्रभव २०२
नाकारैर्भवनैर्वनैर्दृष्टिमोहनैः प्रासादशृंगेष्वथ देवनार्यः सहस्रशः
पुष्पजेषाकृताक्षैः॥ स्थिता करैरस्य हरेः स्मयेत्यः प्रचिक्षिपुर्मूर्ध्नि पुष्पा
नवस्य। दृष्ट्वा नार्यस्तथा विष्णुं मदघूर्णितलोचना। विशालजघना दृष्ट्वा

ननृतुर्मुमुहुर्जगुः॥ काश्चिद्दृष्ट्वा हरिं नार्यः किंचित्स्मितहसिताननाः। का
श्चिद्दिश्च स्तवस्ताश्चलस्तकांचीगुणा जगुः। चतुर्थं पंचमं चैव षष्ठं वै सप्त
मं तथा। अष्टमं नवमं चैव दशमं च पुरोत्तमं। अतीत्य प्रासाद देवस्य पु
रं शंभोः सुशोभनं। सुहृत्तमं तत्र राजश्रेष्ठ कैलासाग्निशिखरेऽभ्रे। सूर्यमंडल
संकाशैर्विमानैश्च विभूषितं। स्फाटिकैर्मंडलैः शुभ्रैर्जांबूनदमयैस्तथा
नानारत्नमयैश्चैव नानाभूषणभूषितैः। अनेकैः सर्वतोभद्रैः सर्वरत्न
मयैस्तथा। प्राकारैर्विविधाकारैरष्टाविंशतिभिर्वृतं। अष्टाविंशतिभि
श्चैव ~~नानानाभूषणभूषितैः। अनेकैः सर्वतोभद्रैः सर्वरत्नमयैस्तथा॥~~
अष्टदिक्षु विभूषितं। गोपुरैर्गोपतेः शंभोर्नानामणिमयैः शुभैः॥ उपद्वा
रैर्महाद्वारैर्विदिक्षु विविधैर्दृढैः। गुह्यालयैर्गुह्यगृहैर्गुह्यसंभवनैः शुभैः।

उन्मिरन्यैर्महानागामौक्तिकैर्दृष्टिमोहनैः। गणेशायतनैर्दिव्यैः पद्मराग-
मैः स्तंभैः॥ प्राकारैर्विविधाकारैः पुष्पोद्यानैश्च नूतनैः। तडागैर्दीर्घिकाभि-
श्च हेमसोपानपंक्तिभिः। स्त्रीणां प्रतिजितैर्हंससेविताभिः समंततः॥ म-
यूरैश्चैव कारंडैः कोकिलैश्चक्रवाककैः। शोभिताभिश्च वापीभिर्दि-
व्यामृतजलैस्तथा॥ सलीलालोलकुंतलैः सर्वाभरणभूषितैः॥ प्रसून-
शरासनप्रेमसंघूर्णितलोचनैः॥ गोपनाद्यरतैर्दिव्यैः रुद्रकन्याः सहस्र-
कैः॥ नृत्यद्भिरप्सरःसंघैरमरैरपि दुर्लभैः। पृथुश्रोणिकुचद्वंद्वजटाटोपैरास्यवि-
जवैरपि। कृत्तिस्त्रीगुणसंकीर्णं जलक्रीडैरलंकृतैः रतोत्सवकृतैश्च
वसवासितैश्च पदे पदे रम्यप्रासादसंस्थैश्च पद्मरागसमप्रभैः स्फटिकैः
संघैर्देवदेवस्य भवनस्य परमात्मनः॥ दृष्ट्वा विस्मयमापन्ना स्तस्थुः

देवाः समंततः। तत्रैव ददृशुर्देवा वृंदारुद्रगणस्य वा। गणेश्वराण-
वीराणामपि वृंदं सहस्रशः॥ सुवर्णकृतसोपानान् वज्रवैडूर्यभूषिता-
न्। स्फाटिकान् देवदेवस्य ददृशुस्ते विमानकान्। तेषां शृंगेषु दृष्ट्वा सुना-
र्यः कमललोचनाः। विशालजघना नार्यो गंधर्वाप्सरसस्तथा। किंनर्यः
किंनराश्चैव भुजंगाः सिद्धकन्यकाः। नानाविधधराश्चान्या नानाभरण-
भूषिताः। नानाभावसंयुक्ता नानाभोगरतिप्रियाः। नीलोत्पलदलप्र-
ख्याः पद्मपत्रायतेक्षणाः। पद्मकिंजल्कसंकाशा रश्मकैरतिशोभना
बलयैर्नूपुरैर्हारैर्दिव्यचीरैस्तथांबरैः। भूषिता भूषणैश्चान्यैर्मंडिता
मंडनप्रियाः। दृष्ट्वा घंटेंद्रसुरसुंदरीणां गणेश्वराणां मतिसुंदरीणां। ज
गुर्गणेशस्य पुरं सुरेशाः पुरद्विषः शक्रपुरोगमास्ते। दृष्ट्वा गतस्थुः स्व

र सिद्धसंघाः पुरस्य मध्ये पुरुहूतपूर्वाः। नवस्य बाजार्कसहस्रवर्णे
विमानमाद्ये परमेश्वरस्य। अथ तस्य विमानस्य द्वारि संस्थं गणे
श्वरं। नंदिनं ददृशुः सर्वे देवाः शक्रपुरोगमाः। नं दृष्ट्वा नंदिनं सर्वे प्र
णम्याङ्कुर्गणेश्वरं। जयेति देवास्तं दृष्ट्वा स्तोष्याह च गणेश्वरः। भोभो
देवा महाभागाः सर्वे निर्धूतकल्मषाः। संपूज्याः सर्वलोकेस्कवकुमहर्षि
सुव्रता। तमाहुर्वरदं देवाः वानरेन्द्रमुखप्रजं। पशुपाशविमोक्षार्थं
दर्शयास्मान्महेश्वरं। पुरा पुरत्रयं दग्धुं पशुत्वे परिज्ञापिते त्रं। किंत्व
श्वयं तत्र पशुत्वं प्रतिसुव्रते। व्रतं पाशुपतं प्रोक्तं भवेन परमेष्ठिनः। २८३
व्रतेनानेन भूतेन पशुत्वं नैव विद्यते। अथ द्वादशाब्दं वा मासं द्वादशा
मेव वा। द्विमासं द्वादशाहं वापी कृत्वा तद्व्रतमुत्तमं। मुच्यंते पशवः सर्वे पशुपा

शोऽर्जवस्योत्तु। दर्शयामास तान्नंदी नारायणपुरोगमान्। नंदी शिलाद
तनयः सर्वभूतगणाग्रणी। ते दृष्ट्वा देवमीशानं सोबं सगणमव्ययं। प्र
मुस्तुष्टुवुश्चैव प्रीतिकंटकितत्वचः। विज्ञाप्य त्रिलोकिंगाय पशुपाशविमो
क्षणं। तस्थुः नदायतः शंभोः प्राणिपत्य पुनः पुनः। ततः संप्रेक्ष्य तान् सर्वान्
देवदेवो वृषध्वजः। विज्ञाप्य तेषां देवानां पशुत्वं परमेश्वरः। व्रतं पाशु
पतं चैव स्वयं देवैः महेश्वरः। उपदिष्य मुनीनां च तथा तेषां वर्षावहात
दा प्रभृति ये देवाः सर्वे पाशुपताः स्मृताः। पशूनां च पतिर्यस्मात् देशां साक्षा
द्वि देवता। तस्मात्पाशुपताः प्रोक्तास्तपस्ते युश्च ते पुनः। ततो द्वादशवर्षा
ते मुक्ताया शास्त्रपुरोगमाः। ययुर्यथागतं सर्वे ब्रह्मणा विष्णुना सह।
एतद्वः कथितं सर्वं पितामहमुखाच्छ्रुतं। पुरा सनत्कुमारेण तस्माद्व्यासे

नधीमता। यः श्रावयेत्कश्चिद्विप्रान् श्रृण्याद्वाथ्वविर्नरः। स देहभे
दनाशाय पशुपाशात्प्रमुच्यते॥ ॥इति लैंगे एकोनाशीतितमोऽध्या
यः॥ ॥ऋषय ऊ॥ ॥श्रुतमेतत्त्वयाख्यातं पशुपाशविमोक्षणं।
व्रतं पाशुपतं लैंगे सुरेन्द्रैरनुष्ठितं। वक्तुमर्हसि चास्माकं यथापूर्वै
रनुष्ठितं। वक्तुमर्हसि यस्मात्तु यथापूर्वं त्वया श्रुतं॥ ॥सूत उ॥ ॥
पुरा सनत्कुमारेण पृष्टः शैलादिरादरात्। नंदी प्राह च तस्मै तत्प्र
वदामि समासतः। देवैर्दैत्यैस्तथा यक्षैः गंधर्वैः सिद्धचारणैः। मु २८८
निभिश्च महाभागैरनुष्ठितमनुत्तमं। व्रतं द्वादशलिंगाख्यं पशुपा
शविमोक्षणं। भोगदं योगदं चैव कामदं मुक्तिदं शुभं। त्रिवियोगज
रं पुण्यं मुक्तानां नयनाशनं। षडंगसहितान्वेदानधीत्य तेन मितं।

सर्वदानोत्तमं पुण्यं अश्वमेधायुताधिकं। सर्वमंगलदं पुण्यं स
र्वशत्रुविनाशनं। संसारार्णवमग्नानां जंतूनाम विमोक्षदं। सर्वव्या
धिहरं चैव सर्वज्वरविनाशनं। ~~संसारार्णवमग्नानां~~ देवैरनुष्ठितं पूर्वं
ब्रह्मणा विष्णुना तथा। कृत्वा कनीयसं लिंगं स्वल्पं चंदनवारिणा। चैत्रमा
सादि विप्रेन्द्राः शिवलिंगव्रतं चरेत्। कुर्याद्धैमं पंकजं कर्णिकाकेस
रान्वितं। नानारत्नैश्च तं चैव चाष्टपत्रं यथाविधि। कर्णिकायां न्यसेल्लिं
गं स्फाटिकं पीठसंयुतं। तत्र न्यासयथान्यायं अर्चयेद्दीप्त्वपत्रके। सि
तैः सहस्रकमलै रक्तैर्नीलोत्पलैरपि। श्वेतार्ककर्णिकारैश्च करवीरै
र्विरैरपि। एतैरन्यैर्यथालाभं गायत्र्या स्तस्य सुव्रताः। संपूज्यैवं च गंध
धूपदीपैधूपैः सुमंगलैः। नीराजनाद्यैश्चान्यैश्च लिंगमूर्तिं महेश्वरं। त्र

गंधं दक्षिणे दद्यादघोरेण द्विजोत्तमाः। पश्चिमे सद्यमंत्रेण दद्या
च्चैवमनःशिलां। उत्तरे वामदेवेन चंदनं वै प्रदापयेत्॥ पुरुषेण
मुनिश्रेष्ठाः हरितालं च पूर्वके। सितागुरुकं चैव विप्रास्तथा कृष्णागु
रुकं वा। तथा गुग्गुलधूपं च सौगंधिकमनुत्तमं। सितारी नाम धूपं
च दद्यादीशाय शंकितं। महावस्तु निवेद्यं स्यात् दारुकांतमथापि वा
एतद्वः कथितं पुण्यं शिवलिंगमहाव्रतं। सर्वमासेषु सामान्यं विशेष
मपि कीर्तितं। वैशाखे वज्रलिंगं तु ज्येष्ठे मारकतं शुभं। आषाढे मौक्तिकं २८५
लिंगं श्रावणे नीलनिर्मितं। मासे भाद्रपदे लिंगं पद्मरागमयं शुभं। आ
श्विने चैव विप्रेंद्रा गोमेदकमयं शुभं। प्रवालेनैव कार्तिक्यां तथा च मार्गशी
र्षके॥ माघे च सूर्यकांतेन फाल्गुने चैव दारुजं। सर्वमासेषु कमलं हैम
डूर्यनिर्मितं लिंगं पुष्परागेण पुष्यके १

कृष्णागुरुसमुद्भूतं सर्वपापनिकृंतनं। गुग्गुलुप्रभृतीनां च धूपानां च निवेदने। सर्वरोगहरं
यं चैव चंदनं सर्वसिद्धिदं। १०

वा२

मंकं विधीयते। अलाभे राजतं वापि केवलं कमलं तु वा। रत्नानामप्य
लाभे तु हैमं सौराजतेन वा। राजतस्याप्यभावे तु ताम्रलोहेन का
रयेत्। शैलं वा दारुजं वापि मृन्मयं वा सवर्दिकं। सर्वगंधमयं वापी
दाणकं परिकल्पयेत्। हेमंते तैमिहादेवेश्रीः पात्रेणैव पूजयेत्। स
र्वमासेषु कमलं हैममेकमथापि वा। अर्जितं वापि कमलं हैमं कार्त्तिक
सुतमं। राजतस्याप्यभावे तु बिल्वपत्रैः समर्चयेत्। सहस्रकमलालाभे
तदर्धेनापि पूजयेत्। तदर्धार्धेन वा रुद्रमष्टोत्तरशतेन वा। बिल्वच्य
क्रे ह्रीं स्थिता जन्नीदेवी लक्ष्मणसंयुता। नीलोत्पलैर्विकासाढ्यात
त्पले पद्मरवं स्वयं। नीलोत्पलं चोत्सवे च कमलं च विशेषतः। सर्व
वश्यकरं पद्मं श्रीला सर्वार्थसिद्धिदं। सौगंधिकं तथा धूपं स

पत्नाश्रितो महादेवः सर्वदेवपतिः शिवः। तस्मात् सर्वप्रयत्नेन श्रीपत्रैरेव पूजयेत्

र्वकामार्थसाधकं। श्वेता गुरुद्भवं चैव तथा कृष्णागुरुद्भवं। सोम्यसी
तार्धरीधूपं च साक्षान्निर्वाणसिद्धिदं। श्वेतार्क कुसुमे साक्षाच्च तुर्वक्त्र
प्रजापतिः। कर्णिकारस्य कुसुमे मेधा साक्षाद्व्यवस्थिता। करवीरे ग
णाध्यक्षो बकेनारायणः स्वयं। कुसुमं गंधेषु सर्वेषु कुसुमे षु नगात्मजा। त
स्मा देतैर्यथान्यैर्जातं पुष्पैर्धूपादिभिः शुभैः। पूजयेद्देवदेवेशं जक्त्या
वित्तानुसारतः। निवेदयेत्ततो भक्त्या पायसं च महाचरुं। सघृतं सोपदं
शं च सर्वद्रव्यसमन्वितं। सर्वान्नं चापि सुशान्नमोदकं चार्धमेव वा। चाम
रे तालवृंतं च तस्मै भक्त्या निवेदयेत्। उपहारांश्च पुण्यानि न्यायेनैवार्जि २८६
तानि च। नानाविधानि रुद्राणि प्रोक्तितान्यंजसा पुनः। निवेदयित रुद्रायांनं
जिष्णुकेन चैव तस्मात्। क्षीराद्वै सर्वदेवानां स्थित्यर्थममृतं पुरा। विष्णुना जिष्णु
छतं

नासाक्षाद् अन्ने सर्वप्रतिष्ठितं। भूतानिर्मित्रदानेन प्रीतिर्भवति शाकये
तस्मात् संपूजयेद्देवमन्ये प्राणप्रतिष्ठिता। उपहारेस्तथा तुष्टे र्यजे ज
नेपदनः स्वयं। सर्वात्मको महादेवो गंधतो येषु पांपतिं पीठेवै प्र
कृतिः साक्षात् महादेवेभ्यव स्थिता। तस्माद्देवं यजेद्भक्त्या प्रतिमा
सं यथाविधिं। पौर्णमास्यामावास्यां अथवा संचकारयेत्। संवत्स
रांते मोदाने वृषोत्सर्ग विशेषतः। भोजयेद्ब्राह्मणान्यूर्णान् तान् श्रोत्रि
यान्वेदपारगान्। तल्लिंग पूजितं तेन सर्वद्रव्य समन्वितं। दापयेद्वै
शिवः द्वैतेदापयेर्ध्वं लिंगं यद्वा। य एवं सर्वमासेषु शिवलिंगं महा
व्रतां कुर्याद्भक्त्या मुनिश्रेष्ठ स एव तपतां वरः। सूर्यकोटि प्रती
काशैर्विमानै रत्नभूषितैः। गत्वा शिवपुरं दिव्यं तेहापातिकदाचिनः

अथवा ह्येकमासेन चरेत्‌ यो व्रतमुत्तमं। शिवलोकमवाप्नोति नात्र
कार्या विचारणा॥ अथवा सकृच्चिंतास्यानान्यच्चिंतयते नरः। वर्ष
मेकं चरेद्देवं तांस्तान् प्राप्य शिवं व्रजेत्‌। देवत्वं वापि शक्रत्वं वा देवराज
त्वमेव वा। गाणपत्यपदं वापि शक्रोपि लभते नरः। विद्यार्थी लभते वि
द्यां भोगार्थी भोगमाप्नुयात्‌। द्रव्यार्थी च निधिं पुण्यं मायुः कामी च नि
त्यतां। यां यां चिंतयते कामांस्तान् तान् प्राप्य वमोदते। एकमास ह
ता देवसांनरुद्रत्वमाप्नुयात्‌। इदं पवित्रं परमं रहस्यं ह्युत्तमं वि- २८७
श्वसृजा च सृष्टं। हिताय देवासुरमर्त्यसिद्धविद्याधराणां परमं शि
वेन। संपूज्य पूज्यं विविधैर्नैवमीशं प्रणम्य मूर्ध्ना सह पुत्र भृत्यैः। व्यपो
हनं नाम जपेत्‌ स्तवं च प्रदक्षिणीकृत्य शिवं प्रयत्नात्‌। पुराकृतं विसृज्य

ष१

स्तवं च हिताय देवेन जगत्त्रयस्य। पितामहेनैव सुरैश्च सार्धं महानु
भावेन महर्षिमेतत्‌॥ ॥इति श्रीलैंगे पशुपाशविमोक्षणाय लिंग
दारूपत्यं अशीतितमोऽध्यायः॥ ॥सूत उवाच॥ ॥व्यपोहनस्त
वं वक्ष्ये सर्वसिद्धिप्रदं शुभं। नंदिना च मुखात्‌ श्रुत्वा कुमारेण महात्म
ना। व्यासाय कथितं तस्मात्‌ तत्प्रसादेन वै शुभं॥ ॥नंदिकेश्वर उ०
नमः शिवाय शुद्धाय निर्मलाय यशस्विने। दुष्टांतकाय सर्वाय भवाय
परमात्मने। पंचवक्त्रो दशभुजो ह्यक्षैः पंचदशैर्युतः। शुद्धस्फटिकसं
काशः सर्वाभरणभूषितः। सर्वज्ञः सर्वगः शांतः सर्वोपरि च संस्थितः।
पद्मासनस्थः सोमेशः स मे पापं व्यपोहतु। ईशानः पुरुषश्चैव अघोरः
सद्य एव च। वामदेवश्च भगवान् स मे पापं व्यपोहतु। अनंतः सर्वविद्ये

२८ सुदन्तः सु... सुरेशानो ... चघेशो गणपः ...निलः । शिवध्यानैकसंपन्नः समे पापं व्यपोहतु
शिवो नमाम हौंजा ... शिवध्यानपरायणः । शिवध्यानैकसंपन्नः समे पापं व्यपोहतु २

ज्ञः सर्वज्ञः सर्वदः प्रभुः । शिवध्यानैकसंपन्नः समे पापं व्यपोहतु । एक
रुद्रो ह्येकगुरुस्त्रैलोक्यनमितो विभुः । शिवध्यानैकसंपन्नः समे पापं व्य
पोहतु । त्रिमूर्त्तिर्भगवानीड्यः शिवभक्तिप्रबोधकः । श्रीकंठः श्रीपतिः श्री
मान् शिवध्यानरतः सदा । शिवपूजारतः साक्षात् समे पापं व्य
पोहतु । शिखंडी भगवान् सोबः सितभस्मानुलेपनः । शिवार्चनरतः साक्षा
त् समे पापं व्यपोहतु । त्रैलोक्यनमिता देवीस्तु ... पुरातनी । दाक्षायणी
महादेवी गौरी हैमवती शुभा । एकवर्णाग्रजा सौम्या पादपाशस्तथैव च । अप २७८
र्णा विरदा देवी वरदानैकतत्परा । उमा सुरहरा साक्षात् कौशिकी वा
कपर्दिनी । खट्वांगधारिणी दिव्या कराग्रकरपल्लवी । नैकरूपा ... दि
...श्च तुर्भिः पुत्रकैर्वृता । समयानंदना देवी वरदा वारिजेक्षणा । ... बाया

न्वीतशोकस्य नंदनस्य महात्मनः । शुभावती सखी सोबाय... व
रप्रदा । सृष्ट्यर्थं सर्वभूतानां प्रकृतित्वं गताव्यया । त्रयोविंशतिभिः
स्तत्वैर्महदाद्यैर्विजृंभिता । लक्ष्म्यादिशक्तिभिर्नित्यं नमिता नागनंदि
नी । मनोन्मनी महादेवी मायया वामनप्रिया । महामाया जगत्सर्वं त्रै
लोक्यं सचराचरं । क्षोभणी मोहनी नित्यं योगीनां हृदि संस्थिता । एका
दृक्संस्थिता लोके इंदीवरनिभेक्षणा । भक्त्या परमया नित्यं सर्वदेवैर
भिष्टुता । गणेंद्रांभोजगर्भेंद्र यमवित्तेशपूर्वकैः । संस्तुता जननी त्ते
षां सर्वोपद्रवनाशिनी । भक्तानामार्तिहा भव्या भवभावविनाशिनी । भु
क्तिदा मुक्तिदा देवी भक्तानामभयप्रदा । सा मे साक्षान्महादेवी पापमं
शु व्यपोहतु । चंडः सर्वगणेशानो मुखाच्छंभोर्विनिःसृतः । शिवार्चनर

×६ महाकायोमहातेजा महादेव इवापरः॥ शिवार्चनरतः श्रीमान् समेपापं व्यपोहतु॥ पृथिव्यामुनिशार्दूल
शिवध्यानपरायणः॥ शिवार्चनरतः श्रीमान् समेपापंव्यपोहतु॥×६

तः श्रीमान् समेपापं व्यपोहतु॥ शालंकायनपुत्रश्च हलमार्योत्थितः प्र
भुः॥ यामातामरुतां देवः सर्वभूतगणेश्वरः॥ सर्वदासर्वगः सर्व समदृ
क् पवनः प्रभुः॥ स नारायणकेदेवैः संज्ञोपेंद्र दिवाकरैः॥ सिद्धैश्च यक्ष
गंधर्वैर्भूतैर्भूत विनायकैः॥ उरगैरृषिभिश्चैव ब्रह्मणाच महात्मनाः॥
स्तुतस्त्रैलोक्यनाथस्य पुनरंतः पुरेस्थितः॥ सर्वदापूजितः सर्वैर्नंदी
पापं व्यपोहतु॥ मिरुमंदरकैलाशतट कूटप्रभेदनः॥ शिवार्चनरतः
श्रीमान् समेपापं व्यपोहतु॥ ऐरावतादिभिर्दिव्यैर्दिग्गजैश्च प्रपूजितः २८५
॥ सप्तपाताल पादश्च सप्तद्वीपोरु जंघकः॥ सप्तार्णवं कुशांगुश्च सर्वती
र्थोदरः॥ शिवः॥ आकाशदेहोदिग्वासासोमसूर्याग्निलोचनः॥ हतासुरम
हासंघो ब्रह्मविद्यामहोत्कटः॥ अघोरगणैः सनंदाद्यैः योगपाशसमन्वितैः

वद्धोरुसुंदरीकांतः स्तंभेद्वृत्तिनिरुध्यतु॥ जेंद्रवक्त्रोयः साक्षात् गणको
टिशतैर्वृतः॥ शिवध्यानैकसंपन्नः समेपापं व्यपोहतु॥ भृंगीमहाबला
त्मोसोत्र सितास कृद्देहन्ततः॥ शिवार्चनरतः श्रीमान् समेपापं व्यपोहतु
चतुर्भिस्तनुभिर्नित्यं सर्वासुरविमर्दनः॥ स्कंदः शक्तिधरः शांतः सेनानीग
जवाहनः॥ देवसेनापतिः श्रीमान् समेपापं व्यपोहतु॥ भवः सर्वस्तथे
शानो रुद्रः पशुपतिस्तथा॥ उग्रोभीमो महादेवः शिवार्चनरतः सदा॥
एते पापं व्यपोहंतु मूर्तयः परमेष्ठिनः॥ महादेवः शिवोरुद्रः शंकरो नी
ललोहितः॥ ईशानो विजयो भीमो देवदेवो भवोद्भवः॥ कपालीश्चापिवि
ज्ञेयाः स्वर्गीशाकस्यसेनया॥ शिवप्रणामसंपन्ना व्यपोहंतु मलं मम॥ वि
वर्तनो विवस्वांश्च मार्तंडो भास्करो रविः॥ लोकः प्रकाशकश्च वलोकसाक्षी

त्रिविक्रमः। आदित्यश्च तथा सूर्यः अंशुमांश्च दिवाकरः। एते मे द्वाद
शादित्या अपोहंतु मलं मम। गगनं स्पर्शनं तेजो रसश्च पृथिवी तथा
चंद्रः सूर्यस्तथात्मा च वसवः शिवभाविताः। पापं अपोहंतु मम त्रयं निर्नाश
यंतु मे। इंद्रश्च पावकश्चैव यमो निर्ऋतिरेव च। वरुणो वायुः सोमश्च ई
शानो भगवान् हरिः। पितामहश्च भगवान् शिवध्यानपरायणः। एते पा
पं अपोहंतु मनसा कर्मणा कृतं। गभस्ति स्पर्शनो वायुरनिलो मारुतस्त
था। प्राणः प्राणः शिवे सो मम कृतः शिवभाविताः शिवार्चनरताः सर्वे अ
पोहंतु मलं मम। खेचरी च भूचारी च ब्रह्मणो ब्रह्मविष्णुधीः। मुखेन शा २९०
तः पृष्ठपृष्ठश्च महाबलाः। एते वै चारणाः शंभुं पूजयंती भाविताः। अपो
हंतु मलं सर्वं पापं चैव मया कृतं। मंत्रज्ञो मंत्रविस्त्राज्ञो हे सराट् शिवपूजितः

सिद्धवत्परमः सिद्धसर्वसिद्धिप्रदान्विताः। अपोहंतु मलं सर्वे सिद्धशिव
पदार्चकाः। यक्षो यक्षेशधनदो जंभको मणिभद्रकः। पूर्णभद्रश्चरीमा
ली वा विकुंडल केशवः। नरेंद्राश्चैव यक्षेशा अपोहंतु मलं मम। अ
नंतकुलिकश्चैव वासुकी तक्षकस्तथा। कर्कोटको महापद्मः शंखपा
लो महाबला। शिवप्रणामसंपन्ना अपोहंतु मलं मम। शिवदेवप्रभूषणा
ः मम पापं अपोहंतु विषं स्थिरजंगमं। वीणाज्ञकिन्नरश्चैव सूरसे
नः प्रमर्दनः। अतीयसा प्रज्ञोगी च सीतितश्चैव तिकिंकरा। शिवप्रणाम
संपन्ना अपोहंतु मलं मम। विद्याविनीतो विबुधो विद्याराशिर्वि
दांवरः [illegible] बुद्धो विबुधः श्रीमान् कृतज्ञश्च महाबल ~~सुश्रीचोमेस्कं~~
[illegible] शा। एते विद्याधराः सर्वे शिवध्यानपरायणाः। अपोहंतु मलं घोरं

ति

महादेवप्रसादतः। हयग्रीवो महाजंभकालनेमीर्महाबलः। सुग्रीवो म
र्दकश्चैव पिंगलो देवमर्दकः। संह्रादश्चाप्यनुह्रादः शिखिश्च शिबिबा
ष्कलौ। मुग्रीवोमर्दकश्चैव। जंभकुंभोच मायावी कार्त्तवीर्यकृतंजयः।
एते दैत्येश्वराः सर्वे महादेवपरायणाः। व्यपोहंतु भयं घोरं असुरंभाव
मेव च। ~~कश्यपो नारदश्चैव~~ गरुत्मान् खगतिश्चैव पक्षीराट् नागमर्द
नः। नागशत्रु हिरण्याक्षो वैनतेयः प्रभंजनः नागाशी विषनंत्राश्च विष्णु
वाहन एव च। एते हिरण्यवर्णाभाः गरुडा विष्णुवाहनाः नानाभरणसं २५१
पन्ना व्यपोहंतु मलं मम। अगस्त्यश्च वशिष्ठश्च अंगिराभृगुरेव च। काश्य
पो नारदश्चैव दधीचच्यवनस्तथा। उपमन्युस्तथान्ये च ऋषयः शिवभा
विताः। शिवार्चनरताः सर्वे व्यपोहंतु भयं मम। पितरः पितामहश्चैव तथै

व प्रपितामहः। अग्निष्वात्ताबर्हिषदस्तथा मातामहादयः। व्यपोहंतु भयं
पापं शिवध्यानपरायणाः। लक्ष्मीश्च धरणी चैव गायत्री च सरस्वती।
दुर्गा उषा शची ज्येष्ठा मातरः सुरपूजिताः। देवानां मातरश्चैव गणानां मा
मा तरस्तथा। भूतानां मातरः सर्वा यत्र या गणमातरः। प्रसादाद्देवदेवस्य व्य
पोहंतु भयं मम। उर्वशी मेनका चैव रंभा चैव तिलोत्तमा। सुमुखी दु
र्मुखी चैव कामुकी कामवर्द्धनी। तथान्याः सर्वलोकेषु दिव्याश्चाप्सर
सः शुभाः। शिवाय तांडवं नित्यं कुर्वत्यः शिवभाविताः। देव्यः शिवार्चनर
ता व्यपोहंतु भयं मम। अर्कः सोमोंगारकश्च बुधश्चैव बृहस्पतिः। शु
क्रः शनैश्चरश्चैव राहुकेतुर्महाबलः। व्यपोहंतु भयं घोरं ग्रहपीडां शि
वार्चकाः। मेषो वृषो मिथुनस्तथा कर्कटकः शुभः। सिंहश्च विपुलाकं म
कन्या

ला वै वृश्चिकस्तथा। धनुश्च मकरश्चैव कुंभो मीनस्तथैव च। राशयो ५.
द्वादशैवैताः शिवपूजापरायणाः। व्यपोहन्तु मये पापं प्रसादात्परमेष्ठि
नः। अश्विनी भरणी चैव कृत्तिका रोहिणी तथा। श्रीमन्मृगशिरश्चार्द्रा पु
नर्वसुः पुष्यसर्पकाः। मघा वै पूर्वफाल्गुन्या उत्तराफाल्गुनी तथा। हस्त
चित्रा तथा स्वाती विशाखा चानुराधिकाः। ज्येष्ठा मूलं महाभागा पूर्वा
षाढा तथैव च। उत्तराषाढका चैव श्रवणं च श्रविष्ठका। शतभिषा पूर
र्वभद्रा तथा प्रोष्ठपदाश्च ता। पौष्णं च देव्यः सततं व्यपोहन्तु मये मम १२२
ज्वरः कुम्भोदरश्चैव शंकुकर्णो महाबलः। महाकर्णः प्रभूतश्च महाभू
तः प्रमर्द्दकः। सेनजित् शिवसंभूतः प्रमथाधिति वर्धना। कोटिकोटिशतै
श्चैव भूतानां संहृताः स्तथा। व्यपोहन्तु मये पापं महादेवप्रसादतः। शि

गवां माता जगन्माता रुद्रलोके व्यवस्थिता। शिवभक्तानुयानंदा सा मे पापं व्यपोहतु।५

वर्षाणि कसंपन्नो हिमरांश्चबुसंन्निभः। कुंदेंदुसदृशाकारः कुंदेंदुवज्ज्वा
मुखः। वडवामुखशत्रुर्यो वडवामुखभेदनः। चतुष्पादसमायुक्तः क्षी
रोदार्णवपांडुरः। रुद्रलोके स्थितो नित्यं रुद्रैः सार्द्धं स्थितो गणैः। वृषेंद्रो
विश्वधृग्देवो विश्वस्य जगतः पिता। वृत्तो नंद्यादिभिर्नित्यं मातृभिर्मखम
र्दनः। शिवार्चनरतो नित्यं स मे पापं व्यपोहतु। गंगा च भद्रपदा देवी
शिवलोके व्यवस्थिता। माता गवां महाभागा सा मे पापं व्यपोहतु। सुराभिः
सर्वतोभद्रा सर्वपापप्रणाशिनी। रुद्रपूजारता नित्यं सा मे पापं व्यपोहतु
सुशीला क्षेत्रसंपन्ना श्रीप्रजा शिवसंमता। शिवलोकस्थिता नित्यं सा मे पा
पं व्यपोहतु। सुमना नामा विख्याता सुयशाधवा। रुद्रलोके
स्थिता नित्यं देवी सा मे पापं व्यपोहतु। ज्येष्ठः सर्वेश्वरः सौम्यो महाविष्णु

वेदशास्त्रार्थतत्वज्ञः सर्वकार्याभिचिंतकः। समस्तगुणसंपन्नः सर्वदेवेश्वरात्मजः।५।

स्तनुस्वयं। आर्ये सेनापतिः शक्तानां मतस्याघमर्दनः। ऐरावतगजारूढ
ः कृतकुंचितमूर्धजः॥ कृष्णो गोरक्तनयनः त्रिशिपन्नगभूषणो भूतैप्रे
तैः पिशाचैश्च कूष्मांडैश्च समावृतः॥ शिवार्चनरतः साक्षात्स मे पापं व्यपो
हतु। ब्रह्माणी चैव माहेशी कौमारी वैष्णवी तथा। वाराही चैव माहेंद्री चा
मुंडा त्रैपिका तथा। एता वै मातरः सर्वा सर्वलोकप्रपूजिताः। योगिनीभि
र्महापापं व्यपोहंतु समाहिता। वीरभद्रो महातेजा हिमकुंदेंदुसन्निभः
रुद्रस्य तनयो रौद्रः शूलासक्तमहाकरः। सहस्रबाहुः सर्वज्ञः सर्वायुधध
धरः स्वयं। त्रेताग्निनयनो देवस्त्रैलोक्याभयदः प्रभुः। मातॄणां रक्षको नित्यं
महावृषभवाहनः। त्रैलोक्यनमितः श्रीमान् शिवपादार्चनेरतः। यज्ञस्य
च शिरःछेत्ता पूष्णो दंतविनाशनः। वह्नेर्हस्तहरः साक्षात् भगनेत्रनिपातनः

पादांगुष्ठेन सोमांगपेषकः प्रभुरीश्वरः। इंद्रोपेंद्रयमादीनां देवानां
मंगरक्षकः। सरस्वत्या महादेव्या नासिकोष्ठौ र्धकंतनः। गणेश्वरो यः
सेनानीः स मे पापं व्यपोहतु। महाज्ञाग महामोहा महाभूतगणावृता।
शिवार्चनरता नित्यं सा मे पापं व्यपोहतु। सिंहारूढा महादेवी पार्वतीत
नयैस्तथा। विश्वेश्वरी महामाया वैष्णवी सुरपूजिता। त्रिनेत्रा वरदा
देवी ~~पार्वतीतनयैस्तथा~~ महिषासुरमर्दिनी। शिवार्चनरता दुर्गा सा मे पा
पं व्यपोहतु। ब्रह्मांडाधारका रुद्राः सर्वलोकप्रपूजिता। स्मृत्वा सुरम
नसाः सर्वे व्यपोहंतु भयं मम। भूताः प्रेताः पिशाचाश्च कूष्मांडगणनाय
काः। कूष्मांडकाश्च मे पापं व्यपोहंतु समाहिताः। अनेन देवान् स्तुत्वा च
अंते सर्वं समापयेत्। प्रणम्य शिरसा भूयो प्रतिमासं द्विजोत्तमाः। व्यपोहन

न्यांन् ४

स्तवेदिव्यं यः पठेत् स्मरणादपि। विधूय सर्वपापानि रुद्रलोके महीय
ते। कन्यार्थी लभते कन्यां जयकामो जयेल्लभेत्। अर्थकामो लभेद् अर्थं
पुत्रकामो बहून् सुतान्। विद्यार्थी लभते विद्यां योगार्थी योगमाप्नुयात्
यं यं प्रार्थयते कामान् मानवः श्रवणादिह। न सर्वं समवाप्नोति दे
वानां च प्रियो भवेत्। पठ्यमानमिदं पुण्यं यमुद्दिश्य तु पठ्यते। तस्य रो
ते गान बाधन्ते वातपित्तादिसंभवाः। नाकाले मरणं तस्य न सर्पैश्चापि द
श्यते। यत्पुण्यं सर्वतीर्थानां गमने चैव यत्फलं। वेदानां चैव यत्पुण्यं २०४
व्रतानां च विशेषतः। तत्पुण्यं कोटिगुणितं जप्त्वा प्राप्नोति मानवः। गोघ्न
श्च कृतघ्नश्च वीरहा ब्रह्महा तथा। शरणागतघाती च मित्रविश्वास
घातकः। कष्टपापसमाचारो मातृहा पितृहा तथा। व्यपोह्य सर्वपापानि

नक्तं पर्वसु पर्वसु। ब्रह्मचारी जितक्रोधः शिवध्यानपरायणः। संव
त्सरांते विप्रेंद्रान् भोजयेद्विधिपूर्वकं। स याति त्र्यंबकं स्थानं नात्र का
र्या विचारणा। उपवासात्परं भैक्ष्यं भैक्ष्यात्परमयाचितं। अयाचिता
त्परं नक्तं तस्मान्नक्तेन वर्तयेत्। देवैर्भुक्तं तु पूर्वाह्णे मध्याह्ने ऋषि
भिस्तथा। अपराह्णे च पितृभिः संध्यायां गुह्यकादिभिः। सर्ववेलामति
क्रम्य नक्तभोजनमुत्तमं। हविष्यभोजनं स्नानं सत्यमाहारलाघवं।
अग्निकार्यमधःशय्यां नक्तभोजी समाचरेत्। प्रतिमासं प्रवक्ष्यामि। २०५
शिवव्रतमनुत्तमं। धर्मार्थकाममोक्षार्थं सर्वपापविशुद्धये। पौषमासे
तु संपूज्य कुर्यान्नक्तं च भोजनं। सत्यवादी जितक्रोधः शालिगोधूमगो
रसैः। पक्षयोरष्टमीयत्नात् उपवासेन वर्तयेत्। भूमिशय्यां च मासान्ते

शिवलोके महीयते॥ ॥एकाशीतितमोऽध्यायः॥ ॥कृष्णपक्षग
व्यपोहनः स्तवे पुण्ये भक्तिस्मृतिसमं श्रुमे। प्रसंगाद्विनिगदान स्यत्र
तान्यपि वदास्व नः॥ ॥सूत उ॥ ॥व्रतानि वः प्रवक्ष्यामि शुभानि मु
निसत्तमाः। नंदिना कथितानीह ब्रह्मपुत्राय धीमते। तानि व्यासाद्गु प
श्रुत्वा पुष्पाकं प्रवदाम्यहं। अष्टम्यां च चतुर्दश्यं पक्षयोरुभयोरपि।
वर्षमेकं तु भुंजानो नक्तं यः स्न यद्गुतः। सर्वयज्ञफलं प्राप्य स या
ति परमां गतिं। पृथिवीभाजने कृत्वा शुक्लपर्वसु मौनवः। अहोरात्रे २९५
णैकेन त्रिरात्रफलमश्नुते। द्वयोः पक्षस्य पंचम्या द्वयोः प्रतिपदोर्नरः
क्षीरधारां व्रतं कृत्वा सोऽश्वमेधफलं लभेत्। कृष्णाष्टम्यां तु नक्तेन यावत्कृष्ण
चतुर्दशी भुंजन्भोगान्नुवाप्नोति ब्रह्मलोकं स गच्छति। योऽष्टमेकं प्रकुर्वीत

पूर्णमास्यां घृतादिभिः। स्नाप्य रुद्रं महादेवं संपूज्य विधिपूर्वकं। या
वकं श्रोदनं कृत्वा सक्षीरं सघृतं द्विजान्। भोजयेद्ब्राह्मणान्वाष्टौ जपे
न्नुशांतिर्विनोक्षिपः। तथा गोमिथुनं चैव कापिलं वै निवेदयेत्। नवाय
देवदेवाय रुद्राय परमेष्ठिने। सयाति मुनिशार्दूल स्थानं ये लोकमुत्त
मं। भुक्त्वा तु विपुलान्भोगान्तत्रैव स विमुच्यते। माघमासेपि संपूज्य भ
पं यानक्तं च भोजनं। शार्कघृतसंयुक्तं भुंजनः सजितेंद्रियः। सोपवासः श्व
दृश्यां नवेद्वनयपक्षयोः। कृत्वा पूर्णमास्यां तु च दद्याद्घृतकंबलोद्भ
सं गोमिथुनं दद्यात् पूजयेद्वै वशंकरं। भोजयेद्ब्राह्मणांश्चैव यथाविभ
व विस्तरं। याम्यमासाद्यवै लोकं यमेन सह मोदते। फाल्गुनेवापि संप्रा
तिकुर्याद्वै नक्तभोजनं। श्यामाकक्षीरनीवारैर्जितक्रोधो जितेंद्रियः। चतु

ईश्याम थाष्टम्या मुपवासं च कारयेत्। पौर्णिमास्यां महादेवं स्नाप्य संपू
ज्य शंकरः॥ दद्याद्गो मिथुनं वापी तान्त्रे वैष्णव पाणयेत्। ~~पौर्णमास्यां म~~
~~हादेवं स्नाप्य संपूज्य शंकरं~~ ब्राह्मणान् भोजयित्वा च प्रार्थयेत् परमेश्वरं
स याति चेन्द्र सायुज्यं नात्र कार्या विचारणा। चैत्रे पि रुद्रमभ्यर्च्य कुर्याद्दि
नक्त भोजनं। शाल्यन्नं पयसा युक्तं घृतेन च यथासुखं। गोष्टशायी भु
मिश्रेष्ठा गो वृषांकमनुस्मरेन्। पौर्णमास्यां त्रिवं स्काप्य दद्याद्गो मिथुनं स्ना २०६
सितं। ब्राह्मणान् भोजयेच्चैव निर्ऋती स्थानमाप्नुयात्। वैशाखे च तथा मासे
कृत्वा द्वै नक्त भोजनं। पौर्णमास्यां तत्र वे स्नाप्य पंचाग्मै घृतादिभिः। श्वेतां गो
मिथुनं दत्वा सोश्वमेध फलं लभेत्। ज्येष्ठमासे च देवेशं त्र्यंबकं मुमापतिं
संपूज्य श्रद्धया नक्ता कृत्वा वै नक्त भोजनं। रक्तशाली समश्नीयाद्दद्भिः

पूजां महादिभिः। वीरासनो निशार्धं तु गवां शुश्रूषणे रतः। पौर्णमा
स्यां च संपूज्य देवदेवमुमापतिं। स्नाप्य शास्त्रायथान्यायं चरुं दत्वा
च सुभिनं। ब्राह्मणान् भोजयित्वा च यथाविभवविस्तरं। धूम्रं गोमि
थुनं दत्वा वायुलोके महीयते। आषाढमासे प्येवं योनक्त भोजनतत्प
रः। भूरिखंडाज्यसंमीश्रं सक्तुभिश्चैव गोरसं। पूर्णमास्यां घृताद्यैस्तु
स्नाप्य सर्व वदर्चयेत्। ब्रह्मणान् भोजयेच्चैव श्रोत्रियान्वेदपारगान्।
दद्याद्गो मिथुनं गौरं वारुणं लोकमाप्नुयात्। श्रावणे च द्विजा मासे कृ
त्वा वै नक्त भोजनं। क्षीरषष्टिकमन्नं न संपूज्य वृषभध्वजं। पौर्णमास्यां
घृताद्यैस्तु स्नाप्य सर्वं यथाविधिः। ब्राह्मणान् भोजयित्वा च श्रोत्रियान्वे
दपारगान्। श्वेतां यपादे पौंड्रं च दद्याद्गो मिथुनं पुनः। स याति त्रिवसायुज्य

ज्यं वायुवान् सर्वगो भवेत्॥ भाद्रपदे मासि कृत्वा वै नक्तभोजनं।
हुतनैवेद्यं तु विप्रेभ्यो दद्यान्मूलाश्रितोपि वा। पूर्णमास्यां तु देवेशं स्नाप्य
संपूज्य शंकरं॥ नीलस्कंधं वृषं गां च दत्वा न्यायथाविधि। ब्राह्मणा
न्भोजयित्वा च वेदवेदांगपारगान्। यक्षलोकमनुप्राप्य यक्षराजो भवे
न्नरः॥ तत्राश्वयुजे मासि कृत्वा वै नक्तभोजनं। सघृतं शार्करं पूज्य पौ
र्णमास्यां च पूर्ववत्। ब्राह्मणान्भोजयित्वा तु त्रिवर्षकान्सदाशुचीन्
वृषभं नीलवर्णं भद्रो देशो समुन्नतो। गां च दत्वा यथाम्नायं मैथुने लोक शा° २०७
माप्नुयात्। कार्त्तिके च तथा मासे कृत्वा वै नक्तभोजनं। क्षीरोदनेन सा
ज्येन संपूज्यं च जनं वा प्रभुं। पौर्णमास्यां च विधिवत् स्नाप्य दत्वा चरुं पुनः
ब्राह्मणान्भोजयित्वा च यथा नित्यं वा विस्तरं। दत्वा गोमिथुनं चैवं का

पिलं पूर्ववत्पुनः॥ सूर्यसायुज्यमाप्नोति नात्र कार्या विचारणात्
मार्गशीर्षे च मासेपि कृत्वा वै नक्तभोजनं। यवान्नेन यथाम्नाये
माज्यक्षीरादिभिः समं। पौर्णमास्यां च पौर्वोक्तं कृत्वा शर्वाय शंभ
वे। ब्राह्मणान्भोजयित्वा च दरिद्रान्वेदपारगान्। दत्वा गोमि
थुनं चैव पांडुरं विधिपूर्वकं। सोमलोकमनुप्राप्य सोमेन सह मोद
ते। अहिंसा सत्यमस्तेयं ब्रह्मचर्यं दया क्षमा। त्रिस्नानं चाग्निहोत्रं च
भूशय्यां नक्तभोजनं। पक्षयोरुपवासं च चतुर्दश्यष्टमीषु च। इत्येवमभि
हितं प्रोक्तं प्रतिमासं त्रिवर्षकं। कुर्याद्वर्षक्रमेणैव मुक्तमेणापि वै द्विजाः। सर्या
त्रिवस तिं परमेस्या सायुज्यं ज्ञानयोगमवाप्यते॥ ॥इति श्रीलैंगे प्रतिमासलिंगव्र
तं नाम छात्रिंशतितमोध्यायः॥ ॥स्तू३॥ ॥उमामहेश्वरं वक्ष्ये व्रतं।

मीश्वरत्नार्चितं।नरनार्या द्विजेन्द्राणां हिताय द्विजसत्तमाः।पौर्णि
मास्याममावास्यां चतुर्दश्यष्टमीषु च।नक्तमेव प्रकुर्वीत हवि
ष्यं पूजयेद्भवं।ब्राह्मणान्भोजयित्वा च दत्वा तेभ्यश्च दक्षिणां।रथ
चैवापि देवेशं नीत्वा रुद्रालयं प्रति।सर्वातिशयसंयुक्तैः छत्रचाम
रभूषणैः।निवेदयेद्व्रतं चैव शिवाय परमेष्ठिने।स याति शिवसायु
ज्यं नारी वा पुरुषोपि वा।अष्टम्यां च चतुर्दश्यां नियतं ब्रह्मचारिणी।
वर्षमेकं न भुञ्जीत कन्या वा विधवापि वा।वर्षान्ते प्रतिमां कृत्वा संपू २०८
ज्य विधिना पुनः।प्रतिष्ठाप्य यथान्यायं दत्वा रुद्रालये पुनः।ब्राह्म
णान्भोजयित्वा च भवान्याः सह मोदते।या नार्येवं चरेदष्टं कृष्णामे
कां चतुर्दशीं।वर्षान्ते प्रतिमां कृत्वा येन केनापि वा द्विजाः।पूर्वोक्तमखि

लं कृत्वा भवान्याः सह मोदते।अमावास्यां निराहारो भवेदब्दं सु
यंत्रितः।त्रिशूलं विधिना कृत्वा वर्षान्ते विनिवेदयेत्।स्नाप्येशानं य
जेद्भक्त्या सहस्रकलशैः स्थितैः।राजतं कमलं चैव जाम्बूनदसुकर्णि
कं।दत्वा भवाय विप्रेभ्यः प्रदद्यात् दक्षिणामपि।कामतोपि कृतं पा
पं भ्रूणहत्यादिकं च यत्।तत्सर्वं शूलदानेन छिंद्यान्नारी न संश
यः।देव्याः सायुज्यमाप्नोति यथा देवी तथैव सा।कुर्याद्यदि नरः सो
पि रुद्रसायुज्यमाप्नुयात्।पौर्णमास्याममावास्यां वर्षमेकमतंद्रितः।उ ।तो ४
पवासरता नारी एकभक्तेन वर्तते।क्रोधहिंसादिनियमैः संयुक्ता ब्रह्म
चारिणी।दद्यात् कृष्णतिलानां च भारमेकमतंद्रिता।नियोगाद्देवतत्का
र्यं तु शृणु मुनिसत्तमाः।व्रतं दानं तपः सर्वमश्वत्रायतनक्रियाः।

वर्षंति सर्वगंधाद्यैः प्रतिमां विनिवेदयेत्। मासं भवान्याश्च सायुज्यं
सामीप्यं चापि सुव्रता। लभते नात्र संदेहः। सत्यं सत्यं मुनीश्वराः। का
र्त्तिक्यां चापि या नारी ह्येकभक्तेन वर्त्तते। क्षमाहिंसादि नियमैः संयुताः
ब्रह्मचारिणी। दद्यात् कुंभं तिलानां च भारमेकमतंद्रिता। सघृतं
सगुडं चैव हैमं दत्तं परमेष्ठिने दत्त्वा च ब्राह्मणेभ्यश्च यथाविभवविस्तरं। अ
ष्टम्यां च चतुर्दश्यां उपवासरता च सा। भवान्या मोदते सार्धं सामीप्यं प्राप्य
सुव्रता। क्षमा सत्यं दया दानं शौचमिंद्रियनिग्रहः। सर्वव्रतेष्वयो धर्मः सामा २९९
न्यो रुद्रपूजने। समासात् प्रवक्ष्यामि प्रतिमा समनुक्रमात्। मार्गशीर्षादि
मासेषु कार्त्तिकांतं यथाक्रमं। व्रतं सुविपुलं नित्यं नंदिना परिभाषितं। मा
र्गशीर्षादिमासे च वृषं पूर्णं मुक्तमं। अलंकृत्य यथान्यायं शिवाय विनि

वेदयेत्। मासार्द्धं भगवत्या वै मोदते नात्र संशयः। पुष्यमासेपि वाश्वलं
प्रतिष्ठाप्य निवेदयेत्। पूर्वोक्तमखिलं कृत्वा भवान्या सह मोदते। रथं मा
घे प्रमासे तु सर्वलक्षणसंयुतं। दद्यात्संपूज्य देवेशं ब्राह्मणेश्चैव सर्प
पिनत्। सार्द्धं देव्या महाभागा मोदते नात्र संशयः। फाल्गुने प्रतिमां कृत्वा
सुवर्णेन यथाविधी। रजतेनापि ताम्रेण यथाविभवविस्तरं। प्रति
ष्ठाप्य समभ्यर्च्य स्थापयेत्संकरालये। सा च सार्धं महादेव्या मोदते ना
त्र संशयः। चैत्रे भवं कुमारं च भवानीं च यथाविधी। ताम्राद्यैर्विधिव
त्कृत्वा प्रतिष्ठाप्य यथाविधि। भवान्या मोदते सार्धं दत्वा रुद्राय शंभवा
कृत्वा च लैहिकं वेरं राजतं रजतेन वै। ईश्वरो मासमायुक्तं गणेश्च
र्त्तमं ततः सर्वरत्नसमायुक्तं प्रतिष्ठाप्य विधानतः। स्थापयेत्परमेशस्य

न्नवस्त्रायतनेऽश्रुते । वैशाख्यां वाचरेद्देवं कैलाशाख्ये हतो नमः । कै
लाशपर्वतं प्राप्य नवान्या सं ह मोदते । ज्येष्टमासे महादेवं लिंगमूर्त्तिं
मुमापतिं । कृत्वा जलिपुटेनैव ब्रह्मणा विष्णुनातथा । मध्येन वेन संयुक्तं
लिंगमूर्त्तिं द्विजो नमः । हंसेनं च वराहेण कृत्वा ताम्रादिभिः शुभैः । प्रतिष्ठ
प्य यथान्यायं ब्राह्मणान्भोजयेत्ततः । भूवायत्रिवमासाद्य भीवस्य
नयथाविधि । ब्रह्मणैः सहितः स्याप्य देवसायुज्यमाप्नुयात् । आषा
ढे च शुभे मासे टहं कृत्वा सुशोभनं । पंक्तेष्टकादिविधिवत्यथा वित्तवि ३०८
स्तरं । सर्ववीजरसैश्चापि संपूर्णं सर्वशोभनं । गृहोपकरणैश्चैव मूषलो
लूषलादिभिः । दासीदासादिभिश्चैव शयनैरासनादिभिः । संपूर्णं वंगर्ट ह
व स्त्रैराच्छाद्य च समंततः । देवं घृतादिभिः स्नाप्य महादेवमुमापतिं । ब्रा

ह्मणानां सहस्रं वा भोजयित्वा यथाविधि । विद्याविनयसंपन्ने ब्रा
ह्मणे वेदपारगे । प्रथमाश्रमिणे नक्त्या संपूज्य च यथाविधि । क्रमा
सुमध्यमां चैकां काले जीवनसंयुतां । क्षेत्रं गोमिथुनं चैव तद्गृहं च नि
वेदयेत् । विमानैर्विविधैर्दिव्यैर्मेरुपर्वतसंन्निभैः । गोलोके समनु
प्राप्य नवान्या सह मोदते । नवान्या सदृशीभूत्वा सर्वकल्पेषु साप्यया
नवान्याश्चैव सायुज्यं लभते नात्र संशयः । सर्वधातुसमाकीर्णं विचि
त्रध्वजशोभितं । निवेदयेत्तु सर्वयिश्रावणे निजपर्वतं । ब्राह्मणान्भो
जयित्वा च पूर्वोक्तमखिलं लभेत् । कृत्वा भाद्रपदे मासि विपुलं धान्यप
र्वतं । विमानध्वजवस्त्राद्यैर्धान्तु निश्च निवेदयेत् । ब्राह्मणान्भोजय
त्वा च पूर्वोक्तमखिलं लभेत् । सर्वधान्यसमायुक्तं सर्वरत्नोपशोभितं ।

ष्टं गैश्चतुर्भिसंयुक्तं विमानं छत्रशोभितं। गंधमाल्यैस्तथा धूपैर्विचि-
त्रैश्चापि शोभितं। सुचित्रैर्नृत्यवाद्यैश्च शंखवीणादिभिस्तथा। ब्राह्म-
घोषैर्महापुण्यैर्मंगलैश्च विशेषतः। महाध्वजाष्टसंयुक्तं विमानं छ-
त्रशोभितं। महाध्वजाष्टसंयुक्तं। विचित्रकुसुमोज्वलं। नगेंद्रमेरुना-
ने मा त्रैलोक्याधारमुत्तमं। तस्य मूर्ध्नि शिवं कुर्यात् मध्यतो धातुकेन वै। द-
क्षिणे च यथान्यायं। ब्रह्माणं च चतुर्मुखं। उत्तरे देवदेवेशं नारायण-
मनामयं। इंद्रादिलोकपालांश्च कृत्वा सन्न्यायथाविधी। प्रतिष्ठाप्य ३०१
यथान्याये समभ्यर्च्य महेश्वरं। देवस्य दक्षिणे हस्ते शूलं त्रिदशपूजि-
तं। वामे पार्श्वं भवान्याश्च कमलं हेमनिर्मितं। विष्णोश्चक्रं च शंखं च
गदां मज्जं प्रयत्नतो। ब्रह्मणश्चाक्षसूत्रं च कमंडलुमनुत्तमं। वायूर्य

ष्टि कुबेरस्य गदां लोकप्रपूजितां। एवं चेशानदेवस्य निवेद्यैवं
क्रमेण च। शिवस्य महतीं पूजां कृत्वा च सुसमन्वितां। पूजयेत्सर्व-
देवांश्च यथाविभवविस्तरं। ब्राह्मणान्भोजयित्वा च पूजयित्वा च य-
त्नतः। महामेरुव्रतं कृत्वा महादेवाय दापयेत्। महामेरुमनुप्रा-
प्य महादेवेन मोदते। देवसायुज्यमाप्नोति महादेवान्न संशयः।
कान्तिकामपि या नारी कृत्वा च देवीमुमां शुभां। सर्वाभरणसंपू-
र्णां सर्वलक्षणलांछितां। हेमतामादिभिश्चैव प्रतिष्ठाप्य य-
थाविधि। देवीं च कृत्वा देवेशं सर्वलक्षणसंयुतं। तयोरग्रे तु तां शं-
चक्रं च त्वा हस्ते पिनामहं। नारायणं च दातारं सर्वाभरणभूषितं। लो-
कपालैस्तथा सिद्धैः संवृतं स्थापयेत्ततः। रुद्राजये व्रतं तस्मै दाप

येन भक्तिपूर्वकं। सा भवान्यास्तु संतुष्टा भवेन सह मोदते। एकभक्त
व्रतं पुण्यं प्रतिमासमनुक्रमात्। मार्गशीर्षस्य मासादि कार्त्तिकांतं प्र
कीर्त्तितं। नरनार्यादिजंतूनां हिताय मुनिसत्तमाः। नरः कृत्वा व्रतं
चैव शिवसायुज्यमाप्नुयात्। नारी देव्या न संदेहः शिवेन परिभाषि
तं॥ ॥इति श्रीजैगे प्रतिमासैकभक्तव्रते अशीतितमोध्यायः॥ ॥
सूत उ०॥ ॥सर्वव्रतेषु संपूज्य देवदेवमुमापतिं। जपेत्पंचाक्षरी
विद्यां विधिनैव द्विजोत्तमाः। जपाद्देव न संदेहो व्रतानां वै विशेषतः। ३०२
समाप्तिर्नान्यथा तस्मात् जपेत्पंचाक्षरीं शुभां॥ ॥ऋषय उ०॥ ॥क
थं पंचाक्षरीविद्याप्रभावो वा कथं वद। क्रमोपायं महाभाग श्रोतुं
कौतूहलं हि नः॥ ॥सूत उ०॥ ॥पुरा देवेन रुद्रेण देवदेवेन शं
रू

भुना। पार्वत्याः कथितं पुण्यं प्रवदामि समासतः॥ ॥देव्युवाच॥ ॥
भगवन् देवदेवेश सर्वलोकमहेश्वर। पंचाक्षरस्य माहात्म्यं श्रोतुमि
च्छामि तत्वतः॥ ॥श्रीभगवानुवाच॥ ॥पंचाक्षरस्य माहात्म्यं वर्षकोटि
शतैरपी। न शक्यं कथितुं देवी तस्मात्संक्षेपतः शृणु। प्रलये समनुप्रा
प्ते नष्टे स्थावरजंगमे। नष्टे देवासुरे नष्टे पिशाचोरगराक्षसे। सर्वं प्र
कृतिमापन्ने त्वय्यपि प्रलयमेष्यति। एको हं संस्थितो देवी न द्वितीयो
स्ति कुत्रचित्। तस्मिन् वेदाश्च शास्त्राणि मंत्रे पंचाक्षरे स्थिता। तेनाशं
ने व संप्राप्ता मच्छक्त्या चानिपालिता। अहमेको द्विधा ह्यासं प्रकृत्यात्म
भेदतः। स तु नारायणः शेते देवो मायामयीं तनुं। आस्थाय योगपर्यंक
शयने तोयमध्यगः। यन्नाभिपंकजाज्जातः पंचवक्त्रः पितामहः। सिसृक्ष

माणान् त्रीन् लोकान् अग्रजो ह्यासहायवान्। दृष्ट्वा ब्रह्मा स
सर्जादौ मानसानमितौजसः॥ तेषां सृष्टिविवृद्ध्यर्थं मां प्रोवाच
पितामहः। मत्पुत्राणां महादेव शक्तिं देहीत्वमीश्वरः। इति तेन स
मादिष्टः पंचवक्त्रधरोप्यहं। पंचाक्षरान् पंचमुखैः प्रोक्तवान् पद्मयोन
ये। तान् पंचवदनैर्गृह्णन् ब्रह्मा लोकपितामहः। वाच्यवाचकभावेन ज्ञा
तवान् परमेश्वरं। वाच्यः पंचाक्षरैर्देवः शिवः त्रैलोक्यपूजितः। वाच
कः परमो मंत्रः तस्य पंचाक्षरः स्थितः। ज्ञात्वा प्रयोगं विधिना स सि २२
द्धश्च तदा पंचमुखो महात्मा। प्रोवाच पुत्रेभ्य जगद्धिताय मंत्रं स दृ
ष्टं किल पंचवर्णं। ते लब्ध्वा मंत्ररत्नं तु साक्षाल्लोकपितामहात्। तमा
राध्य हि पुर्देवं परात्परतरं शिवं। ततस्तोषगवान् त्रिमूर्त्तिनो

सदाशिवः। दत्तवानखिलं ज्ञानमणिमादिगुणाष्टकं। ते पि लब्धवरा वि
प्रास्तदाराधनकांक्षिणः। मेरोस्तु शिखरे रम्ये मुंजमान्नाम पर्वतः। मत्प्रि
यः सततं श्रीमान् भूतैरपि सुरक्षितैः। तस्मिंस्ते पुरुषास्तीव्रं लोकसृष्टि
समुत्सुकाः। दिव्यं वर्षसहस्रं तु वायुभक्ष्याः समुद्धरन्। तिष्ठंतानुग्रहा
र्थाय देवी ते रूपयः पुरा। तेषां भक्तिमहं दृष्ट्वा सद्यः प्रत्यक्षतामियां।
पंचाक्षरमृषिछंदो दैवतं बीजशक्ति वा। न्यासं षडंगं दिग्बंधं विनियो
गमशेषतः। प्रोक्तमान् अहमार्याणां लोकानां हितकाम्यया। ते श्रुत्वा मं
त्रमाहात्म्यं रूपयस्ते तपोधना। मंत्रस्य विनियोगं च कृत्वा सर्वमनुष्ठि
ता। तन्माहात्म्यात् तदा लोकान् सदेवासुरमानुषान्। सर्वाश्रमविभागांश्च
सर्वधर्मांश्च शाश्वतान्। पूर्वकल्पसमुद्भूतं संचिनं संकृतैः पुरा। पंचाक्ष

रप्रज्ञावाक्यलोकावेदाम हर्षया। तिष्ठंति शाश्वतान् धर्मान् वेदान्
सर्वमिदं जगत्। न दिदानीं प्रवक्ष्यामि ष्टएं चावहिताखिला। अक्ष
रं महार्थं च वेदसारं विमुक्तिदं। आज्ञा देसिद्धमसंदग्धं वाक्यमेनत्
शिवात्मकं। नानासिद्धियुतं दिव्यं लोकचित्तानुरंजनं। सुनिश्चितार्थगं
भीरं वाक्यं तत्परमेश्वरं। मंत्रं गुरुमुखाद्बुध्यमशेषार्थप्रसाधकं। सबी
जं सर्वविद्यानां मंत्रमाद्यं षडक्षरं। अतिसूक्ष्मं महार्थं च ज्ञेयं तद्वटबीज
वत्। देवः स त्रिगुणातीतः समर्थः सर्वज्ञस्तथा। ॐ मित्येकाक्षरे मंत्रे स्थितः ३०४
सर्वगतः शिवः। मंत्रे षडक्षरे सूक्ष्मे पंचाक्षरतनुः शिवः। वाच्यवाचकभा
५५ वेन मनादि संस्थितः स्वयं। किं तस्य बहुभिर्मंत्रैः शास्त्रैर्वा बहुविस्तरैः
। यस्यैवं हृदि संस्थो वै मंत्रा यं परमेश्वरः। तेनाधीतं श्रुतं तेन कृतं सर्वम
वाच्यवाचकभावेन स्थितः साक्षात्स्वभावतः। वाच्यः शिवः प्रमेयत्वान् मंत्रस्त
स्तद्वाचकः स्मृतः। ३

नुष्ठितं। यो विद्वान् वै जपेत्सम्यक् अधीत्यैवं विधानतः। एतावद्धि शिवं ज्ञा
नमेतावत्परमं पदं। एतावद्ब्रह्मविद्या च तस्मान्नित्यं जपेद्बुधः। पंचाक्ष
रः सप्रणवो मंत्रोयं हृदयं मम। गुह्याद्गुह्यतरं साक्षान्मोक्षज्ञानमनुत्त
मं। अस्य मंत्रस्य वक्ष्यामि ऋषिछंदोधिदैवतं। बीजं शक्तिं स्वरं वर्णं स्था
नं चैवाक्षरं प्रति। वामदेवो नाम ऋषिः पंक्तिछंद उदाहृतः। देवता शि
व एवाहं मंत्रस्यास्य वरानने। नकारादीनि बीजानि पंचभूतात्मकानि च
आत्मानं प्रणवं विद्धि सर्वव्यापिनमव्ययं। शक्तिस्त्वमेव नियमं सर्वदे
व नमस्कृते। त्वदीयं प्रणवं केचिन्मदीयं प्रणवं तथा। त्वदीयं देवि मं
त्राणां शक्तिभूतं न संशयः। अकारोकारमकारो मदीये प्रणवे स्थितः।
उकारश्च मकारश्च आकारश्च क्रमेण वै। त्वदीयं प्रणवं विद्धि त्रिमात्रं

र्त्तमुत्तमं। उकारस्य स्वरोदात्त ऋषिर्ब्रह्मा मनोस्मृतो। छंदो देवी च गा
यत्री परमात्मा देवता। उदात्तः प्रथमस्तद्वत् चतुर्थश्च द्वितीयकः। पं
चमः स्वरितश्चैव मध्यमो निषिधः स्मृतः। नकारं पीतवर्णस्य स्थानं
पूर्वमुखं स्मृतं। इंद्रोधिदैवतं छंदो गायत्र्यंगो तमो ऋषी मकारः कृ
ष्णवर्णस्य स्थानं वै दक्षिणमुखं। छंदोनुष्टुप् ऋषिश्चात्री रुद्रो दैवत
मुच्यते। वाकारो धूम्रवर्णस्य स्थानं वै पश्चिमं मुखं। विश्वामित्रो ऋषि
स्त्रिष्टुप् छंदो विष्ण्वधिदैवतं। बकारो हेमवर्णस्य स्थानं वै चोत्तरं मु ३०५
खं ब्रह्माधिदैवतं छंदो बृहतीचांगिरा ऋषीः। यकारो रक्तवर्णस्य स्था
नमूर्ध्वमुखं विराट् छंदो ऋषिर्भरद्वाजस्कंदो देवतमुच्यते। न्यासमस्य
व प्रवक्ष्यामी सर्वसिद्धिकरं शुभं। सर्वपापहरं चैव त्रिविधं न्यासमुच्यते

---

उत्पत्तिस्थितिसंहारभेदतः त्रिविधं स्मृतं। ब्रह्मचारी गृहस्थानां य
तीनां क्रमशो न वे न्। उत्पत्तिर्ब्रह्मचारीणां गृहस्थानां स्थितिः स्मृताः। य
तीनां संहृतिर्न्यासं सिद्धिर्भवति नान्यथा। अंगन्यासकरन्यासौ देहन्या
सं विना त्रिधा। उत्पत्त्यादित्रिभेदेन देहन्यासं वरानने। न्यसेत्पूर्वं करन्या
सं देहन्यासमनंतरं। अंगन्यासं ततः कुर्याद्द्रूराणां विधिक्रमात्। मू
र्धादिपादपर्यंतमुत्पत्तिर्न्यास उच्यते। पादादीमूर्धपर्यंतं संहारो भ
वति प्रिये। हृदयास्यगतन्यासं स्थितिन्यासमुदाहृतः। ब्रह्मचारी गृह
स्थानां यतीनां चैव शोभने। साशिरस्कं ततो देहे सर्वमंत्रेण संस्पृशेत्।
सदेहन्यासः स्तुक्तः सर्वेषां सम एव हि। दक्षिणांगुष्ठमारभ्य वामांगुष्ठ
तमेव च। न्यस्यते यत्तदुत्पत्तिर्विपरीतस्तु संहृतिः। अंगुष्ठादिकनिष्ठांतं

विन्यसेद्धस्तयोर्द्वयोः॥ अर्तावयोगदो देवी। स्थितिन्यासकृद्विनां। क
रन्यासं पुरा कृत्वा देहन्यासमनंतरं। अंगन्यासं समसेत्पश्चात् एष साधा
रणो विधिः। ॐकारं संपुटीकृत्य सर्वांगेष्वपि विन्यसेत्। करयोरूरुयोश्चैव
दृशास्वंगुलिषु क्रमात्। प्रक्षाल्य पादावाचम्य शुचिर्भूत्वा समाहितः। प्रा
ङ्मुखोदङ्मुखो वापि न्यसेत्कर्म समाचरेत्। एवमृषिं स्मरेच्छंदो देवतां
बीजमेव वा। शक्तिं च परमात्मानं गुरुं चैव वरानने। मंत्रेण पाणिसंमृज्य
तलयोः पृष्ठ न्यसेत्। अंगुलीनां च सर्वासां तथा तासां पंचपर्वसु। ष ३०६
~~स्मस्पादिभिर्भेदेन~~ सबिंदुकानि बीजानि पंचमध्यासु पर्वसु। उस्रसादि
त्रिभेदेन न्यसेद्वा श्रमतः क्रमात्। उत्तानामथ पाणिं सा आपादतलम
स्तकं। मंत्रेण संस्पृशेद्देहं प्रणवेनैव संपुटं। मूर्ध्नि वक्त्रे च कंठे च हृदये

गुह्यके तथा। पादयोरूरुयोश्चैव गुह्ये च हृदये तथा। कंठे च मुखम
ध्ये च मूर्ध्नि च प्रणवादिकं। हृदये गुह्यके चैव पादयोर्मूर्ध्नि चापि
३१ वा। कंठे चैव न्यसेद्देवं प्रणवादिविशेषतः। कृत्वांगन्यासमेवं हि
मुखानि परिकल्पयेत्। पूर्वादिचोर्ध्वपर्यंतं नकारादि यथाक्रमं। ष
डंगानि न्यसेत्पश्चात् यथास्थानं च शोभने। नमः स्वाहा वषट् हुं च वै
षट् फट्कारकैः स्फी। प्रणमं हृदयं विद्यात् नकारं शिर उच्यते। शिखा
मकारमाख्यातः शीकारः कवचं तथा। वाकारो नेत्रमस्त्रं तु यकारः
परिकीर्तितः। इत्यंगानि विन्यस्य ततो वै बंधयेद्दिशः। विघ्नशांतौ तं
ग्रीं दुर्गादि निर्वृत्तौ देवतादिवा। विघ्नशोमानसे दुर्गा हृत्रत्रो देवनादिशः। अं
गुल्यादिषु कोणेषु चतुर्ष्वपि यथाक्रमं। अंगुष्ठतर्जन्ययास्यं यथा स्थाने च शो

मनोरक्षमितिचोक्तान्तुनमस्तुर्यात्पृथकपृथक्। तलेमध्यमयांगुष्ठ
तर्जन्यांद्यंगुलीषुचा। अंगुष्ठेनकरन्यासंकुर्यादेवविचक्षणः। एवंन्यास
मिदंप्रोक्तंसर्वपापहरंशुभं। सर्वसिद्धिकरंपुण्यंसर्वरक्षाकरंशिवं। न्यस्त
मात्रेशुभेगात्रेमंत्रंकरप्रतिमोभवेत्। जन्मांतरकृतंपापंमपिनश्यतितत्क्ष
णात्। एवंविन्यस्यमेधावीशुद्धकायोदृढव्रतः। जपेत्पंचाक्षरंमंत्रंल
ब्ध्वाचार्यप्रसादतः। अतःपरंप्रवक्ष्यामिमंत्रस्यग्रहणंशुभे। येविनानि
ष्फलंजाप्यंयेनवासफलंभवेत्। आज्ञाहीनंक्रियाहीनंश्रद्धाहीनंस
मानसं। आज्ञप्तदक्षिणाहीनंसदाजप्येचनिष्फलं। आज्ञासिद्धंक्रि २०१
याहीनंसिद्धंश्रद्धासिद्धंसुमानसं। एवंचदक्षिणासिद्धंमंत्रासिद्धय
तस्ततः। उपगम्यगुरुंविप्रंमंत्रतत्त्वार्थवेदिनं। जापिनंसद्गुणोपेतं

ध्यानयोगपरायणं। तोषयेत्प्रयत्नेनभावशुद्धिसमन्वितः। वाचाच
मनसाचैवकायेनद्रविणेनवा। आचार्यंपूजयेच्छिष्यःसर्वदातिप्रय
त्नतः। हस्त्यश्वरथरत्नानिक्षेत्राणीचगृहाणिवा। भूषणानिचवासांसि
धान्यानिचधनानिच। एतानिगुरवेदद्यात्भक्त्याविगतमत्सरः। वित्तशा
ठ्यंनकुर्वीतयदीच्छेत्सिद्धिमात्मनः। पश्चान्निवेदयेद्देविआत्मानंसपरि
च्छदं। एवंसंपूज्यविधिवत्यथाशक्तिमतंद्रितः। आददीतगुरो
र्मंत्रंज्ञानंचैवक्रमेणतु। एवंतुष्टोगुरुःशिष्यंपूजकंवत्सरोषितं। शुश्रू
षुमनहंकारमुपवासकृशंशुचिं। स्नापयित्वाचशुद्ध्यर्थंपूर्णकलशोद
वि। जलेनमंत्रितेनाथपंचगव्ययुतेनचा। अलंकृत्यशुचेषंचवस्त्र
गंधस्रग्भूषणैः। पुण्याहंवाचयित्वाचब्राह्मणानभिपूज्यतु। समुद्

तीरेन द्यां वा गोष्ठे देवालयेपि वा। अश्वद्वे देशे गृहे वापी काले सिद्धिकरे
तिथौ। नक्षत्रे शुभयोगे च सर्वदोषविवर्जिते। अनुष्टुप्तथा दद्यात् शि
वज्ञानमनुत्तमं। स्वरेणोच्चारयन् सम्यक् एकोनेती प्रसन्नधीः। उच्चार्य
च्चारयित्वा तं आचार्यः सिद्धिदः स्वयं। शिवं चास्तु शोभनोस्तु श्रियो
स्त्विति वदेत्ततः। ~~यावज्जीवं जपेन्नित्यं~~ एवं लब्ध्वा वरं मंत्रज्ञानं चैव गुरो
स्ततः। जपेन्नित्यं ससंकल्पः पुरश्चरणमेव च। यावज्जीवं जपेन्नित्यं अ
ष्टोत्तरसहस्रकं। अनश्नन्तत्परो भूत्वा स याति परमां गतिं। जपेद्रुद्र ॥ २०८
लक्षं वै चतुर्गुणितमां दशात् न क्रासी सयमीयः स पौरश्चरणिकः स्मृतः।
पुरश्चरणजापी वा अपि वा नित्यजापकः। अचिरात्सिद्धिकोहं स्तन नत्वान्य
परो न वेत्। यः पुरश्चरणं कृत्वा नित्यजापी जपेत्पुनः। तस्य नास्ति समो

लोके स सिद्धिः सिद्धिदो भवेत्। आसने रुचिरं बध्वा मौनी चैवाग्रमानसः।
प्राङ्मुखो दङ्मुखो वापी जपेन्मंत्रमनुस्मरन्। आद्यन्तयोर्जपस्याथ कु
र्याद्दै प्राणसंयमान्। तथा तेच जपे बीजं शतमष्टोत्तरं शुभे। चत्वारि
त्रासमाहृत्य प्राणानायम्य संस्मरन्। पंचाक्षरस्य मंत्रस्य प्राणायाम
उदाहृतः। प्राणायामान् भवेत् क्षिप्रं सर्वपापपरिक्षयः। इंद्रियाणां व
शित्वं च तस्मात्प्राणांश्च संयमेत्। गृहे जपं समं विद्यात्गोष्ठे दशगुणं भ
वेत्। नद्यां शतं सहस्रं च अनन्तं शिवसंनिधौ। सिरित्तीरे देवगृहे गिरौ
देवालयेषु च। पुण्याश्रमेषु सर्वेषु फलकोटिगुणं भवेत्। शिवस्य संनि
धाने च सूर्यस्याग्रे गुरोरपि। दीपस्याग्रे जलस्यापि जपकर्म प्रशस्यते।
अंगुलीजपसंख्यानमेकमेकं शुभानने। रेखैरष्टगुणं विद्यात्पुत्र

जीवकैर्दशः



त्रं तं वै शंखमणिभिः प्रवालैस्तु सहस्रकं। स्फुटिकैर्दशसाहस्रं मुक्तिकैर्ल
क्षमुच्यते। पद्माक्षैर्दशलक्षं तु सौवर्णैः कोटिरुच्यते। कुशग्रंथ्या शतकोटि
स्तै रुद्राक्षैरनंतकं भवेत्। पंचविंशति मोक्षार्थे सप्तविंशति पौष्टिके। त्रिंशच्च
धनसंपत्तिः पंचाशच्चाभिचारकं। तत्पूर्वाभिमुखं वश्ये दक्षिणं चाभिचारिके।
पश्चिमे धनदं विद्यात् उत्तरं शांतिकं भवेत्। अंगुष्ठं मोक्षदं विद्यात् तर्जनी श
त्रुनाशिनी। मध्यमा धनदा शांतिं करोत्येषा ह्यनामिका। कनिष्ठा रक्षणीया
सा जपकर्मणि शोभने। अंगुष्ठेन जपेन्मंत्रं अन्यैरंगुलिभिः सह। अंगुष्ठेन वि
ना कर्म कृतं तदफलं यतः। [illegible] एष सर्वयज्ञेभ्यो जपयज्ञो विशिष्यते। हिं
सया अन्ये प्रवर्तंते जपयज्ञो न हिंसया। यावंतः कर्मयज्ञाः स्युः प्रदानानि त
पांसि च। सर्वे ते जपयज्ञस्य कलां नार्हंति षोडशीं। महात्म्यं वाचिकस्यैव

ज्ञमयज्ञस्य कीर्त्तितः। तस्माच्छतगुणो यो ऽसु सहस्रो मानसः स्मृतः॥ यदुच्चनी
चस्वरितैः शब्दैः स्पष्टपदाक्षरैः। मंत्रमुच्चारयेद्वाचा जपयज्ञः स वाचिकः॥ श
नैरुच्चारयेन्मंत्रमीषदोष्ठौ च चालयेत्। किंचिच्छब्दं स्वयं विद्यादुपांशुः स समु
दाहृतः॥ धिया यदक्षरश्रेण्या वर्णाद्वर्णं पदात्पदं। शब्दार्थचिंतयाभ्य
स्तः स उक्तो मानसो जपः॥ त्रयाणामपि यज्ञानां श्रेयान्स्यादुत्तरोत्तरः॥ न
वेद्यज्ञविशेषेण वैशिष्ट्यं तत्फलस्य च। जपेन देवताः सम्यक्स्तूयमाना
प्रसीदति। प्रसन्ना विपुलान्भोगान्दद्यान्मुक्तिं च शाश्वतीं। यक्षरक्षःपिशा ३१०
चाश्च ग्रहाः सर्पाश्च भीषणाः॥ जापिनं नैव सर्पन्ति भयभीताः समंततः॥ सर्वे ज २
न पापं कृपये दत्त्वा यत्नात्कृतं जन्मपरंपरासु। जपेन रोगान्जयते
ऽमृतसु जपेन सिद्धिर्लभते च मुक्तिं। एवं लक्ष्मीं त्रिवं ज्ञानं ज्ञात्वा जपविधिं क्र

मः॥ सदाचारपि जनान्तुकन्ध्यायन्रुद्रं समश्नुते। सदाचारं प्रव
क्ष्यामि सम्यक्ज्ञानस्य साधकं। तस्मात्सदाचारहीनस्य साधनं निष्फ
लं भवेत्। आचारः परमो धर्मः आचारः परमं धनं। आचारः पर
मा विद्या आचारः परमा गतिः। सदाचारवतां पुंसां सर्वत्राप्यभयं
भवेत्। सदाचारेण देवत्वमृषित्वं च वरानना। उपयांति कुयोनित्वं
मनुष्यास्तद्विपर्ययात्। आचारहीनः पुरुषो लोके भवति निंदितः
तस्माच्छ्रासिद्धिमन्विच्छन्सम्यक्सद्वृत्तवान्भवेत्। दुर्वृत्तो ऽशुद्धम्
र्ष्टोनः पापीयान्ज्ञानरूपकः॥ वर्णाश्रमाचारहीनो विभाति लभते
ऽत्र नो वर्णाश्रमविधानोक्तं धर्मं कुर्वीत यत्नतः॥ यस्य यद्विहितं कर्म तं
तत्कुर्वन्मस्त्रियः सदा संध्योपासनशीलस्यात्सायंप्रातः प्रसन्नधी

उद्यांस्तमयात्पूर्वमारभ्य विधिनाश्विः॥ कामात्मोहात्भयाल्लोभात्
संध्यांचातिक्रमेद्विजः॥ संध्याधिक्रमणाद्विप्रो ब्राह्मण्यद्भ्रस्यते यतः॥
असत्यं न वदेत्क्वापि। चैतन्न सत्यं परिवर्जयेत्॥ यः सत्यब्रह्मरसांकुरस
त्यब्रह्मरूपणं॥ अनृतं पुरुषस्योक्तं पैशुन्यं पापहेतुकं॥ परदारपरद्र
व्यपरहिंसां च सर्वदा॥ क्वापि वत्कापि न कुर्वीत वाचापि मनसापि वा॥ शूद्रा
न्नं च तथा मात्स्यं नैवेद्यं श्राद्धमेव च॥ गणान्नं संप्रदायान्नं राजान्नं च॥ वि
वर्जयेत्॥ अन्नशुद्धौ सत्वशुद्धिर्न मृदा न जलेन वै॥ सत्वशुद्धौ भवेत्सिद्धि ३११
स्ततोऽन्नं परिशोधयेत्॥ अस्नात्वा नैव भुंजीयादजप्त्वाग्निमहूय च॥ पर्ण
पृष्ठे न भुंजीयान्न च दीपं विना निशि॥ भिन्नभांडे न रथ्यायां ~~…~~ संवि
मुखः॥ कुत्सितपत्नीनां नां च संनिधौ॥ शूद्रशेषं न भुंजीयात्सदान्नं श्वशुकैरपि

शुद्धान्नं॥ स्नग्धमश्नीयात्संस्कृतं चाभिमंत्रितं॥ नोच्छिष्टो वेति स्मृताचा
मौनी चैकाग्रमानसः॥ नञ्ञास्यनापिबेदापः तिष्ठंजालेनापि वा॥
वामहस्तेन शय्यायां नथैवास्यकरणेन वा॥ बिनीतकर्ककारंजस्तादि
छायां च नाश्रयेत्॥ स्तंभदीपमनुष्याणां अन्यषां प्राणिनां तथा॥ एको
न गच्छेदध्वाने बाहुभ्यां न तरेन्नदीं॥ न चारोहेत नावादीन्नारोहेद्दु
ष्टपादपान्॥ सूर्याग्निजलदेवानां गुरूणां विमुखः शुचिः॥ न कुर्या
द्देवकार्याणि जपवामंत्रानिवा॥ अग्नौ न तापयेत्पादौ अग्नीपज्यांन
सं स्पृशेत्॥ अग्नेर्नाधश्चयमासीत नाग्नौ किंचिन्मलं त्यजेत्॥ न जलं ताड
एत्पद्भ्यां न मुखेनाग्निमलं त्यजेत्॥ मलं प्रक्षालयेत्तीरे प्रकाश्य स्नानमा
चरेत्॥ न खादयेत्केशान्॥ नधूर्तस्य न वस्त्रघटोदकं॥ अश्रीकरं मनुष्य

णां अशुद्धं संस्पृशेद्यदि। अज्ञश्चानखरोष्ट्राणां मार्जनीतुषरेणुकां। सं
स्पृशेद्यदि मूढात्मा शिरं हंति हरेरपि। स्निग्धातः सूर्यवात श्वपश्वप्र
णांमुखानिलं। सुकृतानि हरंत्येते संस्पृष्टापुरुषस्य तु। उष्णीषी कंचु
कीनग्नो मुक्तकेशो गलावृतः। अपवित्रकरोऽशुद्धः प्रलपन्न जपेत् क्वचि
त्। क्रोधमेमदक्षुधार्तं जीनिष्ठीवन विजृंभणं। स्वनीच दर्शनं निद्रा प्रला
पास्ते जपद्विषः। एतेषां संभवे चापी कुर्यात्सूर्यादि दर्शनं। आचम्य वा
जपेच्छेषं कृत्वा प्राणस्य संयमं। सूर्योग्नीचंद्रमाश्चैव ग्रहनक्षत्रता ३१२
रका। एते ज्योतींषि प्रोक्तानि विद्वद्भिर्ब्राह्मणैस्तथा। प्रसार्य न जपेत्पा
दौ कुर्कटासन एव वा। अन्यासनः शयानो वा रथ्यायां शूद्र संन्निधौ। रक्त
भूम्यां न खट्वायां न जपेज्जानतः स्वयं। आसनस्यो जपेत्सम्यक् मंत्रार्थ

गतमानसः। कौशेयं व्याघ्रचर्मं वा चैलं तौलमथापि वा। दारवं तालप
र्णं वा आसनं परिकल्पयेत्। त्रिसंध्यायां गुरोः पूजा कर्त्तव्या हितमिच्छता
योगुरुः स शिवं प्रोक्तः यः शिवः स गुरुः स्मृतः। यथा शिवस्तथा विद्या य
था विद्या तथा गुरुः। शिव विद्या गुरोस्तस्माद् भक्त्या च सदृशं फलं। सर्व देव
मयो देवी सर्वशक्तिमयो गुरुः। सगुणो निर्गुणो वापी तस्याज्ञां शिरसा वहे
त्। श्रेयोर्थी यस्तु गुर्वाज्ञां मनसापि न लंघयेत्। गुर्वाज्ञां पालकः सम्यक्
ज्ञानसंपत्तिमश्नुते। गच्छन् तिष्ठन् स्वपन् भुंजन् यद्यत्कर्म समाचरेत्।
समक्षं यदि तत्सर्वं कर्त्तव्यं गुर्वनुज्ञया। गुरोर्देवस्य समक्षं वा न यथेष्टा
गेप सनो भवेत्। गुरुर्देवो यतः साक्षात् तद्गृहं देवमंदिरं। ज्ञानीनां च यथा संगा
त् तत्पापपतनं भवेत्। तद्वदाचार्य संगेन तत्कर्मफलमाप्नुवेत्। यथैव

वह्निसंपर्कात्मलं त्यजति कांचनं। तथैव गुरुसंपर्कात्पापं त्यजति मा-
नवः॥ यथा वह्निसमीपस्थो घृतकुंभो विलीयते। तथा पापं विलीयेत आ-
चार्यस्य समीपतः॥ यथा प्रज्वलितो वह्निः शुष्ककाष्ठं च निर्दहेत्। गुरुस्तुष्टो
दहत्येवं ज्ञाप्यं तन्मंत्रतेजसा॥ ब्रह्मा हरिस्तथा रुद्रो देवाश्च मुनयस्तथा।
कुर्वंत्यनुग्रहं तुष्टा गुरुस्तुष्टे न संशयः॥ कर्मणा मनसा वाचा गुरोः क्रोधं न का-
रयेत्। तस्य क्रोधेन दह्यंते आयुःश्रीज्ञानसत्क्रियाः॥ तत्क्रोधकारिणो ये स्यु-
स्तेषां यज्ञाश्च निष्फलाः। जपाश्च नियमाश्चैव नात्र कार्या विचारणा॥
गुरोर्विरुद्धं यद्वाक्यं न वदेत्सर्वयत्नतः। वदेद्यदि महादोषो रौरवं न-
रकं व्रजेत्। वित्तेनैव च वित्तेन तथा वाचा च सुव्रते। मिथ्या न कारयेद्दे-
वि क्रियया च गुरोः सदा। दुर्गुणे ख्यापिते तस्य नैर्गुण्यं ज्ञातमाप्नुयात्। ३१३

गुणे तु ख्यापिते तस्य सर्वपुण्यफलं लभेत्। गुरोर्हितं प्रियं कुर्यात्
दादिष्टो वा न वा सदा। असमक्षं समक्षं वा गुरोः कार्यं समाचरेत्। वि-
त्तेनैव च वित्तेन गुरोर्न विप्रियं कुर्यात्मनोवाक्कायकर्मभिः। कुर्वन्नु-
प तस्य घोरं गत्वा तत्रैव परिवर्तते। तस्मात्तु सर्वदोषाढ्यो वंदनीय-
प्रयत्नतः। समीपस्थो न चैतस्य वंदेत सम्मुखो गुरुं। एवमाचारवान्
५२ नक्तं नित्यं जपपरायणः। गुरुभक्तिप्रियकरो मंत्रं विनियोक्तुं ततोऽर्हति।
विनियोगं प्रवक्ष्यामि सिद्धमंत्रप्रयोजने। दौर्बल्यं याति तं मंत्रं वि-
नियोगमजानतः। यस्य यन्नियुंजीत कार्येण च विज्ञापयेत्। विनियो-
गास्तु वित्तयः ऐहिकामुष्मिकफलाः। विनियोगजमायुष्यमारोग्यं त-
नु नित्यदा। राज्यैश्वर्यं च विज्ञानं स्वर्गो निर्वाणमेव च। प्रोक्तानां च

भिषेकं च अघमर्षणमेव च। स्नानं च संध्ययोश्चैव कुर्याद्देकादशान
वै। श्रीपर्वतमारुह्य जपेल्लक्षमतंद्रितः। महानद्यादिलक्षं तु दी-
र्घमायुरवाप्नुयात्। दूर्वांकुरैस्तिलैर्वापि श्रद्धैद्यैस्तथैव च। तेषां द
शसहस्राणां होममायुष्यवर्धनः। अश्वत्थवृक्षमाश्रित्य जपेल्लक्षं द्व
यं सुधीः। शनैश्चरदिनस्पर्शाद्दीर्घमायुर्लभेन्नरः। जपेद्दशोत्तरशतं सो
पिष्टलक्षं हरोभवेत्। आदित्याभिमुखो भूत्वा जपेल्लक्षमनन्यधीः। अर्कै
रष्टशतेनित्यं जुहुयाद् व्याधेर्विमुच्यते समस्तव्याधिशांत्यर्थं पालाशास २१४
मिधां नरः। कृत्वा दशसहस्रं तु नीरोगो मनुजो भवेत्। नित्यमष्टशतं ज
प्त्वा पिबेदापोऽर्कसंनिधौ। महारोग्याधिभिः सर्वैर्मासेनैकेन मुच्यते। एका
दशेन तु जीयाद्दत्रं चैवाभिमंत्रितं। नस्यं चान्नं तथा पेयं विषमप्यमृतं भवेत्

जपेल्लक्षं तु पूर्वाह्ने कृत्वा वा अष्टशतेन वै। सूर्यं नित्यमुपस्थाय सम्य
गारोग्यमाप्नुयात्। नदीतोयेन संपूर्णं घटं संस्पृश्य शोभने। जप्त्वायुतं
च तस्मान्न रोगाणां भेषजं भवेत्। अष्टाविंशज्जपित्वान्नमश्नीयाद्दन्वहं शु
चिः। भुंजानां वत्तावत्यान्नात्रारितैरारोग्यमश्नुते। चंद्रसूर्यग्रहे पूर्वमुपोष्य
विधिना शुचिः। यावद्ग्रहणमोक्षं तु तावत्तत्रासमाहितः। जपेत्सम्यग्गा दे
मिन्यां विमोक्षे ग्रहणस्य तु। अष्टोत्तरसहस्रेण पिबेद्ब्राह्मीरसं द्विजः। ए
हि किं बहुनात मेधां सर्वश्रुतमहाग्रंथां सरस्वती भवेद्देवी तस्य वाग्गति
मां तु वीथ्य ग्रहनक्षत्रपीडासु जपेज्जप्त्वायुतं नरः। कृत्वा वाष्टसहस्रं
तु ग्रहपीडा विनश्यति। दुःस्वप्नदर्शने स्नात्वा जपेद्दैवायतं नरः। घृ
तेनाष्टशतं कृत्वा सद्यः शांतिर्भविष्यति। चंद्रसूर्यग्रहे लिंगं समभ्यर्च्य

यथाविधिः। यत्किंचित्प्रार्थयेद्देवी जपेद्युक्तमादरात्। सन्निधौ न
स्य देवस्य शुचिः संयतमानस। सर्वान्कामानवाप्नोति पुरुषो नात्र संश
यः। राजानां ब्राह्मणानां तु गोजातीनां तथैव च। व्याध्यागमे शुचिर्भूत्वा जुहु
यात्समिदाहुती। मासमन्नमर्च्य विधिवत् द्युतेन भक्तिसंयुतः। तेषामृद्धिश्च
शान्तिश्च भविष्यति न संशयः। उत्पातेशान्तु बाधायां जुहुयाद्युक्तं शुचि
५स पलाशसमिधा देवी तस्य शान्तिर्भविष्यति। आभिचारिकं संदृश्य यामेव देवी
समाचरेत्। प्रत्युत्पन्नवति तच्छक्तिः शत्रुपीडा भविष्यति। विद्वेषणार्थं जुहुया ३१५
द्भूनीतसमिद्वर्णेष्टकं। प्रायश्चित्तं च वक्ष्यामि सर्वपापविशुद्धये। पाप
शुद्धिर्यथा सम्यक् कर्तुमत्युद्यते नरे। पापशुद्धिर्न चेत्तस्य संक्रियाः सर्वा
श्च निष्कलाः। ज्ञानं च दीयते यस्मात्। कर्म्मपापशोधनं। विद्याशुद्धिवि
ष्फ

लक्ष्मीविशुद्ध्यर्थं मां ध्यात्वा जलिनाश्रमे। शिवे नैकादशोनाद्भिरभि
षिंचेत्समंततः। अष्टोत्तरशतेनैव स्नायात्पापविशुद्धये। सर्वतीर्थफ
लं तद्धि सर्वपापहरं शुभे। संध्योपासनविछेदी जपेदष्टशतं बुधः। वि
डूराहैश्च चाण्डालैर्मार्जारैः कुक्कुटैश्च रपि। स्पृष्टमन्नं न भुंजीत भुक्त्वा चाष्ट
शतं जपेत्। ब्रह्महत्यादिशुद्ध्यर्थं जपेल्लक्षायुतं नरः। पातकानां तदर्धं
स्यान्नात्र कार्या विचारणा। उपपातकदुष्टानां तदर्धं परिकीर्तितं।
शेषाणां सर्वपापानां जपेत्संच सहस्रकं। आत्मबोधपरं गुह्यं शिवरूप ३१६
प्रकाशकं। जितश्वासो जपेन्मंत्रं पंचलक्षमनाकुलं। पंचवायुजयं भद्रे
धि प्राप्नोति मनुजः सुखी। यो जपेत्पंचलक्षं तु निगृहीतेन्द्रियः शुचिः। पंचे
न्द्रियाणां विजयो भविष्यति वरानने। ध्यानयुक्तो जपेत्पंचलक्षयस्त्र

न कु[illegible] ॥



नाकुलं। विषयानां च पंचानां जयं प्राप्नोति मानवः। चतुर्थं पंचज
हूंतु यो जपेद्भक्ति संयुतं। भूतानामिह पंचानां जयं प्राप्नोति मानवा।
चतुर्दले हूं जपेद्यस्तु मनः संयम्य तत्वतः। सम्यग्विजय प्राप्नोति कारण
नां वरानने। पंच विंशति तत्वानां विजयं मनुजो लभेत्। मध्यरात्रे निवा
ते तु जपेद्युत मादरात्। स ब्रह्मसिद्धि माप्नोति इ है वानेन सुंदरी।
जपेत्त्र हूमनालस्यो विघ्नौघेध्वनि वर्जिते। मध्यरात्रे शिवज्योत्स्नोप
रूपत्ये रुन संशयः। अंधकार विनाशं च दीपस्येव प्रकाशने। हृदयांत
र्बहिर्वापीन विष्यंति न संशयः। सर्वसंपत्समृध्यर्थं जपेद्युत मात्मवा
न्। स बीज संपुटं मंत्रं शाल लक्षं जपेच्छुचिः। मस्सायुज्य मवाप्नोति नाक्षि
मान् किमतः परं। इति तत्सर्वमस्माते पंचाक्षर विधिक्रमः। यपठेच्छृणुया

ध्यायी सयातिपरमांगतिं।यश्रावयेद्विजान्श्राद्धान्पंचाक्षरविधिक्रमांदै
वेकर्मणिपित्रेवाब्रह्मलोकेमहीयते॥ ॥इतिश्रीलैंगेमहापुराणेचतु
राशीतितमोध्यायः॥ ॥ऋषयऊ॥ ॥जपात्श्रेष्ठतमंप्रोक्तंब्रह्मणः
दृ[illegible]विधैः।विरक्तानांप्रबुद्धानांध्यानयज्ञंसुशोभनं।तस्माद्वद
ग्र स्वसूताद्यंध्यानयज्ञंविशेषतः।विस्तरात्सर्वयत्नेनविरक्तानांमहा
त्मनां। तेषांतद्वचनंश्रुत्वामुनीनांदीर्घसत्रिणां।रुद्रेणकथितंप्राह
गुह्याद्गुह्यमहात्मनां। संहृत्यकालकूटाख्यंविशेषेविश्वकर्मणः। ३१७
गुह्याद्गुह्यंसुखासीनेनवान्याःसहस्रांकरे।मुनयःशंसितात्मानःप्रणे
मुर्तिगुहाश्रयं।अम्बेवश्चततःसर्वेनीलकंठमुमापतिं।अस्मुग्रंकाल
कूटाख्यंसंहृतंभगवंस्त्वया।यतःप्रतिष्ठितंसर्वंत्वयादेववृषध्वजः

तेषांतद्वचनंश्रुत्वाभगवान्नीललोहितः।प्रहसन्प्राहविश्वात्मा
सनंदनपुरोगमान्।किमनेनद्विजाःश्रेष्ठाविषंवक्ष्येसुदारुणं।संह
र्तव्यंविषंयस्तुससमर्थोह्यनेनकिं।नविषंकालकूटाख्यंसंसारोविष
मुच्यते।तस्मात्सर्वप्रयत्नेनसंहरेत्तंसुदारुणं।संसारश्चद्विधाप्रोक्तः
साधिकारानुरूपतः।सुमूढश्चेत्तसोपुंसांप्रसिद्धीणसुदारुणः।एष
णाशागद्वेषेणरागोज्ञानेनसुव्रतां।तद्वशाद्देवसर्वेषांधर्माधर्मौ
नसंशयः।असंक्लिष्टेत्वथैपिशास्त्रेतच्छृणुतांसतां।बुद्धिमुत्पाद
यत्येवंसंसारंविषतांद्विजाः।तस्मात्तदानुश्रविकंदृष्टमित्युभयात्मकं
संत्यजेत्सर्वयत्नेनविरक्तःसोभिधीयते।शास्त्रमित्युच्यतेभागःश्रुते
कर्मसुतद्विजाः।प्रधानंब्रह्मणःसारमृषीणांकर्मणःफलं।ततःस्वम

वःसर्वेषां कामोद्दृष्टोन चान्यथा। प्रवृत्तिप्रवर्त्तकातेषामितिकर्मणि तद्वि
दः। निवृत्तिलक्षणोधर्मसमर्थानामिहोच्यते। तस्मादज्ञानमूलोहि सं
सारः सर्वदेहिनां। कलासंज्ञोयं मायाति कर्मणोन्यासस्भावतः। स्वकज
स्त्रीं विधो जीवोज्ञां न हीनस्त्वविद्यया। नारकी पापकृत्स्वर्गी पुण्यस्तु
ण्यगौरवात्। व्यतिमिश्रेण वै जीवश्चतुर्धा सो व्यवस्थितः। उद्भिजः स्वे
दजश्चैव चांडजो वै जरायुजः। एवमवस्थितो देही कर्मणाज्ञो ह्यनिर्वि
तः। प्रवृत्त्या कर्मणा मुक्तिर्धनिनश्च सतां न हि। त्यागेनैकेन मुक्तिः स्यात्त ३८
दभावाद्भ्रमत्यसौ। एवमज्ञानदोषेण नानाकर्मवशेन च। षट्कौशिकं
संभूतं जन्तजस्येव कलेवरं। गर्भे दुःखान्यनेकानि योनिमार्गप्रसूतजे
कौमारे यौवने चैव वार्द्धिके मरणे तथा। विच्छेदनः सतां दुःखं स्त्रीसंसर्ग

दिनिर्द्धजाः। दुःखेनैकेन वै दुःखं प्रशाम्यति हि दुःखिनः। न जातु का
मः कामानामुपभोगेन शाम्यति। हविषा कृष्णवर्त्मेव भूय एवाभिवर्द्ध
ते। तस्माद्विचारतो नास्ति संयोगादपि वैन्दणां। अर्थानामर्जने व्येकपा
लनेव्ययेतथा। पैशाचे राक्षसे दुःखं याह्ये चैव विचारतः। गांधर्वे
च सतामैंद्रे सौम्ये लोके द्विजोत्तमा। तानि भाग्यान्यशुद्धानि संसजे
च्छाधनानि वा। तस्माद्दृष्टगुणं भोगं तथा ऊर्ध्वास्थितं। चतुर्विंशत्स
कारेण संस्थितं चापि सुव्रताः। द्वात्रिंशद्भेदमनघाश्चत्वारिंशद्गुणं पुनः
तथा ॐ चत्वारिंशाच्च षट्पंचाशत्प्रकारतः। चतुःषष्टिविधं चैव दुः
खमेवविवेकिनां। पार्थिवं च तथाप्यं च तैजसं च विचारतः। वायव्यं
च तथाप्याममानसं च यथाक्रमं। अभिमानिकमप्येवं बाह्यं प्राकृतमे

वा। दुःखमेव न संदेहो योगिनां ब्रह्मवादिनां॥ गौणं गौणेश्वराणां च दुः
खमेव विचारतः॥ आदौ मध्ये तथांते च सर्वलोकेषु सर्वदा॥ वर्त्तमाना
नि दुःखानि न विघ्नानि यथा तथा निजावयंत्यतीतानि येज्ञानेज्ञानमा
निनां लंघ्यापि परिहारार्थं न सुखायांतमुच्यते॥ यथेतरेषां रोगाणां मौ
षधं न सुखाय ता। शीतोष्णा वातवर्षाद्यैस्तद्वत्कालेषु देहिनां॥ दुःख
मेव न संदेहो न जानंतीह पंडिताः॥ स्वर्गेप्येवं मुनिश्रेष्ठाप्य विष्णुरुद्रयादि
ग्र० तिः॥ तेषां नानाविधैस्ता रागद्वेषभयादिभिः॥ नराके दुःखमेवात्र निषिद्धा ३१९
नां निषेवणान्नृ। विहिताकरणाच्चैव वर्णानां मुनिपुंगवा॥ कीटपक्षिमृ
गाणां च पशूनां च गवां तथा॥ दृष्टमेव सुखं तस्मात्यजतः सुखमुत्तमं॥
वैमानिकानामप्येवं दुःखं कस्यांतकारणं॥ स्यानांतिमोनिनां चैव मन्वादी

द्वि०

नां वसुव्रतां देवानां चैव दैत्यानां॥ अन्योन्यविजिगीषया॥ दुःखमेव नृपा
णां च राक्षसानां जगत्त्रये॥ अमार्थमाश्रमस्थापी वर्णानां परमार्थतः॥
ज्ञाश्रमेन च वेदैश्च यज्ञैसांख्यैर्व्रतैस्तथा॥ उग्रैस्तपोभिर्विविधैर्दानैर्ना
विधैरपि॥ न जानंते तथात्मानं जानंते ज्ञानिनः स्वयं॥ परया विद्यया वि
द्यां वदंत्यपरयानहि॥ द्वे विद्ये वेदितव्ये हि परा चैवापरा तथा॥ अपरा
तत्र ऋग्वेदो यजुर्वेदो द्विजोत्तमा॥ सामवेदस्तथाथर्ववेदः सर्वार्थसा
धकः॥ शिक्षा कल्पो व्याकरणं निरुक्तं छंद एव च॥ ज्योतिषं चापरावि
द्या परा त्वक्षरमिति स्थिता॥ तददृश्यं तदग्राह्यं अगोत्रं तदवर्णकं॥ तद
चक्षुस्तदश्रोत्रं तदपाणिमपादकं॥ तदज्ञानमभूतं च तदग्राह्यं द्विजो
त्तमाः॥ अस्पर्शं तदरूपं च रसगंधविवर्जितं॥ अव्ययं चाप्रतिष्ठं च तन्नि

त्यं सर्वगं विभुं। महान्तं त्वद्भुतं तत्वं तदहं चिन्मयं द्विजाः। अप्राणममन
स्कं च तदस्निग्धमलोहितं। अप्रमेयं तदस्थूलं अतिदीर्घं तदणुं त्वणं।
अह्रस्वं नेदपारं च तदस्निग्धमलोहितं नेतस्मिन्नाश्रितं। अनपावृतमद्वैत तः
मनेनंतरंभगोचरं। असंहतं तदात्मैव परा विद्या न चान्यथा। परापरेति क
थितं नैव हि परमार्थतः। अहमेव जगत्सर्वं मय्येव सकलं जगत्। मत्त उत्प
द्यते तिष्ठन् मयीमय्येव लीयते। मत्तो नान्यदिति ह्येतन्मनोवाक्काणिनिस्तथा
सर्वमात्मनि संपश्येत् सच्चासच्च समाहितः। सर्वं ह्यात्मनि संपश्यत् बाह्ये ३२०
२नः कुर्वीत नो मनः। हृदयस्यास्य मध्ये तु पुंडरीकमवस्थितं। धर्मकंदात्समु
द्भूतं ज्ञाननालं सुशोभनं। ऐश्वर्याष्टदलं श्वेतं परं परं वैराग्यकर्णिकं। प्र
द्राणिवदशान्यस्य प्राणाद्याश्च प्रतिष्ठिता। प्राणाद्यैश्चैव संयुक्तं पश्यते ब

अधोह्युष्ट्या वितस्त्यान्तु नाभ्यां उपरि तिष्ठति।
हृदयं तद्विजानीयात् विश्वस्यायतनं महत्॥ २

कुधाक्रमात्। दशद्वाराणि वहा नाड्यः प्रत्येकं मुनिपुंगवाः। द्वौ सप्तति सह
स्राणि नाड्यः परिकीर्तिताः। नित्रस्थं जाग्रतं विद्यात् कंठे स्वप्नं समादिशेत्
सुषुप्तं हृदयस्थं तु तुरीयं मूर्धनि स्थितं। यदत्स्थेवमथान्येपि समस्तकर
णैः पुमान्। वर्तते करणान्यस्य जाग्रदत्स्पनि धीयते। मनो बुद्धिरहंका
रं चित्तं चेति चतुष्टं। यदान्यवस्थितैः श्रितैः स्वप्नस्तपनिधीयते। करणा
नि विलीनानि यदा स्वात्मनि सुव्रता। सुषुप्तिकरणैर्निर्मुक्तं तुरीयाप
रिकीर्तिता। परं तुरीयातीतोसौ शिवः परमकारणं। जाग्रत्स्वप्नसुषु
प्तिश्च तुरीयं चाधिभौतिकं। आध्यात्मिकं च विप्रेंद्राश्चाधिदैवकमेव वः। त
त्सर्वमहमेवेति वेदितव्यं विजानता। बुद्धींद्रियाणि विप्रेंद्रास्तथा कर्मेंद्रि
याणि च। मनो बुद्धिरहंकारं चित्तं चेति चतुष्टयं। अध्यात्मिकं विप्रेंद्राश्चा

धिदैवकमेवचा। अध्यात्मं पृथगेवेत्थं। चतुर्दशविधं स्मृतं। दृष्टव्यं चैव
श्रोतव्यं घ्रातव्यं च यथाक्रमं। रसितव्यं मुनिश्रेष्ठाः स्प्रष्टव्यमेव चा। म
न्तव्यं चैव बोद्धव्यं अहंकर्तव्यमेव चा। तथा चेतयितव्यं च वक्तव्यं मुनिपुंगवाः।
ग्राह्यं चैव गन्तव्यं विसर्गयितव्यमेव चा। आनन्दयितव्यमित्येते अधिभूता यथा
नुक्रमात्। आदित्योथ दिशश्चैव पृथिवी वरुणस्तथा। वायुश्चन्द्रस्तथा ब्र
ह्मा रुद्रश्चैवेन्द्र एव चा। अग्निरिन्द्रस्तथा विष्णुर्मित्रो देवप्रजापतिः। अधि
दैवतमेवं हि चतुर्दशविधं क्रमात्। राजीसुदर्शना चैव जिता सौम्या यथा ३२१
क्रमं। मोघा कूर्मामृता सत्या मध्यमा च द्विजोत्तमाः। नाडिशिशुका चैव
सौरान्याः सूर्यकोतिका। भास्वती नाडयस्तेषां चतुर्दश निबन्धना। वायवो
नाडिमध्यस्था वाहकाश्च चतुर्दश। प्राणो व्यानो ह्यपानश्च उदानश्च समानकः।

वैरम्भश्च तथा मुख्या हन्तर्यामप्रभञ्जनः। कूर्मिकश्च तथा श्येनः श्वे
तः कृष्णस्तथा विकाः। नागश्चैव कथिता वायवश्च चतुर्दश। यश्च
कृष्णपथदृष्टं तथादिष्टेश्च संवृता। नाड्यो प्राणैश्च विज्ञानस्थानं देव
यथाक्रमं। भूम्याकाशोयमेतस्मिन् सर्वस्मिन्नन्तरे परः। आत्मा स एक
श्चरति तमुपासीत मोक्षवं। अजरममरं चैव अशोकममृतं ध्रुवं। च
तुर्दशविधिर्ह्येवं संचरत्येक एव सः। जीयन्ते नानि तत्रैव तदस्त्रास्ति। तद्वि
ज्ञा। एष एव हि सर्वज्ञः सर्वं पश्यति एक एव सः। एष सर्वाधिपो देवस्त्वन्त
र्यामी महाद्युतिः। उपास्यमानः सर्वस्य सर्वसौख्यः सनातनः। उपास्य
ति नचैवेह सर्वसाक्ष्यं द्विजोत्तमाः। उपास्यमानो वेदैश्च शास्त्रैर्नानावि
धैरपि नचैव वेदशास्त्राणि सर्वज्ञोपास्यति प्रभुं। यस्य वाक्यमिदं सर्वं

नमोन्नं नवति स्वयं । प्रशास्ता च मस्यैष पंचात्मा च विभागशः । अन्नमयो सौ
भूतात्मा चाद्यते त्वन्नमुच्यते । प्राणाया मश्चेंद्रियात्मा संकल्पात्मा मनोमयः
कालात्मा सा म एवेह विज्ञानमय उच्यते । सदानंदमयो ह्यात्मा लयात्मा
परमेश्वरः । सोहमेव जगत्सर्वं मद्भावं समकलं स्थितं । परं तंत्रं स्वतंत्रं पि न
द्वाभावाद्विचारितः । एकत्वमेव नास्त्येव द्वैतं तत्र कुतस्त्वहो । एवं नास्त्यय
मं ताव कुतो मृत मजोद्भवात् । नांतः प्रज्ञो बहिः प्रज्ञो न चोभयगतस्तथा । न
प्रज्ञानं यतस्तस्यैवं मज्ञानाभाव एव सः वेदिता नास्ति वेद्यं च निर्वाणं परमार्थ ३११
तः । निर्वाणं चैव कैवल्यं निःश्रेयसमनोपमं । अमृतं चाक्षरं ब्रह्म परमात्मा प
रात्परं । निर्विकल्पं निराभासं ज्ञानपर्यायवाचकं । प्रसन्नेवयं देकाग्रं तदा
ज्ञानमिति स्मृतं । अज्ञानमितरत्सर्वं नात्र कार्या विचारणा । इच्छेत्प्रसन्नं यत

८२

ज्ञानं गुरुसंपर्कजं ध्रुवं । रागाद्विषन्नृतः क्रोध कामदंभादिभिः सदा
अपरामृष्ट मनसा चित्ते यं मुक्तिदं त्विदं । अज्ञानमलपूर्णत्वात् पुरुषो
मलिनः स्मृतः । तत्क्षयाद्भवेन्मुक्तिर्नान्यथा कर्मकोटिभिः । ज्ञानमेकं
विना नास्ति पुण्यपापपरिक्षयः । ज्ञानमेवाभ्यसेत्तस्मात् मुक्त्यर्थं ब्रह्म
वित्तमः । ज्ञानाभ्यासाद्धि पुंसो वै बुद्धिर्भवति निर्मला । तस्मात् सदाभ्य
सेत् ज्ञानं तन्निष्ठस्तत्परायणः । ज्ञानेनैकेन तृप्तस्य त्यक्तसंगस्य योगि
नः । कर्तव्यं नास्ति विप्रेंद्रा अस्ति चेन्न स तत्ववित् । इहलोके परे लोके
कर्तव्यं नास्ति तस्य वै । जीवन्मुक्तो यतस्तस्माद्ब्रह्मवित्परमार्थतः । ज्ञाना
भ्यासरतश्चैव ज्ञानतत्वार्थवित्स्वयं । कर्तव्याभ्यासमुत्सृज्य ज्ञानमे
वाधिगच्छति । वर्णाश्रमाभिमानीयस्त्यक्त्वा ज्ञाने द्विजोत्तमाः । अत्यत्र

मत्तेमूढः सोज्ञानीनात्र संशयः॥ क्रोधोहर्षस्तथा लोभो मोहो दंभो द्विजोत्त
मा॥ धर्माधर्मौ च तेषां हि तद्वशाद्देहसंग्रहः॥ शरीरे सति वै क्लेशः सो वि
द्यां संत्यजेत्ततः॥ अविद्यां विद्यया तीर्त्वा स्थितस्यैवेह योगिनः॥ क्रोधाद्या
नाशमायांति धर्माधर्मौ च वै द्विजाः॥ तत्क्षयाच्च शरीरेण न पुनः संप्रयुज्य
ते॥ स एव मुक्तः संसारात् दुःखत्रयविवर्जितः॥ एवं ज्ञानं विना नास्ति ध्यानं
ध्यातु द्विजोत्तमाः॥ ज्ञानं गुरोर्हि संपर्कात् विज्ञेयं परमार्थतः॥ चतुर्व्यूहमधि
ज्ञात्वा ध्यात्वा ध्यानं समभ्यसेत्॥ सहजागंतुकं पापं अस्ति मज्ञागतं तथा
ज्ञानाग्निर्दहते क्षिप्रं शुष्कं इंधनमिवानलः॥ ज्ञानात्परतरं नास्ति सर्वपाप २२३
विनाशनं॥ अभ्यसेत्तत्सदा ज्ञानं सर्वसंगविवर्जितः॥ एवं ज्ञानं विनाना
स्ति ध्यानं ध्यातु द्विजोत्तमाः॥ क्रिडन्नपि न लिप्येत पापैर्नानाविधैरपि॥ ज्ञा

नं यथा तथा ध्यानं तस्माद्ध्यानं समभ्यसेत्॥ ध्यानं निर्विषयं प्रोक्तं मा द्वे
सविषयं तथा॥ षट्प्रकारं समभ्यस्य चतुःषष्टिर्द्विजाः॥ तथा वाद
शाधा चैव पुनः षोडशाधा क्रमात् द्विधा ध्यायस्य च योगींद्रो मुच्यते नात्र संश
यः॥ शुद्धजांबुनदाकारं विधूमांगारसंनिभं॥ पीतरक्तासितं विद्यु
त्कोटिकोटिसमप्रभं॥ अथवा ब्रह्मरंध्रस्थं चित्रं कृत्वा समाहितः॥ न
नीलं नासितं पीतं न स्मरेत् ब्रह्मवित्र वेत्॥ अहिंसकः सत्यवादी अस्तेयः
सर्वयत्नतः॥ परिग्रहविनिर्मुक्तो ब्रह्मचारी दृढव्रतः॥ संतुष्टः शौचसंपन्न
ः स्वाध्यायनिरतः सदा॥ मन्नक्तं अभ्यसेत् ज्ञानं गुरुसंपर्कजं ध्रुवं॥ न शु
८ ध्यतियत्नाध्यातास्याप्यचित्तं द्विजोत्तमाः॥ न चापि मन्यते योगी न पश्यं
ति परं ततः॥ नाघ्राति न शृणोत्येव नीलः स्वात्मनि संस्थितः॥ न च स्पर्शं विजा

नातिसर्वैसमेरसःस्मृतः।पार्थिवेपटलेब्रह्मावारितत्वेहरिस्वयं।का
ष्ठिनंस्वतत्तोसर्वंपार्थिवंपरिणीयते।आप्यंद्रवमितिप्रोक्तंवर्णरूपंवह्नि
रुच्यते।यच्चरतितद्वायुःशुषिरंनद्विजोत्तमा।तदाकाशध्वनिज्ञातिस्प
र्शाख्यंवायुसंभवं।रूपंचवह्नेयमित्युक्तंआप्यंरसमयंद्विजा।गंधाख्यंपा
र्थिवंभूयश्चिंतयेद्भास्करंक्रमात्।नेत्रेचदक्षिणेवामेसोमेरुद्रेविभूर्द्विजः
आज्ञातुपृथिवीतत्वंमनोभिर्वारिमंडले।आकंठेवह्नितत्वंस्यात्जलाटां
तेद्विजोत्तमाः।वायव्यंतुललाटस्थंव्योमचोर्ध्वंततस्वयं।व्योमाख्यंव्यो ३२८
ममध्यस्थोह्यह्यःत्रापमिकंस्मरेन्द्रौजीवंप्रकृतिः सत्वंरजश्चाप[illegible]मतंपर
महस्तथाभिमानश्चतन्मात्राणींद्रियाणिच।व्योमादीनीचभूतानिनैवेहप
रमर्थतः।व्याप्यतिष्ठत्यतोविश्वंस्थाणुरित्यभिधीयते।उद्देतीति चनसूर्य

पवनोवातएवस्वातदाज्ञयाततःसर्वंतस्मात्तंचिंतयेधियां।तेनैवाधि
ष्ठितंयस्मात्तत्सर्वंद्विजोत्तमाः।पक्षौयःकालरुद्राख्योवायुतत्वेम
हेश्वरः।शुद्धिरेषशिवःसाक्षात्क्रमादेवंविचिंतयेत्।क्षितौसर्वःस्मृतोदे
वोह्यापोभवइतिस्मृतः।रुद्रयेवतथावह्नौउग्रोवायौव्यवस्थितः।भीमः
शुषिरनाथेशोभास्करमंडलेस्थितः।ईशानःसोमबिंबेत्वमहादेवइतिस्मृतः
पुंसांपशुपतिर्देवंश्चाष्टधाव्यवस्थितः।सर्वरूपःस्मृतःसर्वशिनिमत्वास्म
रेद्भवं।संसारविषतप्तानांज्ञानध्यानामृतेनवै।प्रतीकारस्तथाख्यातोना
न्यथाद्विजसत्तमा।ज्ञानंधर्मोद्भवंसाक्षाज्ज्ञानाद्वैराग्यसंभवः।वैराग्यात्प
रवैराग्यंपरमार्थःप्रकाशकं।ज्ञानवैराग्ययुक्तस्ययोगसिद्धिर्द्विजोत्तमा।
योगसिद्धिर्विमुक्तस्यतत्वनिष्ठस्यनान्यथा।यःसत्वनिष्ठोमद्भक्तोमदर्च

अर्थेद्दृ सहोधीयः सर्वं तत् हितैरतः १

नपरायणः। सर्वतो धर्मनिष्ठश्च सदोच्छाहि समीहितः। ऋजुः स्वभावी
सततं स्वस्थचित्तो मृदुः सदा। अमानी बुद्धिमाशांतस्त्यक्तस्पर्द्धो द्वि
जोत्तमाः। ऋणत्रयविनिर्मुक्तः पूर्वजन्मनि पुण्यकृत्। जरायुजो द्विजो
भूत्वा श्रद्धया च गुरोः क्रमात्। तन्मयो वापि शुश्रूषां कृत्वा कृतिमवर्जि
तः। स्वर्गलोकमनुप्राप्य उक्तान्भोगाननुक्रमात्। आसाद्यानंतरं तेवर्षं त्रे
ह्यवित् जायते द्विजाः संपर्कज्ञानमासाद्य ज्ञानिनो योगविन्नवेत्। क्रमे
णैव मलपूर्णस्य। ज्ञानप्राप्तिः द्विजोत्तमाः तस्मादनेन मार्गेण त्यक्तसंगो दृढ ३२५
व्रतः। संसारकालकूटात्स्मात् मुच्यते मुनिसत्तमाः। ~~तस्मादनेन मार्गेण~~ एवं
संक्षेपतः प्रोक्तो मयायुष्माकमव्ययाः। ज्ञानस्यैव हि माहात्म्यं प्रसंगादिह वै
क्रमात्। यः पठेत् शृणुयाद्वापि संसारमननेन नरः। स याति निर्ह्मसायुज्यं ना

नात्र कार्या विचारणा॥ ॥इति श्री लैंगे पंचाशीतितमोऽध्यायः॥ ॥
ऋषय ऊ॥ ॥निशम्य ते महाप्राज्ञाः कुमाराद्याः पिनाकिनः। प्रणंप्रण
म्य वै नीताः प्रसन्नं परमेश्वरं। एवं चेदनया देव्या हैमवत्या महेश्वरः।
क्रीडसे विविधैर्भोगैः कथं वक्तुमिहार्हसि। एवमुक्तः प्रहस्येशः पिना
की नीललोहितः। प्राह तामेबिकां प्रेक्ष्य प्रणिपत्य स्थितान् द्विजान्।
बंधमोक्षौ न चैवेह मम स्वेच्छाशरीरिणः। अकर्त्ता च पशुर्जीवो वि
र्जैक्ता घृणकुमांतः। मायी च मायया बद्धः। कर्मणि युज्यते तु सः। ज्ञा
नेध्यानं च बंधश्च मोक्षो नास्त्यात्मनो द्विजाः य एवमपि विद्यान्यत्तस्मा
यी न च सर्वतः। एषा विद्या हि हे वेद्याः प्राज्ञैषा च श्रुतिः स्मृतिः। ध्वनिः चो
लम याति प्रज्ञा ज्ञानशक्तिः क्रिया तथा। इच्छाख्या च तथा पर्याप्ता द्वे विद्ये च नसे

शु २

न्नायः। न ह्येषां प्रकृतिर्जीवो विक्रीणाति स्वविचारतः। विकारेनाममायेषां स
दसद्व्यक्तिवर्जितः। पुरा मम मोज्ञां मद्वक्त्रान् समुत्पन्ना सनातना। पंच व
क्त्रा महाज्ञा गा। जगतां मनयप्रदा। तामाज्ञां संप्रविष्याहं विचार्य जग
तां हितं। सप्तविंशप्रकारेण सर्वव्याप्यमयास्थितं। तदा प्रभृति वै मे
दः प्रवृत्तो द्विजपुंगवाः। एवमुक्ता तदापश्यन् भवानी परमेश्वरौ। भवानी
च तमालोक्य मायया महदव्यया। ते मायामलनिर्मुक्ता मुनयः प्रेक्ष्य
पार्वती। श्रीना बभूवुर्मुक्ताश्च तस्माद्देशात्परागतिं। उमाशंकरयोर्भेदो ३२६
नास्त्यत्र परमार्थतः। द्विधासौ रूपमास्थाय स्थित एव महेश्वरः। यदा
विद्यानुषंगस्यां दात्तायां परमेष्ठिनः। ~~प्रसादेन तु कृष्णस्य~~ मुक्तिं तदा मुक्ति
कृष्णाद्देव नान्यथा कल्पकोटिभिः। कृमो विविक्तितो भूत विहृत्य परमेष्ठिनः।

२

प्रसादेन तु कृष्णान्मुक्तिः प्रतिर्ईया न संशयः। गर्भस्थो जायमानो वै बा
लो वा तरुणोपि वा। वृद्धो वा मुच्यते जंतुः प्रसादात्परमेष्ठिनः। अंडज
श्चोद्भिज्जो वापि स्वेदजो वापि मुच्यते। प्रसादाद्देवदेवस्य नात्र कार्या
विचारणा। एष देवो जगन्नाथो बंधमोक्षकरः शिवः। भूर्भुवः स्वर्महः
श्चैव जनः साक्षात्तपस्तथा। सत्यलोकस्तथांडानां कोटिकोटिशतानि
च। विग्रहं देवदेवस्य तथांडावरणं च कं। सप्तद्वीपेषु सर्वेषु पर्व
तेषु वनेषु च। समुद्रेषु च सर्वेषु वायुस्कंधेषु सर्वशः। तथान्येषु च
लोकेषु वसंति सचराचराः। सर्वे भवाराजेतून्नांगानि तेषां स एष वै ३२७
सर्वरुद्रो नमस्तस्मै पुरुषाय महात्मने। विश्वभूतं तथा भूतं बहुधा स
प एव सः। रुद्राख्येया स्थिता देवी ह्यनया मुक्तिरंबिका। इत्येवं खेचराः सि ६

श्वाजजल्पुःप्रीतमानसाः। यदाचालोकतान्सर्वान्प्रसादादनघ्यं
वया। तदातिष्ठंतिसायुज्यंप्राप्तास्त्रैवचराःप्रजो॥ ॥इतिश्रीलैंगे
शिवभक्तिअभेदनिर्णयेषडशीतितमोध्यायः॥ ॥रूषयऊ॥ ॥के
नयोगेनवैसूतगुणप्राप्तिसनामिह। अणिमादिगुणोपेताञ्चवेस
वेहयोगिनः। तत्सर्वविस्तरात्सूतवक्तुमर्हसिसांप्रतं॥ ॥सूतउ०॥
अतऊर्ध्वंप्रवक्ष्यामीयोगंपरमदुर्लभं। पंचधासंस्मरेदादौस्थाप्य
त्रितेसमासने। कंल्पयेदासनंपद्मंसूर्यसोमाग्निसंयुतं। षड्डीशान्त
नृशक्तिसंयुक्तमष्टधाचद्विजोत्तमा। ततःषोडशधाचैवपुनर्द्वादश
धाद्विजा। स्मरेच्चतंतथामध्येदेव्यादेवमुमापतिं। अष्टशक्तिसमा
युक्तःमष्टमूर्तिमजंविभुं। तान्निश्चाष्टविधोरुद्रश्चतुःषष्टिविधापुनः।

त्रात्कश्च तथा सर्वा गुणाष्टकसमन्विता। एवं स्मरेत्क्रमेणैव लब्धा ज्ञान
मनुत्तमं। तस्याणिमादयो विप्रा नान्यथा कर्म्मकोटिभिः। तथाष्टगुणमै
श्वर्यं योगीनां समुदाहृतं। तत्सर्वं क्रमयोगेन उच्यमानं निबोध नः।
अणिमा लघिमा चैव महिमा प्राप्तिरेव च। प्राकाम्यं चैव सर्वत्र ईशित्वं
च तु सर्वशः। वशित्वमथ सर्वत्र यत्र कामावसायिता। तथापि त्रिविधं
ज्ञेयं मैश्वर्यं सर्वकामिकं। सावद्यं निरवद्यं च सूक्ष्मं चैव प्रवर्त्तते। साव
द्यं नाम यः तत्र पंचभूतात्मकं स्मृतं। इंद्रियाणि मनश्चैव अहंकारश्च ३२८
यस्मृतं। तत्र सूक्ष्माप्रवृत्तिः रूपं पंचभूतात्मिकाः पुनः। इंद्रियाणि मन
श्चैव बुध्याहंकारसंज्ञितं। तथा सर्वमयं चैव प अस्यात्मा तिरेव चासं
योग एव त्रिविधं सूक्ष्मेष्वेषु प्रवर्त्तते। पुनरष्टगुणं वापी सूक्ष्मेष्वेव विधीयते।

पुनरष्टगुणं वापी सूक्ष्मेष्वेव विधीयते। तस्य रूपं प्रवक्ष्यामी यथा
ह भगवान्प्रभुः। त्रैलोक्ये सर्वभूतेषु यमोस्य नियमस्मृतः। अणि
मा च तथाव्यक्तं सर्वत्रैव प्रतिष्ठितं। त्रैलोक्ये सर्वभूतानां दुःप्रापं
समुदाहृतं। तत्वस्य भवति प्राप्यं प्रथमं योगिनां बलं। लघने प्ल
वने लोके रूपमस्य सदा भवेत्। शीघ्रत्वं सर्वभूतेषु यमोस्य नियमः
स्मृतः। अणिमा च तथाव्यक्तं सर्वत्रैव प्रतिष्ठितं। त्रैलोक्ये सर्वभूता
नां महिमा चेति वंदितं। महित्वं चापि लोकेस्मिन् तृतीयो योग उच्यते
त्रैलोक्ये सर्वभूतेषु यत्रेष्टगमनं स्मृतं। प्रकामात्विषयान्भुंक्ते त
था प्रतिहतः क्वचित्। त्रैलोक्ये सर्वभूतानां सुखदुःखं प्रजानतां। ई
शो भवति सर्वत्र प्रविभागेन योगवित्। वश्यानि वा स्य भूतानि त्रैलोक्ये

सचराचरे। इछयावास्य रूपाणी नवेत्तिन नवेत्तिच। शब्दस्पर्शौ रसो
गंधो रूपंचैवमनस्तथा। प्रवर्त्तंते स्यचेछातो नप्रवर्तंते नचेछया। अ
नजायतेनम्रियते छिद्यतेनचभिद्यते। नदह्यतेनमुह्यंते लीयतेनच
भिद्यते। नह्रीयतेनक्षरत्ता। खिद्यतेन कदाचनक्रियतेतेन सर्वत्र त
तथा विक्रयतेनच। अगंधरसरूपश्च अस्पर्शशब्दवर्जितः। अव
र्णोह्यस्वरश्चैव असवर्णश्च कर्हिचित्। सभुक्ते विषयांश्चैव विषयैर्न
चभुज्यते। अजत्वात्तुपरः सूक्ष्मः सूक्ष्मत्वादृपवर्जितः। गुणांतरमथै ३२९
श्वर्यवसतः सूक्ष्मउच्यते। ऐश्वर्यंवाप्रतीघातः प्राप्ययोगमनुत्तमः।
अपवर्गततोगछेत् श्रुत्वं तत्परमंपदं। अथवागतविज्ञानो रागात्
कर्मसमाचरेत्। राजसं तामसंचापीनुक्तान्तत्रैवमुच्यते। तथासुकर्म

कृत्वातुफलेस्वर्गेसमश्नुते। तस्मात्स्थानात्सुनर्भ्रष्टो मानुष्यमुपप
द्यते। तस्माद्ब्रह्मपरंसौख्यं ब्रह्मशाश्वतमुच्यते। ब्रह्मएवहि सेवे
त ब्रह्मैवपरमंसुखं। परिश्रमोहियज्ञानां महतार्थेनवर्त्तते। भूयो
मृत्युवशंयाति तस्मान्मोक्षपरंसुखं। अथवाध्यानसंयुक्तो ब्रह्म
यज्ञपरायणः। नतुच्यावयितुंशक्यो मन्वंतरशतैरपि। दृष्ट्वानुपु
रुषंदिव्यं विश्वाख्यं विश्वतोमुखं। विश्वगंधं विश्वमाल्यं विश्वांबर
धरंप्रभुं। गोभिर्महीपर्यटति असंपत्तापतत्रिणो। मयैवचामेधात
रि जनयतोवामेचककविंपुराणमनुशासितारं। सूक्ष्मात्सूक्ष्मंमह
तोमहांतं। योनपश्यन्नवहैष्मायंभिरिंद्रियं पुरुषंहृक्मवर्णं। आलिं
गिनंनिर्गुणंचैतनंचनित्यंसदासर्वगंसर्वसारं। पश्यंतियुक्ताह्यचल

प्रकाशं तमसा वितानस्तेजसं दीप्यमानं। अपाणिपादोदरपार्श्वजि
ह्वो ऽतीन्द्रियो वापि सुसूक्ष्मणः। पश्यत्यचक्षुः स शृणोत्यकर्णो नि
चास्य बुद्धो न च बुद्धिरस्ति। स वेद सर्वं न च तस्यास्ति वेत्ता तमाहुरग्र्यं पुरु
षं महान्तं। अचेतनां सर्वगतां सूक्ष्मां ब्रै अप्रसवसधर्मिणी। प्रकृतिं
सर्वदेवानां युक्तः पश्यति योगिनः। सर्वतः पाणिपादान्तं सर्वतोऽक्षिशिरो
मुखं। सर्वतः श्रुतिमल्लोके सर्वमावृत्य तिष्ठति। युक्तो योगेन चेशानं स
र्वतस्तु सनातनं। पुरुषं सर्वभूतानां तं ध्यात्वा न प्रमुह्यति। भूतात्मानं म 330
हात्मानं परमात्मानमव्ययं। सर्वात्मानं परं ब्रह्म तं ध्यात्वा न प्रमुह्यति
पवनो न यथाग्राह्यो विचरन् सर्वमूर्तिषु। पुरे शेते च दुर्ग्राह्यः तस्मात्पुरु
ष उच्यते। अथ चेन्नु प्रधर्मानुसावशेषैः स्वकर्मभिः। ततस्तु ब्रह्मयोन्यां

हस्ताभ्यां क्रियमाणस्तु बिंबत्वमनुगच्छति। एवमध्यात्मिकं बिंबे वायुना संप्रपूरितः। २

वै शुक्रशोणितसंभिन्ने। स्त्रीपुंसो संप्रयोगे हि जायते हि ततः पुनः। त
तः स तु गर्भकाले तु कललं नाम [struck] जायते। कालेन कललं चा
पी बुद्बुदः संप्रजायते। मृत्पिंडस्तु यथा चक्रे चक्रावर्तैर्निपीडितः। जा
यते मनवस्तत्र यथारूपं यथा वयः। वायुः संभवते यांश्चवा तात्
भवति वै जलं। जलात्संभवति प्राणः प्राणान्शुक्रं निवर्तते। रजोभा
गास्त्रयस्त्रिंशत् रेतोभागाश्चतुर्दशः। भागतोऽर्धफलं त्यक्त्वा ततो ग
र्भो निषिच्यते। ततः स गर्भसंयुक्तः पंचभिर्वायुभिर्वृतः। पितुः शरीरा
त्प्रत्यंग रूपमस्योपजायते। ततोऽस्य मातुराहारात् पीतलीढप्रवेशना
त्। नाभिरंध्रेण वै प्राणः स्वे ष्ठाधारैहिनो। नवमासान् परिक्लिष्टः स
वेष्टितः शिरोधरः। वेष्टितः सर्वगात्रैश्च अपर्याप्तप्रवेशनः। नवमा

सोपि तस्त्वैषी यो निछिद्याद्वासुखः। ततः स्वकर्मभिः पापै निरयं
संप्रपद्यते। असिपत्रवनं चैव शाल्मली छेदनं तथा। ताडनं भक्ष
णं चैव पूयशोणितभोजनं। यथाह्यापस्त्वविछिन्ना नभेदमुपयांति वै
तथाछिन्नाश्च भिन्नाश्च यातनास्थानमागताः। एवं जीवस्तु तैः पापै
स्तप्यमानस्वयं कृतैः। प्राप्ये त्कर्मभिः शेषैर्दुःखं वायदि चेन्नरः।
एकेनैव तु गंतव्यं सर्वमुत्सृज्य वै जनं। एकेनैव तु भोक्तव्यं तस्मात्सु
कृतमाचरेत्। न ह्येकं प्रस्थितं कश्चित् गछंतमनुगछति। यदनेन कृ ३३८
तं कर्म तदेनमनुगछति। ते नित्यं यमविषये भुभिन्न कृत्ताः क्रोशंतः
सततमनिष्टसंप्रयोगैः। शुष्यंतः परिगतवेदनाः शरीरं बह्वीभिः सुमहं
त्रामधर्मयातनाभिः। कर्मणा मनसा वाचा यदभिष्टं निषेवते। तदसौ से

हरत्येन तस्मात्कर्मणामाचरेत्। अनादिमान्प्रबंधस्यांतं पूर्वकै
र्मणि देहिनः। संसारे तमसे चैव षड्विधं प्रतिपद्यते। मानुष्यं पश्म
वं च पशुत्वात्मृगात्मवेत्। मृगात्वात्पक्षिभावं च तस्माद्वै नु सरिसृपः।
त्वा४ सरिसृपस्यागछक्षि स्थावरत्वन संशयः। स्थावरत्वे पुनः प्राप्ते यथावदु
न्मीलते नरः। कुलालचक्रवद्भ्रांतस्तत्रैव परिवर्तते। इत्येवं हि मनु
ष्यादि संसारे स्थावरांतिका। विज्ञेयस्तामसा नाम तत्रैव परिवर्त्त
ते। सात्विकस्यास्य संसारो ब्रह्मादि परिकीर्तितः। पिशाचांतः स वि
ज्ञेयोः स्वर्गस्थानेषु देहिनां। ब्रह्मे तु केवलं सत्वं स्थावरं केवलं तमः।
चतुर्दशानां स्थानानां मध्ये विष्टंभकं रजः। कर्मस्तु छिद्यमानेषु वेद
नार्तस्य देहिनः। न तस्तत्परं ब्रह्म कथं विप्राः स्मरिष्यति। संसार दूर्व

धर्मस्य भावनाभिप्रचोदितः। मानुष्यं जायते नित्यं तस्माज्ज्ञानं समा
चरेत्। चतुर्दशविधं ह्येतत् बध्वा संसारमण्डलं। नित्यं समाचरेद्
धर्मं संसारभयपीडितः। तं नस्तरति संसारं क्रमेण परिवर्त्तितः। त
स्मात्तु सततं युक्तो ध्यानतत्पर युंजकः। तथा समारभेद्योगं यथा
त्मानं स पश्यति। एष एव परं ज्योतिः रेशसे तु रनुत्तमः। विद्धि ह्येष
भूतानां संभेदाच्चैव शाश्वतः। तदेनं सेतुमात्मानमग्निं वै विश्वतोमु
खं। हृदिस्थं सर्वभूतानामुपासीत महेश्वरं। तथान्तः संस्थितं देवं स्व ३३२
शक्त्या परमे हितं। अष्टधा वाष्टधा चैव तथाष्टाष्टविधेन च। स्वस्थर्थसं
स्थितं वा क्व संक्षिप्य हृदि संस्थितं। ध्यात्वा यथैव विद्वेवेशं रुद्रं भुवननाय
कं। भुक्त्वा पंचाहुतिं सम्यक् तच्चिंतागतमानसो वैश्वानरं हृदिस्थं तु य

यथावदनुपूर्वशः। आपः पूतं सकृत्त्वाम्य तूष्णीं भूत्वा ह्युपाविशत्
प्राणायेति ततस्तस्य प्रथमाह्याहुतिर्भवेत्। अपानाय द्वितीया च समा
नायेति तथा परे। उदानाय चतुर्थी स्यात् समानायेति पंचमी। स्वाहा
कारैः पृथग्युक्त्वा शेषं भुंजीत कामतः। आपः पुनः सकृत्त्वांप्य आचम्य
हृदयं स्पृशन्। प्राणानां ग्रंथिरस्यात्मा रुद्रो ह्यात्मा विशाश्वतः। रुद्रो
वै ह्यात्मनः प्राण एव माप्याय येस्वयं। प्राणे निविष्टो वै रुद्रः तस्मात्
प्राणमयः स्वयं। प्राणाया मे च रुद्राय जुहोत्यमृतमुत्तमं। शिवा शिवे
हमामीव स्वाहा ब्रह्मात्मने स्वयं। एवं पंचाहुतिश्चैव श्राद्धे कुर्वीत शा
सनात्। पुरुषो मिथुरे शेते न्व मंगुष्ठप्रमाणकं। आश्रितश्चैव चांगुष्
मीशः परमकारणं। सर्वस्य जगतश्चैव श्राद्धे कुर्वीत शास्त्रवान् प्रभुः

पुरा१

प्रीणातिशाश्वतः। त्वंदेवानामसिश्रेष्ठरुद्रत्वंचपुरुषोहृषाः। मृड
स्त्वमन्नमस्मस्यं एतदस्मत्कुरुतेनवा॥ इत्येवंकथितंसम्यक्प्राणप्रा
सिप्रसंगतः। योगाचारस्त्वयंतेनब्रह्मणाःकथितंपुरा॥ यःपठेच्छृण
याद्वापिश्रावयेद्वाद्विजोत्तमान्। दैवेकर्मणिपित्र्येचसयातिपरमां
गतिं॥ इतिमहापुराणेश्रीलैंगेसप्ताशीतितमोध्यायः॥ सूत ७०॥
अतःपरंप्रवक्ष्यामीशौचाचारस्यलक्षणं। यदनुष्ठायशुद्धात्माप्रेत्यस
द्गतिमाप्नुयात्। ब्रह्मणाकथितंपूर्वंसर्वभूतहितायवै। संक्षेपात्सर्ववे २३२
दार्थं संचयंब्रह्मवादिनां। उदकार्थंतुशौचानांमुनीनामुत्तमंपदं। य
स्तत्राप्रमत्तःस्यात्समुनिर्नावसीदति। मानापमानौयावेतौतावेवा
हुर्विषामृते। अपमानोमृतंतत्रसन्मानोविषमुच्यते। गुरोरपिहिते

नियमेष्वप्रमत्तस्तुयमेषुचसदाभवेत्॥

से१

तेयुक्तःसनुसंवत्सरंतद्वैतां प्राप्यानुज्ञांततःश्चैवज्ञानयोगमनुत्त
मं। अविरोधेनधर्मस्यचरेतपृथिवीमिमां। चक्षुःपूतंव्रजेन्मार्गं
वस्त्रपूतंजलंपिबेत्। सत्यपूतंवदेद्वाक्यंमितिधर्मानुशासनं। आ
तिथ्यश्राद्धयज्ञेषुनगच्छेत्योगवित्क्वचित्। एवंह्यहिंसकोयोगी
भवेदितिविचारितं। वह्नौविधूमेव्यंगारेसर्वस्मिन्भुक्तवज्जने। अ
अटेतमतिमान्भैक्ष्यंनतुतेष्वेवनित्यशः। यथैनमवमन्यंतेपरे
परिभवंतिच। तथायुक्तश्चरेद्भैक्ष्यंसतांधर्ममदूषयन्। भैक्ष्यंचरे
द्वनस्थेषुशालीनेषुचरेद्विजः। श्रद्दधानेषुदांतेषुसुशीलेषुमहत्सु
च। अतऊर्ध्वंगृहस्थेषुशालीनेषुचरेद्विजःपुनश्चापीअदुष्टापति
तेषुच। भैक्ष्यचर्याद्विवर्णेषुजघन्यावृत्तिरुच्यते। भैक्ष्यंयवागूस्तक्रंवा
मनोपमैः। जुष्टावापि स्तवैः पुण्यैः संपूज्य विधिनादरात्। एवं
नाम्नां सहस्रं तु प्रणवादीन मोन्तकं। अप्रोचनाम्ना दैवस्य नवाद्यै
र्नवमीश्वं। स्वाहांतं विधिवत्कृत्वा प्रत्येकमयुतः प्रभुः। तुष्टाव चप्रसु
रांतं नवाम्यानवमीश्वरं॥ ॥विष्णुरु॥ ॥नवः त्रिवो हरारुद्रः पुष्क
रो पुष्कलोचनः। अर्थीगम्यः सदाचारः सर्वशंभुर्महेश्वरः। गंगाध
रः शूलधरः सुराध्यक्षः प्रयोजकः। सर्वज्ञ सर्वदेवादी गिरिपर्वज
ध्वधर्मः। वंद्यापीडश्वंद्रमौली विश्व विश्वामरेश्वरः। वेदांतसा
रः संदोहः कपालीनीललोहितः। ध्यानाधारो परिच्छेद्यो गौ[illegible] गोरीभर्त्ता
चरेश्वरः। अष्टमूर्तिर्विश्वमूर्तिस्त्रिवर्गः स्वर्गसाधनः। ज्ञानगम्यो
दृढप्रज्ञो देवदेवस्त्रिलोचनः। वामदेवो महादेवः पटुः परिवृ

[illegible]

श्वर

कालः कालकृत्तिवासाः सुभगः प्रणवात्मकः॥ उन्नध्रः पुरुषो जुष्यो दुर्वासाः पुरशासनः॥२

२७० दो दृढः॥ विश्वरूपा विरूपाक्षो वागीशः शुचिसत्तरः॥ सर्वप्रमाण संवा
दी वृषांको वृषवाहनः॥ ईशः पिनाकी खट्वांगी चित्रवेषश्चिरंतनः॥ त
मोहरो महायोगी॥ गोप्ता ब्रह्मांगहृज्जटी॥ दिव्यायुधः सुरगुरु परमेष्ठी
परायणः॥ अनादिमध्यनिधनो गिरीशो गिरिबांधवः॥ कुबेरबंधुः श्री
कंठो लोकवर्णोत्तमो मृदुः॥ समाधिवेद्यः कोदंडी नीलकंठः परश्वधी॥ व
शालाक्षो मृगव्याधः सुरेशः सूर्यतापनः॥ धर्मधाम क्षमाक्षेत्रं भगवा
न् भगनेत्रभित्॥ उग्रः पशुपतिस्तार्क्ष्यप्रियभक्तः प्रियंवदः॥ दाता दयाकरो २७१
दक्षः ~~प्रियभक्तः प्रियंवदः~~ कपर्दी कामशासनः॥ श्मशाननिलयः
सूक्ष्मः श्मशानस्थो महेश्वरः॥ लोककर्ता मृतपतिर्महाकर्ता महौषधी॥ उत्तरो
गोपतिर्गोप्ता ज्ञानगम्यः पुरातनः॥ नीतिः सुनीतिः शुद्धात्मा सोमसोमरतः॥

सुखी॥ सोमपोमृतपः सोमो द्यौर्महाक्षिर्महाक्रान्तिः॥ अजातशत्रुरालोका
संभाव्यो हव्यवाहनः॥ लोककारो वेदकारः सूत्रकारः सनातनः॥ महर्षिः
कपिलाचार्यो विश्वदीप्तिर्विलोचनः॥ पिनाकपाणिर्भूदेवः स्वस्तिदः स्वस्ति
कृत् सुधीः॥ त्रिधामा धामकः शर्वः सर्वदः सर्वगोचरः॥ ब्रह्मसृग्विश्व
सृक् सर्गः कर्णिकारः प्रियः कविः॥ शाखो विशाखो गोशाखः शिवो भिषग्
अनुत्तमः॥ गंगाप्लवोदको भव्यः पुष्कलः स्थपतिः स्थिरः॥ विजितात्मा विधेया
त्मा भूतवाहनसारथिः॥ सगणो गणकारश्च सुकीर्तिश्छिन्नसंशयः॥ कामदेवः
कामपालो भस्मोद्धूलितविग्रहः॥ भस्मप्रियो भस्मशायी कामी कान्तः कृता
गमः॥ समावर्तोऽनिवृत्तात्मा धर्मयुक्तः सदाशिवः॥ अकल्मषश्चतुर्बाहु
दुरावासो दुरासदः॥ दुर्लभो दुर्गमो दुर्गः सर्वायुधविशारदः॥ अध्या

प्रमाणभूतो दुर्ज्ञेय सुवर्णो वायुवाहनः। धनुर्धरो धनुर्वेदो गुणराशिर्गुणाकरः ॥१७

२७१ त्मयोगानिलयः सुतंतुस्तंतुवर्धनः। शुभांगो लोकसारंगो जगदीशोज
नार्दनः। भस्मशुद्धिकरो मेरुस्तेजस्वी शुद्धिविग्रहः। हिरण्यरेताः पराश्
रिपुजीवहरो मजः। महाऋद्धो महागर्भो सिद्धवृंदारवंदितः। व्याघ्रच
र्मांबरो व्याजी महाभूतो महानिधिः। अमृतांशोमृतवपुः पांचजन्यः प्र
भंजनः। पंचविंशति तत्त्वस्थः पारिजातपरापरः। सुजनः सुव्रतः शूरो
वाङ्मयैकनिधिर्निधिः। वर्णाश्रमगुरुर्वर्णी शत्रुजिच्छत्रुतापनः
आश्रमः क्षपणः क्षामो ज्ञानवानिचलोचलः। अनेनतदृष्टिरानंदो २७१
दंडो दमयिता दमः। अनिवार्यो महाकार्यो विश्वकर्मा विशारदः। वी
तरागो विनीतात्मा तपस्वी भूतभावनः। उन्मत्तवेषप्रच्छन्नो जितकामो
जनप्रियः। कल्याणप्रकृतिः कल्पः सर्वलोकः प्रजापतिः। तपस्वी तार

कोधीमान्प्रधानप्रभुरव्ययः। लोकपालोंतर्हितात्मा कल्पादिः क
मलेक्षणः। वेदशास्त्रार्थतत्त्वज्ञो नियमो नियमाश्रयः। चंद्रः सूर्यः शनि
केतुर्वैरागो विद्रुतिच्छविः। भक्तिवश्यः परंब्रह्म मृगबाणार्पणोनघः
अद्रीशाम्यालयेकांत परमात्मा जगद्गुरुः। सर्वकर्मालयस्तुष्टो मंगलो
मंगलावृतः। महातपा दीर्घतपाः स्थविष्ठः स्थविरो ध्रुवः। ६०
अहः संवत्सरो व्याप्तिः प्रमाणं परमं तपः। संवत्सरकरो मंत्रः प्र
त्ययः सर्वदर्शनः। अजः सर्वेश्वरः स्निग्धो महारेता महाबलः। यो
गी योग्यो महारेताः सिद्धिः सर्वादिरग्निदः। वसुर्वसुमनाः सत्यः स
र्वपापहरो हरः। अमृतः शाश्वतः शांतो बाणहस्तः प्रतापवान्। कं
मंडलुधरो धन्वी वेदांगो वेदविन्मुनिः। भ्राजिष्णुर्भोजनं भोक्ता लो

२१२ कानांचहृरावरः। अप्रसिद्धियो महामोघः सर्वावासश्चतुष्पथां कालयोगीम
हानादो महोत्सहाबलः। महाबुद्धिर्महावीर्यो भूतचारीपुरंदरः। निशाचरः प्रेतचा
री महाशक्तिर्महाद्युतिः। अनिर्देश्यवपुःश्रीमान्। सर्वचार्यमितोगतिः। बहुश्रुतो
बहुमयो नियतात्माजितोद्भवः। तेजस्तेजोद्युतिधरामरकः सर्वलासकः। नृ
त्यप्रियो नित्यनृत्यप्रकाशात्मा प्रतापनः। बुध्यस्पष्टाक्षरो मित्रः समानसा
रसंप्लवः। युगादिकृद्युगावर्तो गंभीरो वृषवाहनः। इष्टोवरिष्ठो शिष्टोश्श
रन्नः शारत्रोधनुः। अपांनिधिरधिष्ठानो विजयोजायकालवित्। ७०। प्रतिष्ठि २५२
तः प्रमाणज्ञो हिरण्यकवचो हरीः। विमोचनः सुरगणो विद्येशो बिंदुसंश्र
यः। बोलरूपो बलोन्माथी विकर्तागहनो गुहः। करणंकारणंकर्तासर्वबं
धविमोचनः। व्यवसायो व्यवस्थानः स्थानदोजगदादिजः। गुरुदोललितोद्भि



नवात्मा संस्थितः। वीरेश्वरो वीरभद्रो वीरासद्विधिर्विराट्। वीरचूडा
मणिर्वेत्ता तीव्रानंदो नदीधरः। आज्ञाधरस्त्रिशूलीच शिपिविष्ठःशिवा
लयः। वालिखिल्योमहाहारः तिग्मांशुर्बधिरः खगः। अभिरामः सुशरणः
सुब्रह्मण्यसुधापतिः। मघवान्कौशिकोगोमान् विरामः सर्वसाधनः। ल
लाटाक्षो विश्वदेहसारसंसारचक्रकृत्। अमोघदंडी मध्यस्थो हिरण्यो
ब्रह्मवर्चसी। परमार्थःपरमयः संचरो व्याघ्रकोनलः। रुचिर्वररुचिर्वं
द्यो वाचस्पतिरहःपतिः। रविर्विरोचनस्कंदशास्तावैविश्वतोयमः। यु
रु क्तिरुन्नतकीर्तिश्च सानुरागःपरंजयः। कैलासाधिपतिःकांतस्सविताय
विलोचनः। विश्वोत्तमोवीतभयो विश्वभर्तानिवारितः। नित्योनियता
कल्याणपुण्यश्रवणकीर्तनः। विश्वोत्तमोवीतभयो विश्वभर्तानिवारि

तः॥ नित्यो नियतकल्याणः पुण्यः श्रवणकीर्तनः। दूरश्रवा विश्वसहो व
योः दुःस्वप्ननाशनः॥ उत्तारणो दुःकृतिहा दुर्ज्ञेयो दुःसहो ऽभवः। अना
दिभूर्भुवो लक्ष्मीकिरीटी दग्धाधिपः॥ विश्वगोप्ता विश्वभर्ता सुचिरी
रुचिरांगदी॥ जननो जनजन्मारी प्रीतिमान् प्रीतिमाधवः॥ विशिष्टः क
नयपो मानुर्जीमो ऽनीमपराक्रमः। प्रणवः सर्वप्राचारो महाकायो महाधनु
ः॥ जन्माधिपो महादेवः सकलागमपारगः॥ तत्वं तत्वविदेकात्मा विभुर्विशु
विभूषणः॥ ऋषिर्ब्राह्मण ऐश्वर्यजन्ममृत्युजरातिगः। यज्ञो यज्ञपतिर्यज्वा
यज्ञांगो मोघविक्रमः। महेंद्रो दुर्लभः सेनी यज्ञांगो यज्ञवाहनः॥ पंचब्र
ह्मसमुत्पत्तिर्विश्वेशो विमलोदयः। आत्मयोनिरनाद्यंतवत्सलो भक्तलोक
धकः। गायत्री वल्लभः प्रांशुर्विश्वावासः प्रभाकरः॥ त्रिपुरारिरतरः संस्तो



सुखेणः सुरशत्रुहा। अमेयो ऽरिष्टमथनो मर्कटो विकटज्वरः। स्वयंज्यो
तिरनुज्योतिः रात्मज्योतिरचंचलः॥ पिंगलः पिंगलः श्मश्रुः शास्त्रनेत्रः
स्त्रयानः॥ ज्ञानस्कंधो महानीतिधीः कृत्पत्तिं ऋधीश्वरः॥ नगो ऽविस्वा
नादित्यो योगाचारो दिवस्पतिः। उदारकीर्तिरुद्योगी सद्योगी सदसं
श्रयः। नक्षत्रमाली माकोशः साधिष्ठानः षडाश्रयः। पवित्रपादः पाप
रिर्मणिपूरी नभोगतिः। हृत्पुंडरीकमासीनः शक्रशान्तो वृषाकपी॥
उष्णोऽगृहपतिः कृष्णः समर्थो ऽनर्थनाशनः॥ अधर्मशत्रुरक्षैत्रेयः पुरु
हूतः पुरुश्रुतः। ब्रह्मगर्भो बृहद्गर्भो धर्मधेनुर्धनागमः। जगद्धितैषी
सुगतः कुमारः कुशलागमः॥ हिरण्यवर्णज्योतिष्मान् नानाभूत
रतोध्वनिः। अरोगो नियमाध्यक्षो विश्वामित्रो धनेश्वरः। ब्रह्मज्योति

र्वसुधामर्ममहज्ज्योतिरनुत्तमः। मातामहो मातरिश्वा नभस्वान्नागहारधृक्
पुलस्त्यः पुलहोगस्त्यो जातूकर्ण्यः पराशरः। निरावरणनिर्वारो वैरिञ्च्यो
विष्टरश्रवाः। आत्मभूरनिरुद्धोत्री ज्ञानमूर्त्तिर्महायशाः। लोकवीराग्र
णीर्वीरश्चण्डसत्यपराक्रमः। व्यालकल्पो महाकल्पो महावृक्षः कलाधरः।
अलंकरिष्णुरचलो रोचिष्णुर्विक्रमोत्तमः। १००१ आशुः शब्दपतिर्वेगी प्लव
नः शिखिसारथी। असंसृष्टोतिथिः शक्रः प्रमाथी पादपासनः। वसु
वसुश्रवा हव्यवाहः प्रतप्ता विश्वभोजनः। जप्यो जरादिशमनो लोहि २९५
ताश्वस्तनूनपात्। पृषदश्वो नभोयोनिः सुप्रतीकस्तमिस्रहा। निदाघ
स्तपनो मेघः पक्षः परपुरंजयः। मुखानिलः सुनिष्पन्नः सुरभिः शिशि
रात्मकः। वसन्तो माधवो ग्रीष्मो नभस्यो बीजवाहनः। जमदग्निर्जलनि
अंगिरागुरुरात्रेयो विमलो वारिवाहनः। पावनः पुरुजिच्छक्रस्त्रिविद्यो नरवाहनः। मनोबुद्धि
रहंकारः क्षेत्रज्ञः क्षेत्रपालकः। १

धिर्विगालो विश्वगालकः। अधरोनुत्तरो ज्ञेयः श्रेष्ठो निःश्रेयसालयः। शैलो
गगनकुन्दाभो दानवारिररिंदमः। चामुण्डीजनकश्चारुर्निःशल्यो लोकशल्यधृक्
चतुर्वेदश्चतुर्भावश्चतुरश्चतुरप्रियः। आम्नायोथ समाम्नाय
स्तीर्थदेवशिवालयः। बहुरूपो महारूपः सर्वरूपश्चराचरः। न्यायनिर्मोह
को न्यायी न्यायगम्यो निरंजनः। सहस्रमूर्धा देवेन्द्रः सर्वशस्त्रप्रभंजनः।
मुण्डी विरूपो विक्रान्तो दण्डी दान्तो गुणोत्तमः। पिंगलाक्षोथ हर्यक्षो नीलग्रीवो
निरामयः। सहस्रबाहुः सर्वेशः शरण्यः सर्वलोकधृक्। पद्मासनः परंज्योतिः
परंपारं परं फलं। पद्मगर्भो महागर्भो विश्वगर्भो विचक्षणः। चराचरज्ञो
वरदो वरेशश्च महास्वनः। देवासुरगुरुर्देवो देवासुरनमस्कृतः। देवासु
रमहामात्रो देवासुरमहाश्रयः। देवादिदेवो देवाग्नी देवासुरवरप्रदः। दे
वासुरेश्वरो दिव्यो देवासुरमहेश्वरः। सर्वदेवमयोचिंत्यो देवतात्मात्मसंभवः।

सद्योनी मा हा सुरव्याघ्रो देवसिंहो दिवाकरः।विबुधाग्रवरः श्रेष्ठः सर्वदे
वो त्तमोत्तमः।शिवज्ञानरतः श्रीमान्शिखिश्रीपर्वतः प्रियः।वज्रहस्तास्सि
द्धिखड्गी नरसिंहनिपातनः।ब्रह्मचारी लोकचारी धर्मचारी धनाधिपः।
नंदी नंदीश्वरो नग्नो नग्नः व्रतधरः शुचिः।लिंगाध्यक्षः सुराध्यक्षो योगाध्य
क्षो युगावहः।स्वर्वासः स्वर्गतः स्वर्गः स्वरः स्वरमयः स्वनः।बीजाध्यक्षो बी
जकर्ता धर्मकृद्धर्मसंभवः।दंभोलोभोर्थवैशंभुः सर्वभूतमहेश्वरः।
श्मशाननिलयस्त्र्यक्षः सेतुः प्रतिमाकृतिः।लोकोत्तरस्फुटो लोकस्त्र्यं
ध४ बको नागभूषणः।अंधकारिर्मुखद्वेषी विष्णोकंधरपातनः।हीनदोषोऽक्ष ३९५
ट४ यगुणो दक्षारिः पूषदंतभित्।धूर्जटी खंडपरशुः सकलो निष्कलोनलः
अकालः सकलाधारः पांडुरोगो मृगो नटः।पूर्णः पूरयिता पुण्यः सुकु
मारः सुलोचनः।सामगेयप्रियोऽक्रूरः पुण्यकीर्तिरनामयः।मनोजवस्तीर्थ

करो जटिलो जीवितेश्वरः।जीवितांतकरो नित्यं वसुरेता वसुप्रदः।स
द्गतिः सज्जतिः सिद्धिः सत्कृतिः कालकंटकः।कलाधरो महाकालः संभूति
सत्परायणः।चंद्रसंजीवनः शास्ता लोकगूढोऽमराधिपः।लोकबंधुर्लो
कनाथः कृतज्ञः कृतभूषणः।अनपायोऽक्षरः कांतः सर्वशस्त्रभृतांव
रः।तेजोमयो द्युतिधरो लोकमायोऽग्रणीरणुः।शुचिस्मितः प्रसन्नात्मा
अजेयो दुरतिक्रमः।ज्योतिर्मयो निरोगोजो गंधर्वोमजलेश्वरः।तुं
बीवीणो महाकोपो विशोकः शोकनाशनः।त्रिलोकपात्रिलोकेशः
सर्वसिद्धिरधोक्षजः।अव्यक्तलक्षणो देवो व्यक्ताव्यक्तो विशांपतिः।
परः शिवो वस्तुनामा मारो मनधनो मयः।ब्रह्मा विष्णुः प्रजापालो हं
सो हंसगतिर्वयः।वेधा विधाता धाता च स्रष्टा हर्ता चतुर्मुखः।कैलाश

शिश्वरावासी सर्ववासी सदागतिः। हिरण्यगर्भो द्रुहिणो भूतपो लो
कभूपतिः भूतकर्त्ता भूतपतिर्भूतिदो भुवनेश्वरः। स द्योगी योगविद्यो
गीवरदो ब्रह्मणः प्रियः। देवप्रियो देवनाथो देवज्ञो देवचिंतकः। को
विषमाक्षो विरजाक्षो वृषदो वृषवर्धनः। निर्ममो निरहंकारो निर्मोहो
निरुपद्रवः। दर्पहा दर्पणो दृप्त सर्वर्त्तुपरिवर्त्तकः। सहस्रजित्सः
हस्रार्चिः स्निग्धप्रकृतिदक्षिणः। भूतभव्यभवन्नाथ प्रभवो भूतिना
शनः। अर्थो नर्थो महाकोशो परकार्यैकपंडितः। निःकंटकः कृतानंदो ३७६
निर्व्याजो व्याजमर्दनः। सत्ववान् सात्विकः सत्यकीर्तिः स्नेहकृतागमः
अकंपितो गुणग्राही नैकात्मा नैककर्मकृत्। सुप्रीतः सुमुखः सूक्ष्म
सुकरो दक्षिणानिलः। नंदस्कंदीधरो धुर्यः प्रकटप्रीतिवर्धनः। अप

राजितः सर्वसत्वो गोविंदः सत्ववाहनः। अधृतः स्वधृतः साध्यः पू
तमूर्त्तिर्यशोधनः। वराहशृंगधृग्वायुर्बलवानेकनायकः। श्रु
श्रुतिप्रकाशः श्रुतिमानेकबंधुरनेकधृक्। श्रीवत्सश्शिवारंभः
शांतभद्रः समो यशः। भूषयो भूषणो भूतिर्भूतकृद्भूतभावनः।
अकंप्यो भक्तिकायस्तु कालज्ञानी कलाविदुः। सत्यव्रती महात्यागी
त्या निष्ठासातीपरायणः। परार्थवृत्तिर्वरदो विविक्तस्तु विशारदः। अन
र्पितो गुणग्राही विकर्त्ताकिनकृप्रभः। स्वभावभद्रो मध्यस्थ शत्रु
घ्नो विघ्ननाशनः। शिखंडीकवचीशूली जटीमुंडीच कुंडली। अमृत्युः
सर्वदृक्सिंहः तेजोराशिर्महामणिः। असंख्येयो प्रमेयात्मा वीर्यवा
न्वीर्यकोविदः। वेद्यो वेद्यवियोगात्मा सप्तवारणमीश्वरः। अनुत्तमो

दुराधर्षो मधुरः प्रियदर्शनः। सुरेशः शरणं सर्वः शब्दः प्रतप
तां गतिः। कालपक्षः कालकारी सुकृती कृतवाक् शुचिः। महेष्वासो
महीभर्त्ता निष्कलंको विशृंखलः। द्युमणिस्तरणिर्धन्यः सिद्धिदः सि
द्धिसाधनः। विश्वतः संप्रवृत्तश्च स्थूलो रक्तो महाभुजः। सर्वयोनि
निरातंको नरोनारायणः प्रियः। निर्लेपो निःप्रपंचात्मा निर्व्यग्रो व्य
नाशनः। स्तव्यः स्तवप्रियः स्तोता व्यासमूर्त्तिर्निराकुलः। तिरवद्योप
दो मायो विद्याराशिरमर्त्तितः। प्रशांतबुद्धिरक्षुण्णः संग्रहा नित्यसुंदरः २७७
धैर्याग्र्य धुर्यो धात्रीशः साकल्पः शर्वरीपतिः। परमार्थगुरुर्दृष्टिः सू
रिराश्रितवत्सलः। सोमो रसज्ञः सर्वज्ञः सर्वसत्वावलंबनः। ५५। एवं
नाम्नां सहस्रेण तुष्टाव वृषभध्वजः। प्राप्य यामास च विष्णुं पूजयामास

पंकजैः। परिक्षार्थं हरेः स्त्रीत्रा: कमलेषु महेश्वरः। गोपयामास क
मलं तदेकं भुवनेश्वरः। ज्ञानपुण्यो हरिस्तत्र किमिदं त्विति चिंतयन्
ज्ञात्वा स्वनेत्रमुद्धृत्य सर्वसत्वावलंबनं। पूजयामास ज्ञावेन नाम्ने
तेन जगद्गुरुं। तत्र स्तवं मध्ये दृष्ट्वान व्याभूत्तं हरो हरि। तस्माद्व तत्
राश्रु मंडलात्पावकः प्रभः। कोटिभास्करसंकाशं जटामुकुट भूषितं।
ज्वालामालावृतं दिव्यं तीक्ष्णदंष्ट्रं भयंकरं। शूलटंकगदाचक्रकुंत
पाशधरं हरं। वरदाभयहस्तं च द्वीपीचर्मोत्तरीयकं। इत्थंभूतं तथा
दृष्ट्वा प्रजाकरविभूषितं। प्रणनाम ईश्वरं देवं देवदेवं जनार्दनः। दु
दुवुस्तं परित्यज्य सेंद्रा देवास्त्रिलोचनं। चचाल ब्रह्मभुवनं चकंपे
च वसुंधरा। ददाह तेजस्तत् शंभोः प्रांते वैशतयोजनं। अधस्ताश्चो

ध्वंसश्चैव हाहेत्यूचुश्च ते जनाः। तदा प्राह महादेवः प्रहसन्निव शंकरः
संवे स्वप्रणयान्विष्णुं कृतांजलिपुटास्थितं। ज्ञातं मयेदमधुना देव
कार्यं जनार्दनः। सुदर्शनाख्यं चक्रं च ददामि तव शोभनं। यद्रूपं त्व
वतादृष्टं सर्वलोकभयंकरं। हितायतव यत्नेन कृतं भावय सुव्रतः।
न्नां तं रणाजिरे विष्णो देवानां दुःखसाधनं। शांतस्य शास्त्रं शांतं स्यात्
शांतो नास्त्रेण किं फलं। शांतस्य क्षम एवास्त्रं शांतिरेव तपस्विनां।
यो एव शांस्तु फलछेदः परस्य बलबुद्धितः। देवैरशांतयद्रूपे मदीये न
व मव्ययं। कुमायुधिन कार्या वैयोः धुं देवारिसूदनः। किंतु सप्तद ३१८
याकालाजीवनार्थं जनार्दनः। अनागते घृतीनेच दौर्बल्ये स्वजनो तमे
ः। अकालिके स्वधर्मे च नर्थवारिति सूदन।। एवमुक्त्वा ददौ चक्रं सूर्या

युतसमप्रभं। तदाप्रभृति संप्राहुः पश्चात्कृद्धति सुव्रता। दृष्ट्वैवं नूतनं
चक्रं विस्मये नीललोहितः। उपस्पृश्य कराभ्यां वै सुखं ताभ्यां तमुवाच
ह। वरदोस्मि सुराश्रेष्ठ वरान्वरय यथेप्सितान्। तत्त्वावशीकृतो नूनं
त्वयाहं पुरुषोत्तम। इत्युक्तो देवदेवेन देवदेवं प्रणम्य तं। त्वयि न
क्तिर्महादेव प्रसीद वरमुत्तमं। नान्यदिच्छामि नक्तानामार्त्तिर्नोयेो
स्ति न संशयो। तत्श्रुत्वा वचनं तस्य दयावाननुसंतरंजवं। पस्पर्श च द
देवतस्मैश्च दांशीतांशुलक्षणः। प्राह चैनं महादेवः परमात्मानमच्
युतं। मयि न क्तिश्च वंद्यश्च पूज्यश्चैव सुरासुरैः। भविष्यसि न संदेहो
मत्प्रसादात्सुरोत्तमः। यदा सती दक्षपुत्री विनिंद्यैव सुलोचना। मातरं पि
तरं दक्षं भजिष्यति महेश्वरं। दिव्या हैमवती विष्णो तदा त्वमपि सुव्रतः।

भगिनी तव कल्याणी देवी हैमवती मम। नियोगाद्ब्रह्मणः साध्वी प्रदास्यति
मम एव तां। मत्संबंधी च लोकानां मध्ये प्रख्यो भविष्यति। मां दिव्येन च भावे
न तदाप्रभृति ओंकारं। ईदृक्ष सेव्यप्रयत्नेन मित्रमूर्तिमिवात्मनः। इत्युक्तोन्तर्द
धे श्रीरुद्रो भगवान्नीललोहितः। जनार्दनोपि भगवांश्चादेवो नाम स्थ
सन्निधौ अयाचत महर्षिदेवं ब्रह्माणं मुनिभिः सह। मया प्रोक्तस्तं वै दिव्यं
पद्मयोनेः सुतां मतां। पद्मपदेः ष्ठएयावापीश्रावयेद्यो द्विजोत्तमान्। प्रतिनाम
हिरण्यस्य दत्तस्य फलमाप्नुतः। अश्वमेधसहस्रस्य फलं प्रवतु तस्यै
घृताद्यैः स्नापयेद्रुद्रं रौप्यैः सकलशैः शुभैः। नाम्नां सहस्रेणानेन श्रद्ध २७९
यात्रिवमीश्वरं। सोपि यज्ञसहस्रस्य फलं लब्ध्वा सुरेश्वरैः। पूज्यो भवेति
रुद्रस्य प्रीतिर्भवति तस्य वै। न वेत्येवं तथा प्राह पद्मयोनिर्जनार्दनः। जन्म

तुः प्रणिपत्यैव देवदेवं पिनाकिनं। तस्मान्नामसहस्रेण पूजयेद्यो ह
रं द्विजः। जपेन्नाम्नां सहस्रं च प्रयाति परमां गतिं।। ।।इत्यादिमहापुरा
णे श्रीलैंगे षट्नवतितमोध्यायः।। ।।ऋषय ऊ।। ।।संभवः सूचितो
देव्यास्त्वया सूत महामते। सविस्तरं वदस्वाद्य साधित्वे च यथा
क्रमं। मेनात्वं च महादेव्या स्त्वया सूत महामते दहुवक्रं विमर्दनं
विष्णुना च कथं दत्ता देवदेवाय शंभवे। कल्याणं वा कथं तस्य च कुम
र्हसि सुव्रत।। तेषां तद्वचनं श्रुत्वा आत्रेयो रोमहर्षणः। संभवं तु म
हादेव्याः प्राह तेषां महात्मनां। ब्राह्मणैः कथितं पूर्वं दृष्टमेतत्सुवि
स्तरं। वचनाद्यो महादेवं प्रणम्यैमां तथा भवे। सौभाग्याद्या जगद्धात्री
लिंगमूर्तिः सुवेदिका। लिंगो सौ भगवान् शंभुस्तं जगत्स्थ द्विजोत्तमाः
यक्षाभिश्च कुमाराय तेन व्यासेन धीमता। तस्मादहमुपश्रुत्य नवदामि सुविस्तरं।२

लिंगमूर्त्तिः शिवो ज्योतिस्तमसश्चोपरि स्थितः॥ लिंगवेदी समायोगाद
र्धनारीश्वरो ऽभवेत्॥ ब्रह्माणं विदधे देवश्चाग्रे पुत्रं चतुर्भुजं॥ प्रहिणो
ति स्म तस्यैव ज्ञानं ज्ञानमयो हरः॥ विद्याधिको ऽभगवान् अर्धनारि
श्वरः प्रभु। हिरण्यगर्भं तं देवो जायमानमपश्यत॥ सोऽपि रुद्रं महा
देवं ब्रह्मापश्यति शंकरं॥ तं दृष्ट्वा संस्थितं देवं अर्धनारीश्वरं हरं॥
तुष्टाव वाग्भिरिष्टाभिः पुराणं वारिजोद्भवो॥ लिंगजश्वेति विश्वेशं वि ग्र५
श्वात्मानमजो विभुं॥ ससर्ज देवीं वामांगान् पद्मालीचैवात्मनः स ३८०
मं तामजो ह्यग्रजे पत्नी ततः पुंसः पुरातनात्॥ तस्याज्ञया विभो देवी
दक्षपुत्री बभूव सा॥ सती संजायती स्तस्य रुद्रमेवाश्रिनापतिं॥ द
क्षं विनिंद्य कालेन सा तदा क्रोधमूर्छिता॥ भस्मीकृत्वात्मनो देहं यो

गमार्गेण सा पुनः॥ बभूव पार्वती देवी तपसा च गिरेः प्रभोः॥ ज्ञात्वै
व भगवान् रुद्रो ददाह रुषितः प्रभु॥ दक्षस्य विपुलं यज्ञं महर्षे
र्वचनादपि॥ भवनस्य सुतो धीमान् दधीचीरतिविक्रमः॥ विजिस
समरे विष्णुं प्रसादात् त्र्यंबकस्य तु॥ विष्णुना लोकपालाश्च सशापश्च मु
नीश्वरान्॥ व रुद्रस्य क्रोजेंधे नेन व क्रिनाभवितात्रुमो॥ विनाशे
वै दक्षेण देवमायया शंकरस्य वै॥ ॥इति श्रीजैंगे समनवांतिम
मोध्यायः॥ ॥कैषयक॥ ॥विजित्वा ब्रह्मना सार्धं भगवान् परमे
श्वरः॥ सर्वान्दधीचिवचनात्॥ कथं परमे महेश्वरः॥ ॥सूत
उवाच॥ ॥दक्षयज्ञेषु विपुले देवान् विष्णुपुरोगमान्॥ ददाह भगवान्
रुद्रः सर्वान्मुनिगणानपि॥ रोद्रेनामगणस्तेन प्रेषितः परमेष्ठि

न्ता। विप्रयोगेण दिव्यानि दुःसहेन वसुव्रताः। सोऽसृजद्वीरभद्रश्च गणेशा
न् रोमजान् बहून्। गणेश्वरः समारुह्य रथं दिव्यं प्रतापवान्। गंतुं चक्रे
मतिं तस्य सारथिर्भगवान् भवः। गणेश्वराश्च ते सर्वे विविधायुधपाणयः।
विमानैर्विश्वतोभद्रैस्त्वमन्वयुरनोपमाः। हिमवच्छिखरे रम्ये हेमशृंगे
सुशोभने। यज्ञवाटस्तदा तस्य गंगाद्वारसमीपतः। तं देशं वै च विख्यातं
शुभं कनखलं द्विजाः। दग्धुं वै प्रेषितश्चासौ भगवान् परमेष्ठिना। तदो
त्पातास्तु बभूवुर्वै लोकानां भयशंसिनः। पर्वताश्च व्यशीर्यन्त चकंपे च व
सुंधरा। महाश्च नप्रकाशंते न देवा न च दानवाः। ततः क्रूणत्वविष्येवय ३८१
ज्ञवाटं महात्मनः। रोमजैः सहितो भद्रः कालाग्निरिव चापरः। उवाच रुद्रो
भगवान्। दक्षं चामिततेजसां। संपर्का देवदक्षस्य मुनिर्देवा पिनाकिना।
मरुतश्चास्य भ्रूणं तत्र च न्नेमरुद्रालया... प्रयोनैवदीप्यंतनवेलपतिञ्चास्कर



दग्धुं वै प्रेषितश्चाहं न व्रतां च मुनीश्वराः। इत्युक्त्वा यज्ञशालां तां ददाहो
गणपुंगवः। गणेश्वराश्च संक्रुद्धा यूपानुत्पाट्य चिक्षिपुः। प्रस्तोत्रा सह
होत्रा च दग्धुं चैव गणेश्वरः। गृहीत्वा सत्वरं सर्वान् गंगास्रोतसि चिक्षिपे।
वीरभद्रो महातेजाः शक्रस्योद्यतं करं। वीरभद्रश्च तुःषष्टी रोमजैश्च
गणैर्हताः। दृष्टं भयदीनात्मा तथान्येषां दिवौकसां। भगस्य नेत्रे चो
त्पाद्य करजाग्रेण लीलया। निहत्य मुष्टिना दंतान् पुष्णश्चैवन्य
पातयत्। तथा चंद्रमसं देवं पादांगुष्ठेन लीलया। धर्षयामास भग
वान् वीरभद्रः प्रतापवान्। चिच्छेद च शिरस्तस्य शक्रस्य भगवान् प्र
भुः। प्रतापवान्विचिच्छेद शिरस्तस्य भवान्स्वजोः। वह्नेर्हस्तद्वयं छित्वा जि
ह्वामुत्पाट्य लीलया। जघान मूर्ध्नि पादेन वीरभद्रो महाबलः। यम

मस्यं दंडं भगवान् चिच्छेदायकरान् प्रभुः। जघान देवमीशानस्त्रिशू
लेन महाबलः। त्रयः त्रिंशत्सुरानेवं विनिहत्याप्रयत्नतः। त्रयं च त्रि
न्नांतं तेषां त्रिसहस्रं च लीलया। त्रयं चैव सुरेंद्राणां जघान मुनी
श्वरान्। अन्यांश्च देवान् देवोसौ सर्वान् युद्धाय संस्थितान्। जघान
भगवान् क्रुद्धः षंडं मुष्टिसिसायकैः। अथ विष्णुर्महातेजाश्चक्रमुद्य
म्य शूलिना। युयोध भगवांस्तेन रुद्रेण सह माधवः। तयोः समभवद्यु
द्धं सुघोरं रोमहर्षणं। विष्णोर्योगबलात्तस्य दिव्यदेहासृदाभुरुणः। ३०२
ंगरवचक्रागदाहस्ता ह्यसंख्याताश्च जज्ञिरे। तान् दृष्ट्वा भगवान्मायां तज्जे
न व्यहनद्धरिः। पपात च तदा भूमौ विसंज्ञः पुरुषोत्तमः। पुनरुत्थाय
तं हंतुं चक्रमुद्यम्य सप्रभुः। क्रोधरक्तेक्षणः श्रीमान् अतिष्ठत्सुपुरुषर्ष

तस्य चक्रं च तज्ञौद्रं कालादित्यसमप्रभं। विष्टंभयदर्शीनात्मा कें
रस्थं न चचाल च। अतिष्ठत्तं जितस्तेन पाषाण इव निश्चलः। ततः
श्वधबितं चक्रं विधान्नूतं प्रजोत्तदा। शार्ङ्गकोटिसहस्राद्यैश्चिच्छे
द च शिरः प्रभो। तच्छिद्धं निपपात तस्य शिरस्तस्य धरातले। वायुनोप्रे
रितं चैव प्राणजेन पिनाकिनः। प्रविवेश रुद्रेण देव तदा ह्याहवनी
यके। तत्र विध्वस्तकजशेनमयूपसुतोरणं। प्रदाहितमहाशा
लं दृष्ट्वा यज्ञो विदुद्रुवे। तं तदा मृगरूपेण धावंतं गगनं प्रति। वीर
भद्रः समादाय विशिरस्कमथाकरोत्। ततः प्रजापतिं धर्मं कश्यपं
च जगद्गुरुं। अरिष्टनेमिनं वीरो बहुपुत्रं मुनीश्वरं। मुनिमंगिरसं
चैव कृशाश्वं च महाबलं। जघान मूर्ध्नि पादेन नैरृतं चैव यशस्विनं।

(विंछेदृच शिरस्तस्य ददाहाग्नो द्विजोत्तमाः। सरस्वत्याश्च सा साग्रं दे
व मन्तुस्तथैव च। निकृतं क्ररजाग्रेण वीरभद्रः प्रतापवान्। तस्यौश्चिश्वा
हतो मध्ये पूतस्यानेययाश्चैव॥ एतस्मिन्नेव काले तु भगवान् पद्मसं
भवः। रुद्रमाह महातेजाः प्रार्थयन् प्रणतः प्रभुं। अलं क्रोधेन वै भद्रः
नष्टाश्चैते दिवौकसः। प्रसीद क्षम्यतां सर्वं रोमजैः सह सुव्रतः। सो पि
भद्रः प्रभावेन ब्रह्मणः परमेष्ठिनः। शमं जगाम गणपैः सार्धं तस्यो
तदाज्ञया। देवो पि तत्र भगवानेतरिक्षे वृषध्वजः। सगणः सर्वदा सर्व ३८३
सर्वलोकमहेश्वरः। प्रार्थितश्चैव देवेन ब्रह्मणा भगवान् प्रभुः। हतानां
सतदा तेषां प्रददौ पूर्ववत्तनुं। रुद्रस्य च शिरस्तस्य विसोश्चैव महात्मनः
दक्षस्य च मुनींद्रस्य तथान्येषां महेश्वरः। वाणीश्याश्चैव नासाग्रं देवमा



तुस्तथैव च। नष्टानां जीवितं चैव नसश्च विविधानपि। मखस्य मस्त
वक्रस्य प्रेरितो भगवान् प्रभुः। कल्पयामास खे चक्रं लीलया स सौ
तदां भवः। दक्षोपि लब्धश्व्यय तश्च समुत्थाय कृतांजलिः। तुष्टाव
देवदेवेशं शंकरं वृषभध्वजं। स्तुतः स्तेन महातेजाः प्रदाय विविधा
न् वरान्। गाणपत्यं ततस्तस्मै दत्वा याक्लिष्टकर्मणे। देवाश्च सर्व
देवेशं तुष्टुवुः परमेश्वरं। नारायणश्च भगवान्तुष्टाव च कृतांजलि
ः। ब्रह्मा च मुनयः सर्वे पृथक्पृथगजोद्भवं। तुष्टुवुर्देवदेवेशं नील
कंठं वृषध्वजं। तान्देवाननुगृह्यैव भवो प्यंतरधीयत॥ ॥श्रीलै
गे अष्टनवतितमो ध्यायः॥ ॥कृषयकृ॥ ॥कथं हीमवत पुत्री बभू
व च सती शुभा। कथं वा देवदेवेशमवाप पतिमीश्वरं॥ ॥सूत उ०॥

सार्द्धेनातनुमाश्रित्य स्वेछयैव वरानने। तदा हैमवतीयज्ञे तपसा च
तयोर्द्विजाः। जातकर्मादिकान् सर्वान् चकार च गिरीश्वरः। द्वादशे
च तदा वर्षे पूर्णे हैमवती शुभा। तपस्तेपे तया सार्द्धमनुज्ञा वच्छन्ना
नना। अन्या च देवी ह्यनुजा सर्वलोकनमस्कृता। तुष्टुवुस्तपसा दे
वीस्तामाहत्य समं ततः। ज्येष्ठा ह्यपर्णा ह्यनुजा चैकपर्णाश्रितानना
तृतीर्यच वरारोहा तथा चैवैकपाटला। तपसा च महादेव्याः पार्व
त्याः परमेश्वरः। वशीकृतो महादेवः सर्वलोकनमस्कृतः। तुतोष ३५४
च महादेवः सर्वभूतपतिर्भवः। एतस्मिन्नेव काले तु तारको ना
म दानवः। तारात्मजो महातेजा बभूव दितिनंदनः। तस्य पुत्रास्त्रय
श्चासन् तारकाक्षो महाबलः। विद्युन्माली च भगवान् कमलाक्ष

श्च वीर्यवान्। पितामहस्तथैवैषां तारो नाम महाबलः। विजित्य स
मरे पूर्वं तपसा वीर्यलब्धश्च प्रसादात् ब्रह्मणः प्रभोः। सोपि तारो म
हातेजास्त्रैलोक्यं सचराचरं। विजित्य समरे पूर्वं विष्णुनापि निषूदितः
तयोः समभवः युद्धं सुघोरं रोमहर्षणं। दिव्यं वर्षसहस्रं तु दि
वारात्रमविश्रमं। स रथे विष्णुमादाय ससर्ज शतयोजनं। तारेण
निर्जितश्चैव दुद्राव गरुडध्वजः। तारः शतगुणं तस्माज्जघ्नान्तगु
णं बलं। पितामहर्द्धिं गछं वै प्रवाप्य दितिनंदनः। देवेंद्रप्रमुखान्
जित्वा देवान् देवेतरेश्वरः। वारयामास वै देवान् सर्वलोकेषु मा
यया। देवताश्च महेंद्रेण तारकाद्भयवेपिता। न शांति लेभिरे शूराः श
र्म वा नयादृता। तथामरपतिः श्रीमान् सन्निपत्यामरप्रभुं। उवाचामि

रसं देवं देवानामपि सन्निधौ। भगवन् तारको नाम तारेयो दानवोत्त
मः। तेन स्म निर्जिता युद्धे वृषा गोपतिना यथा। भयात्तस्य महाभा
गाः। बृहद्बुद्धे बृहस्पते। अनिकेता भ्रमंत्येते शाकुंताश्च वृंजरात् अ
स्माकं यान्यमोघानि अस्त्राण्यंगिरसां वरः। तानि मोघानि जायंते प्रभा
वाद् अमरारिणः। दशवर्षसहस्राणि द्विगुणानि बृहस्पतेः। विष्णुना
योजितो युद्धे तेनापीन च सूदितः। यस्तेन न जितो युद्धे विष्णुना प्रभ
विष्णुना। कथमस्मद्विधैस्तस्य स्थास्यते समरेऽग्रतः। एवमुक्तस्तु श
क्रेण जीवः सार्धं सुराधिपैः। सहस्राक्षेण च विभुं संहर्तारं कुशध्व ३८५
जः। सोऽपि तस्य मुखाच्छ्रुत्वा प्रणतिप्रणतार्तिहा। देवैरशेषैः सेंद्रैस्तु
जीवप्राह पितामहः। जनिवाग्निसुरेंद्राणां तथापि शृणु सांप्रतं त्रिनि

घ्नदहं सा देवी सती रुद्राङ्गमंगवा। उमा हैमवती यज्ञे सर्वलोकनम
स्कृता। तस्याश्चैवेह रूपेण यूयं देवासुरोत्तमा। विज्ञापयध्वमाक्रुद्धु
रुद्रस्यास्य महात्मनः। तयो वीर्येण संभूतः स्कंदः शक्तिधरः प्रभुः। षड
स्यो द्वादशभुजः सेनानीः पावकप्रजः। स्वाहेय कार्त्तिकेयश्च गांगेयश्शि
खिवाहनः। देवशाखो विशाखश्च नैगमेयश्च वीर्यवान्। सेनापतिः कु
मारश्च सर्वलोकनमस्कृतः। लीलयैव महासेनः सबलं तारकासुरं
बालोपि विनिहत्यैको देवासं तारयिष्यति। एवमुक्तस्तदा तेन ब्रह्मणा
पद्मयोनिना। बृहस्पतिस्तदा से दैर्दैव देवं प्रणम्य च। मेरोः शिखरमा
साद्य स्मरं सस्मार सुव्रतः। स्मरं रणा देवजीवस्य स्मरोपी सह भार्यया।
रत्या सभं समागम्य नमस्कृत्य कृतांजलिः। स शक्रमहितीं जीवे गतज्जी

वोद्विजोत्तमाः।स्मृतोयद्भवताजीवस्मर्त्तव्येनबृहस्पते।देवैस्सेन्द्रैर
त्रोघैश्चस्मृतएवनचान्यथा।तमाहभगवान्शक्रः।आराध्यमकर
ध्वजं।शंकरेणाद्यमौमोक्षौसंयोजयस्वयथासुखं।तयासमतेयेनभ
गवान्वृषभध्वजः।तेनमार्गेणमार्गेश्चरत्यापत्न्यानयासह।अ
मूर्त्तौपिध्रुवंसर्वे।सोपितुष्टोमहादेवप्रदास्यतिशुभांगतिं।विप्र
युक्तस्तयापूर्वंलब्धांतांगिरिजामुमां।एवमुक्तोनमस्कृत्वादेवदेवं
शचीपतिं।देवदेवाश्रमंगंतुमितिचक्रेतदाःमदा।गत्वातमाश्रमंशं ३८६
भोस्तत्पात्न्यामहाबलः।वसंतेनसहायेनदेवंयोद्धुमनाभवत्।ततः
संप्रेक्ष्यमदनंहसन्देवस्त्रियंबकः।नयनेनतृतीयेनसावज्ञंसमवै
क्षत।ततोस्यनेत्रजोवह्निर्मदनंपार्श्वतःस्थितं।अदहत्तनरूपेणदेवः

नलापंकरुणंरतिः।रसाःप्रलापमाकर्ण्यदेवदेवोवृषध्वजः।घृ
णयापरयाप्राहकामपत्नीनिरीक्ष्यसः।अमूर्त्तोपिध्रुवंभर्त्तेकार्यं
सर्वंपतिस्तव।रतिकालेध्रुवंभद्रेकरिष्यतिनसंशयः।यदाविष्णु
श्चभविताबसुदेवसुतःशुभे।शापात्भृगोर्महातेजाःसर्वलोकहि
तायवै।तदास्यसुतोयस्मात्सपतिस्तेभविष्यति।साप्रणम्यतं
दारुद्रंकामपत्नीशुचिस्मिता।जगाममदनंलब्धावसंतेनवरानना
॥ ॥इतिश्रीलैंगेनवनवतितमोध्यायः॥ सूतउवाच॥ ॥
तपसाचतदादेव्यापार्वत्याःवृषभध्वजः।प्रीतश्चभगवान्सर्वोवच
नाद्ब्रह्मणस्तदा।हितायचाश्रमाणांचक्रीडार्थंभगवान्भवः।त
दाहैमवतींदेवीमुपयेमेयथाविधि।जंभारिमचस्वयंब्रह्मामरीच्य

घोरैर्महर्षिभिः। तपोवनं महादेव्याः पार्वत्याः पद्मसंभवः। प्रदक्षिणी
कृत्य च तां देवीं स जगाद तोरणीं। किमर्थं तपसा लोकान् संतापयसि
शैलजे। त्वया सृष्टं जगत्सर्वं मा तत्त्वं मा विनाशय। त्वं हि धारयसे
लोकान् एतान् सर्वान् स्वतेजसा। सर्वलोकेश्वरः श्रीमान् सर्वदेवपति
र्भवः। यस्य वै देवदेवस्य वयं किंकररूपिणः। स देवः परमेशानः शुभे त्वां
वरयिष्यति। वरदो येन सृष्टासि न विनाशय चाम्बिके। वर्णनेनात्र संदे
हः स ते भर्ता भविष्यति। इत्युक्त्वा तां नमस्यैव जगामाम्बुजसंभवः। गतेपि २०१
तामहे देवे भगवान् परमेश्वरः। जगाम अनुग्रहं कर्तुं द्विजरूपेण चाश्रमं
सा च दृष्ट्वा महादेवं द्विजरूपेण संस्थितं। प्रतिजाम्यैः प्रत्युज्ज्ञात्वा तदा महावृ
षभध्वजं। संपूज्य च तदा देवी ब्राह्मणच्छद्मनास्थितं। तुष्टाव परमेशानं

पार्वती परमेश्वरी। अनुग्रहं तदा देवीमुवाच सहसा भवः। कुलधर्मा
न् स्वयंवरं हन्त भूधरस्य महात्मनः। क्रीडार्थं तु सतां मध्ये सर्वदेवपति
र्भवः। स्वयंवरे महादेवि विवाहे च सुशोभने। आस्थाय रूपं यच्छोभ्यं
समेष्येहं पुनस्त्वया। इत्युक्त्वा तां समालोक्य देवो दिव्येन चक्षुषा ज
गामेष्टं तदा देशं स्वपुरं प्रययौ च सा। दृष्ट्वा हृष्टस्तदा देवीं मेनायाश्च
हिमाचलः। आलिंग्याघ्राय संपूज्य पुत्रीं दक्षां तपस्विनीं। दुहितुर्देवदे
वेन आज्ञानादनिमंत्रितां। स्वयंवरं तदा देव्याः सर्वलोकेष्वघोषयत्।
अथ ब्रह्मा च भगवान् विष्णुः साक्षाज्जनार्दनः। शक्रश्च भगवान् वह्नि
र्भास्करो भग एव च। त्वष्टार्यमा विवस्वांश्च यमो वरुण एव च। वायुसो
मस्तथेशानो रुद्राश्च पुनयस्तथा। अश्विनौ द्वादशादित्या गंधर्वा ग

रुद्राश्चैव मरुद्गणाः। यक्षाः सिद्धास्तथा साध्या

दैत्याः किंपुरुषा नागाः। समु
द्राश्च नद्यो वेदा मंत्रास्तोभादयस्तथा
। त्रयस्त्रिंशच्च देवानां त्रयस्त्रिंशत्
तथा। त्रयस्त्रिंशत् सहस्राश्च तथा ३८८
न्ये बहवः सुराः। जग्मुर्गिरींद्रपुत्र्याश्च स्व
यंवरमनुत्तमाः। अथ शैलसुता देवी हेम

मरुद्युतिमनं। विमानं सर्वतोभद्रं सर्वरत्नैरलंकृतं। अप्सरोभि
श्चानूलाभिः सर्वाभरणभूषितैः। गंधर्वसंघैर्विविधैः किंनरैस्त
सुशोभनैः। बंदिभिस्तूयमाना च स्थिस्यान्नौलसुता तदा। सित
तपत्रं रत्नांशुमिश्रितं चावहत्तदा। मालिनी गिरिपुत्र्यास्तु संध्या
पूर्णेंदुमंडलं। चामरासक्तहस्ताभिर्दिव्यस्त्रीभिश्च संवृता। मालां
प्रगृह्य सा तस्थौ सुरद्रुमसमुद्भवां। विजया मंजनं गृह्य स्थिता दे
व्याः समीपगा। मालां प्रगृह्य देव्यां तु स्थितायां देवसंसदि। शिशु
र्भूत्वा महादेवः क्रीडार्थं वृषभध्वजः। उत्संगतलसंसुप्तो बभूव भ
गवान् भवः। अथ दृष्ट्वा शिशुं देवास्तस्यास्तु उत्संगवर्तिनं। कोऽयं मत्रेति
संमंत्र्य चुक्रुशुर्भृशमागताः। वज्रमाहारयत्तस्य बाहुमुत्क्षिप्य वृत्रहा।

स बाहुरुद्यतस्तस्य तथैव समतिष्ठत ॥ स्तंभितः शिशुरूपेण दे
वदेवेन लीलया ॥ वज्रं क्षेप्तुं न शक्नोति बाहुं चालयितुं तदा ॥ वह्नि
श्च तथा क्षेप्तुं न शशाक तदा स्थितः ॥ यमोपि दंडं खड्गं च निर्ऋतिर्मु
निपुंगवाः ॥ वरुणो नागपाशं च ध्वजयष्टिं समीरणः ॥ सोमो गदां धने
शश्च दंडं दंडमूर्तां वरः ॥ ईशानश्च तथा शूलं तीव्रमुद्यम्य संस्थितः
॥ रुद्राश्चश्रूजमादित्या मुशलं वसवस्तथा ॥ मुद्गरं स्तंभिताः सर्वे दे
वेनाशो दिवौकसः ॥ शिरः प्रकंपनं विष्णुश्च चक्रमुद्यम्य संस्थितः ॥ ३८९
तस्यापि शिरसा बालः स्थिरत्वं प्रचकार ह ॥ चक्रं क्षेप्तुं न शक्नोपि
ति बाहुं चालयितुं न च ॥ पूषा दंतान् दशन् दंते बालमैक्षत मोदि
तः ॥ तस्यापि दशना पेतुर्दृष्टमात्रस्य शंभुना ॥ बलं तेजश्च योगश्च

श्रृ४

तथैषां स्तंभयन् विभुः ॥ अथ ते सुस्थिते षेव मन्युमस्तु सुरर्षयः ॥ ब्र
ह्मा परमसंविग्नो ध्यानमास्थाय शंकरं ॥ बुबुधे देवमीशानं सुमो
हं गे समास्थितं ॥ स बुध्वा सर्वमीशानं तूर्णमुत्थाय संस्थितः ॥ ववं
दे वरदं शंभोः स्तुत्वा च पितामहः ॥ पौराणैः सामसंगीतैः पुण्याख्यै
र्गुह्यनामभिः ॥ श्रेष्ठस्त्वं सर्वलोकानां अहंकारस्त्वमीश्वरः ॥ भूताना
मिंद्रियाणां च त्वमेव संप्रवर्तकः ॥ तवाहं दक्षिणाद्धस्तात् सृष्टः पू
र्वं पुरातनः ॥ वामहस्तान्महाबाहो देवो नारायणः प्रभुः ॥ इयं च प्रकृ
तिर्देवी सदा ते सृष्टिकारणं ॥ पत्नीरूपं समास्थाय जगत्कारणमागता ॥
नमस्तस्मै महादेव महादेव्यै नमो नमः ॥ प्रसादात्तव देवेश नियोगाच्च
मया प्रजाः ॥ देवाद्यास्त्विमाः सृष्टाः मूढास्त्वद्योगमोहिताः ॥ कुरु प्रसाद

मेतेषां यथापूर्वं भवेत्विमे। विज्ञाप्येत्तत्तदा ब्रह्मा देवदेवं महेश्वरं।
स्तेजितान् तांस्तदा तेन भगवाना हृपयज्जं। मूढास्या देवताः सर्वा
नैव बुध्यत शंकरं। देवदेवमिहायातं सर्वदेवनमस्कृतं। गछध्वं
शरणं शीघ्रं देवाः शक्रपुरोगमाः। सर्वे देवाः संमुनिभिः गणाश्रुतं शंक
रं प्रभुं। सार्धं मयैव देवेशं परमात्मानमीश्वरं। अनया हैमवत्या
च प्रकृत्या सह सत्तमाः। तत्र ते स्तंभितास्तेन तथैव सुरसत्तमाः। प्र
णेमुर्मनसा सर्वे साध्याः सेंद्रपुरोगमाः। अथ तेषां प्रसन्नोभूद्देवदे
वस्त्रियंबकः। यथापूर्वं चकाराशु वचनाद्ब्रह्मणः प्रभोः। तत एवं प्र ३९०
सन्नेतु सर्वदेवनिवारणे। वपुश्चकार देवेशस्त्रित्र्यक्षं परमाद्भुतं।
तेजःपातस्य देवांस्ते सेंद्रचंद्रदिवाकराः। सर्वे ब्रह्मणा सहसाश्च शे सा

ध्यासमरुद्गणाः। सयमाश्च सरुद्राश्च चक्रुः प्रार्थयन् विभुं। तेभ्यः
परतरं चक्रे स्ववपुर्दर्शनक्षमं। ददौ वै पशुपतिः सर्वेभ्यो भवान्याश्च
तेभ्यश्च। लब्धा सौंदं तदा देवाः देवा मेंद्रपुरोगमाः। सब्रह्मकाः स
देवाश्च तमपश्यन्महेश्वरं। तं दृष्ट्वा परमीशानं त्रिअक्षं त्रिदशेश्व
रं। ब्रह्माद्यैर्नेमिरेत्तूर्णं भवानी च गिरीश्वरं। मुनयश्च महादेवं गणे
शाः शिवसंमताः। ससृजुः पुष्पवृष्टिं च खेचराः सिद्धचारणाः। देवदुं
दुभयो नेदुस्तुष्टुवुर्मुनयः प्रभुः। जगुर्गंधर्वप्रमुखाः ननृतुश्चाप्सरो
गणाः। मुमुदुर्गणपाः सर्वे मुमुदे बाच पार्वती। तस्य देवैस्तदा तुष्टास्स
मक्षं त्रिदिवौकसां। पादयोः स्थापयामास माजां दिव्यां सुगंधिनीं। सा
धु साध्विति संप्रोच्य तया तत्र प्रेमस्य चार्चितं। सह देवा नमश्चक्रुः ऋषि

निर्द्धूतलांछितैः। सर्वे स ब्रह्मका देवाः सयक्षोरगराक्षसाः॥ ॥इति श्रीलैंगे
ऽनंततमोऽध्यायः॥ ७०॥ ॥सूत उवाच॥ ॥अथ ब्रह्मा महादेवम् अभिवंद्य
कृतांजलीः। उवाह क्रियतां देव इत्युवाच महेश्वरं। तस्य तद्वचनं श्रुत्वा
ब्रह्मणः परमेश्वरः। यदभीष्टमिति लोकेऽभ्युप्राह भूतपतिः प्रभुः। उवाहार्थं म
हेशस्य तत्क्षणाद्देवसुव्रतां ब्रह्मणा कल्पितं दिव्यं पुरं रत्नमयं शुभं
अथादितिर्द्दितिः साक्षाद्दनुः कद्रूस्तथाऽलिका पुलोमा सुरमा चैव सिंह
का विनता तथा। सिद्धिर्माया क्रिया दुर्गा देवी साक्षात्सुधा स्वधा। सावित्री ३५९
देवमाता च राजती दक्षिणा द्युतिः। स्वाहा स्पृहा मतिर्बुद्धिः सिद्धिर्ऋद्धिः सर
स्वती। कला कुहूः सिनीवाली देवी अनुमती तथा। धारणी धारणी चैव ज
लानां नारायणी तथा। एताश्चान्याश्च देवानां मातरः पत्न्यस्तथा। उद्वाह

शंकरस्येति जग्मुः सर्वा मुदान्विताः। उरगा गरुडा यक्षा गंधर्वाः कि
न्नराः नराः। सागरा गिरयो नद्यो मेघाः संवत्सरास्तथा। वेदा मंत्रास्तथा
यज्ञाः स्तोमाः सर्वाश्च सर्वगाः। ओंकाराः प्रणवाश्चैव प्रतिहाराः सहस्रशः।
कोटिरप्सरसां दिव्यास्तासां च परिचारकाः। याश्च सर्वाश्च दीपेषु देव
लोकेषु निम्नगाः। ताश्च श्रीविग्रहाः सर्वा जग्मुः संहृष्टमानसाः। गणपा
श्च महानागाः सर्वलोकनमस्कृताः। उद्वाहः शंकरस्येति तत्राजग्मु
र्मुदान्विताः। अस्मागाच्छरवर्णश्च गणको गणेश्वरः। दशभिः
केशराख्यश्च विघ्नेशोऽष्टाभिरेव च। चतुःषष्ट्या विशाखश्च नवभिः प
रियात्रकः। रवट्टी सर्वांतकः श्रीमान् तथैव विकृताननः। ज्वालाकेशो
द्वादशभिः कोटीनां गणपुंगवः। सप्तभिः समदर्शी च दशभिः पालकस्तथा।

श्रीमान् जगाम कोटीभिर्दुंदुभोष्टाभिरेव च। पंचभिश्च कपालीशः
षड्भिः संह्रादकः प्रभुः। दशकोटिभिरेवोहाकुंडकुंभकस्तथा। विष्टं
भोष्टाभिरेवाह गणपः सर्वसंमतः। पिप्पलश्च सहस्रेण सन्नादश्च त
थाधिजा। आवेशनस्तथाष्टाभिः सप्तभिश्चंद्रतापनः। महाकेशः स
हस्रेण कोटीनां गणपैर्वृतः। तद्विंद्रशभिर्वीरस्तथा पर्वतकः प्रभुः।
कालश्च कालकश्चैव महाकालः शतेन वै॥ अग्नेकशतिकोत्र्यावैः कोट्या
ग्निमुख एव च। आदिमूर्कोत्य मूर्धाको ग्राच तथा विविधिना विहास
न्नाहश्च शतेनैव कुमुदः कोटिभिस्तथा। अमोघः कोकिलश्चैव कोटि ३८२
कोट्या सुमंत्रकः। काकपादोदरः षष्ट्या षष्ट्या संतानकः प्रभुः। महा
बलश्च नवभिः पिंगलो मधुपिंगलः। ~~कोटिकोटिसहस्राणि~~ नीलो नव नव

साभिः पूर्णभद्रस्तथैव च। कोटीनां चैव सप्तत्या चतुर्वक्त्रो महाबलः।
कोटिकोटिसहस्राणि भूतैर्विंशतिभिर्वृताः। तत्राजग्मुस्तथा देवाः भू
भूतपालकोस्सवे। भूतकोटिसहस्रेण प्रथमाकोटिभिस्त्रिभिः। वी
रभद्रश्चतुःषष्ट्या रोमजानां च कोटिभिः। करणश्चैव विंशत्या नवं
त्या बालकः प्रभुः। पंचाक्षः शतमन्युश्च मेघमन्युस्तथैव च। काष्ठ
कूटश्चतुःषष्ट्या सुकेशो वृषभस्तथा। विश्वरूपश्च भगवान् चतुः
षष्ट्या सनातनः। तालकेतुः षडास्यश्च पंचास्यश्च सनातनः। संवर्तक
स्तथा चैत्रो लकुलीशः स्वयं प्रभुः। लोकांतकश्च दीप्तात्मा तथा दैत्यां
तकस्तथा। विषादो विषदश्चैव षद्योतकांतकः प्रभुः। देवो भृंगिरि
टिः श्रीमान् देवदेवप्रियस्तथा। असनिर्हासकश्चैव चतुःषष्ट्या सहस्र

पात्॥ एतेचान्येच गणपाश्चसंख्याता महाबलाः॥
सर्वे सहस्रहस्ताश्च जटामुकुटधारिणः। चंद्रलेखावतं
साश्च नीलकंठास्त्रिलोचनाः। हारकुंडलकेयू दि
रमुकुटाद्यैरलंकृताः। ब्रह्मेंद्ररुद्रसंकाशा हिरण्याश्च गणा हता
। सूर्यकोटिप्रतीकाशास्तथाजग्मुर्गणेश्वराः। पातालचारिणश्चैव
सर्वलोकनिवासिनः। तुंबुरुर्नारदो हाहा हूहूश्चैव समागताः। तत्रा
द्या दानवाद्याश्च तत्राजग्मुर्मुदापराः। ऋषयः कृत्स्नशस्तत्र देवगीताः ३०३
स्तपोधनाः। पुण्याश्चैवाहरन्मंत्रान् जेपुः संहृष्टमानसाः। जगतो मा
तरः सर्वा देवकन्याश्च कृत्स्नशः। गायत्री चैव सावित्री ज्योत्स्ना संध्या
प्रज्ञास्त्रियः। उद्वाहं शंकरस्येति तत्राजग्मुः समंततः। ततन एवं प्रवृत्ते तु

दृ॰

सर्वतश्च समागमे। गिरिजां नाम लंकृत्य स्वयमेव शुचिस्मितां। पु
रं प्रवेशयामास स्वयमादाय केशवः। महस्याह च देवेशं नारा
यणमजो हरिः। भवानग्रे समुत्पन्नो भवान्याः सह दैवतैः। वामां
गादस्य रुद्रस्य दक्षिणांगादहं प्रभो। मन्मूर्त्तिस्त्वहिनाद्री सा य
ज्ञार्थं सृष्टिरेव हि। एषा हैमवती यत्ते मायया परमेष्ठिनः। श्रौ
तस्मार्त्तप्रवृत्त्यर्थं पाखंडीनिधनाय सा। भवो सौ जगतां धात्री धाता
त्वमसा पि च। अस्य रुद्रस्य देवस्य मूर्त्तिर्भिन्नं तेजसा नु। त्वं स्वग्नि
र्वं तु सूर्यात्मा पवनात्मा यतो भवः। तथापि तस्मै दातव्या चिवनाद्य गि
रेर्महः। एषा प्राज्ञा श्रुत्क कृष्णा लोहिता प्रकृतिर्भवान्। अयोपि शै
लराजेन संबंधोयं तवापि चान्वयाद्यस मुद्भूतः कल्पेनाम्बुजाद दे

मदंगस्यास्य शैलस्य ममापि च गुरुर्भवान्। बाढमित्येवमाहासौ
देवदेवं जनार्दनः। देवाश्च मुनयः सर्वे देवदेवश्च शंकरः। तस्यश्चोत्था
य तगवान्य यनाम उवाच ह। पादौ प्रक्षाल्य देवस्य कराभ्यां कमले
क्षणः। अस्तु स्वपचात्मनो मूर्ध्नी ब्रह्मणश्च गिरेस्तथा। त्वदीयेषा भ
वे होमामे न जाह्यनुज्ञाम मः। इत्युक्त्वा सोदकां दत्वा देवीं देवेश्वरा
य तां। आत्मने वह्नि देवाय प्रददौ सोदकं हरिः। अथ सर्वे मुनिश्रेष्ठ
ः सर्ववेदार्थपारगाः। ऊचुर्दत्वा गृहीता च फलं द्रव्यं विभावतः। एष ३०४
देवो वरो नूनं मायया वितनं जगत्। इत्युक्त्वा ते प्रणेमुस्ते श्रीनिकटं कि
तत्त्वे च। ससृजुः पुष्पवर्षाणि खेचरा सिद्धचारणाः। ऊचुर्यम्नाम्गृहीता
त फलं द्रव्यं विभावतः। देवदुंदुभयो नेदुर्ननृतुर्मुनयस्तथा। देवाश्च

मूर्तिमंतस्ते प्रणेमुस्ते महेश्वरं। ब्रह्मणा मुनिभिः सार्धं देवदे
वमुमापतिं। देवोपि देवीमालोक्य सलज्जां हिमशैलजां। तत्रा
पतिनचस्रा निसा च देवं वृषध्वजं। वरदो स्मीति दंप्राह हरं सो
प्याह शंकरं। त्वयि भक्ति प्रसीदेति ब्रह्माश्रुश्च ददौ वयः। तत धा४
स्तु पुनरेवेशं ब्रह्मा ह्याज्ञापयाच्चिनु। हविर्जुहोमि वह्नौ ते उपा
ध्यायपदे स्थितः। तदासि मद्यं नद्याज्ञा कर्तव्यो यं कृतो विधिः
तमाह ब्रह्मा करो देवं देवदेवो जगत्पतिं। यद्यदिष्ठं सुरश्रेष्ठ तत्कु
रुष्व यथेप्सितं। कर्त्तास्मि वचनं सर्वं तव देव पितामह। ततः प्र
णम्य हृष्टात्मा ब्रह्मालोकपितामहः हस्तं देवस्य देव्याश्च युयो
जपुरतः प्रभुः। जनश्च स्वयं तत्र कृतांजलिपुटः स्थितः। अश्रुति

वित्तैर्महामंत्रैर्मूर्त्तिमद्भिरुपस्थितैः। यथोक्तविधिना कृत्वा लाजानपि यथाक्रमं। आनीतान् विष्णुना विप्रान् संपूज्य विविधैर्वरैः। विष्णुनाऽज्वलनं देवं कारयित्वा प्रदक्षिणं। मुक्ता हस्तसमायोगं सहि तैः सर्वदेवतैः। सुरैश्च मानवैः श्रेष्ठैः प्रहृष्टेनांतरात्मना। ननाम भगवान् ब्रह्मा देवदेवमुमापतिं। ततः पाद्यं विष्णोर्दत्वा शंभोराचमनं तथा। मधुपर्कं तथा गां च प्रणम्य च पुनः शिवं। अर्तिष्ठ भगवान् ब्रह्मा देवैरिंद्रपुरोगमैः। वृषाद्या मुनयः सर्वे चाक्षतैस्तिलतंडुलैः। सूक्तवाचसमभ्यर्च्य नुर्ध्वं वृषभध्वजं। शेषं समाप्य देवोक्तं वह्निमारोप्य चात्मनि। तथा समंगनोरुद्रः सर्वलोकहिताय वै। यः पठेच्छृणुयाद्वापि भवोद्वाहं शुचिर्द्विजाः। श्रावयेद्वा द्विजान् श्रेष्ठान् वेदवेदांगपारगान्। सो लब्ध्वा गाणपत्यं च भवेन सह मे ३५५

मोदते। यत्रायं कीर्त्यते विप्राः सांबस्तत्र सदा भवः। तस्मात् संपूज्य विधिवत् कीर्त्तयेन्नान्यथा द्विजाः। उद्वाहे च द्विजेंद्राणां क्षत्रियाणां द्विजोत्तमाः। कीर्त्तनीयमिदं सर्वं भवोद्वाहमनुत्तमं। कृतोद्वाहस्तया देव्या हैमवत्या वृषध्वजः। स गणैर्नंदिना सार्धं सर्वदेवगणैर्वृतः। पुरीं वाराणसीं दिव्यां मुंजगाम महाद्युतिः। अविमुक्ते सुखासीनं प्रणम्य वृषभध्वजं। अत्र पृष्टः क्षेत्रमाहात्म्यं विस्तरान्नाकथ्यते न हि। वक्तुं मया सुरेशानि क्षेत्रं विशेषान्निपूजितः। किं मया वर्ण्यते देवी अविमुक्तफलोदयः। पापिनां यत्र मुक्तिः स्यान्मृतानामेकजन्मना। अन्यत्र तत्कृतं पापं वाराणस्यां व्यपोहति। वाराणस्यां कृतं पापं पिशाचनरकावहं। कृत्वा पापसहस्राणि पिशाचत्वं वरं द्विजाः। न तु शक्रममैश्वर्यं स्वर्गे काशीपुरं विना ... अथाह नंदी पुतिलकः क्षेत्रमाहात्म्यमुत्तमं। देव्यविमुक्तमहात्म्य ५

रीविष्णोः। यत्र त्रिविष्टपो देवो यत्र विश्वेश्वरो विभुः। तेकारेत्वाः कृत्तिवा
सो भूतानां न पुनर्भवः। उक्तो देवस्य माहात्म्यं सद्गे पास्त्रि त्रिंत्रे यस्वरः।
दर्शयामास चोद्याने परित्यज्य गणेश्वरान्। तत्रैव भगवान् जातो
गजवक्त्रो विनायकः। दैत्यानां विघ्नरूपार्थमविघ्नाय दिवौकसां।
यथाश्रुतं मया सर्वं प्रसादाद्य सुशोभनं। एतद्वः कथितं सर्वं यथा
सर्वस्वमुत्तमं॥ ॥इति श्रीलैंगे एकत्रातमोऽध्यायः॥ ऋषय ऊ०॥
कथं विनायको जातो गजवक्त्रो गणेश्वरः। कथं प्रभावस्तस्यैव सूत ३५६
वक्तुमिहार्हसि॥ ॥सूत उ०॥ ॥एतस्मिन्नन्तरे देवाः सेन्द्रोपेन्द्राः समे
त्य सर्वे। धर्मविघ्नं तदा कर्तुं दैत्यानामभवद्विजाः। असुरा यातुधानाश्च रा
क्षसाः क्रूरकर्मिणः। नाभसाश्च तथा चान्ये राजसाश्च नरास्तु वि। अविघ्नं

म४

प्रतदानाद्यैः समेत्य सर्वे महेश्वरं। ब्रह्माणं च हरिं विप्रान् लब्धेप्सित
वरा यतः। ततोऽस्माकं सुरश्रेष्ठः सदा विजयसंभवः। तेषां तन्नस्त वि
घ्नार्थमविघ्नार्थं दिवौकसां। पुत्रार्थं चैव नारीणां नराणां कर्मसिद्धये।
विघ्नेशं त्र्यंकरस्त्वं गणपं श्रोतुमर्हथ। इत्युक्त्वा न्यमनसा तुष्टुवुः
सर्वमीश्वरं। नमः सर्वात्मने तुभ्यं सर्वज्ञाय पिनाकिने। असंख्याया दि
देवाय देव्याकार्धदायिने। अकायार्धकायाय हरये पापहारिणे।
कायांतस्यामृताधारमेऽज्ञानं स्थिनाय ते। कृतादि निरकालाय मारमा
राय ते नमः। कालाग्निरुद्ररूपाय कालान्तानकराय ते। कृतादि नि
रकालाय मारमाराय ते नमः। कालाग्नीरुद्ररूपाय कालज्ञानकराय ते।
अंबिकापतये तुभ्यं नमः शर्वाय शूलिने। पतये हैमवत्यास्तु हेमशुक्ला

ग्योतपंचवक्त्रसंस्थाय पंचधा बहिःक्रमात्। स्थूलसूक्ष्मस्वरूपाय सुसूक्ष्माय नमो नमः ७
य ते नमः। पंचास्यफणिहाराय पंचाक्षरमयाय ते। पंचाक्षसारथ्ये तु
भ्यं परावरवराय ते। कादिपंचसहस्राय बाहिहस्ताय ते नमः। प्रदिपा
दाय रुद्राय नादिपादाय ते नमः। पादिमेदूर्ययामाय धृतुं सप्तकधारि
णे। शांतात्मरूपिणे साक्षात् नष्टतत्क्रोधिने नमः। सर्वेषामेव भूतानां रू
दि निश्चयकारिणे। गुणत्रयोपरिष्टाय तीर्थपादाय ते नमः। ऋग्यजुःसा
मवेदानामोंकाराय नमो नमः। ॐकारभूतरूपाय मकारोपरिवासिने।
ब्रह्मणो विष्णवे तुभ्यं कुमाराय नमो नमः। सर्वसंकल्पशून्याय सर्वस्मादु
त्थिताय ते। आदिमध्यांतशून्याय। चिच्छस्याय नमो नमः। यमाग्निवायु ३०७
रुद्राब्धिसोमशक्रनिशाचरैः। दिक्पालैर्दिग्गणैर्नित्यं सगणैः पूजि
ताय ते। सर्वैस्त्सर्वदा सर्वमार्गैः संपूजिताय ते। महेश्वराय वीराय नमः
कुबेरं तेसदा सख्यि दश्याय ज्ञान भानुना। भानुसोमाग्निनेत्राय परमाय स्व स

सान्निध्याय ते॥ ॥स्तुतं७॥ ॥पः पवेद्यस्तवे शक्र रुद्राग्नीः प्रमुखै
सुरैः। कीर्तितं कीर्तयेद्विद्वान् सयाति परमां गतिं। यदा स्थिता सुरेश्व
रा प्रणम्य चैवमीश्वरं। तदांबिकापतिर्भवः पिनाकिधृक् महेश्वरः। द
दौ निरीक्षणं क्षणं दितेच- सुरेश्वराः। प्रणेमुरादरास्कंध कां बु
जुत्रिलोचनं। भवोपि चांबुजोत्तमे निरीक्षणे निरीक्षतां। आह म
द्र मस्तकः सुरेश्वरान् सुरेश्वरः। परार्थमीशवाक्पते सुरा इहाग
तास्त्वमे। प्रणम्य चैव वाक्पतिः पतिं निरिक्ष्य निर्जयं। सुरेन्द्रादिभि
सदा ह्यविघ्नमर्चितो भवान् समस्तकर्म सिद्धये सुरापकारकारिभिः
प्रसीद विघ्नकारिणे जहीरारिविधे हि नः। ततस्तदा निशम्य वै पिना
कधृक् सुरेश्वरः। गणेश्वरैः सुभैरवं वपुर्दधार साचवै। गणेश्वरा

श्चतुष्टुवुर्महेश्वरामहेश्वरं । समस्तलोकसंभवंभुवंभवार्त्तिहारि
णं । गजाननेत्वनंतरं त्रिशूलपाणिधारिणं । समस्तलोकसंभवं गजाक
त्ति तदांबिकां ॥ ततः पुष्पवर्षं हि सिद्धा मुनिश्रेष्ठास्तथा खेचरा देवसंघास्तदा
नी । तदानुष्टुवुः श्रेष्ठं विष्णुनीताः प्रणेमुर्महेशं गणेशं ततस्ता । तत
स्तदा बहिर्गतो मुनैरेवोथ मूर्त्तिमान् । स्यूतौ नूनं र्थबालकः समस्तमं
गलालयः । विचित्रवस्त्रभूषणैरलंकृतो गजाननः । महेश्वरस्य पुत्रको
ऽद्वितीयपश्यतां बिकां । जातमात्रं सुतं दृष्ट्वा चकार भगवान् भवः । ग ३५८
जाननायकृत्वा स्कंधं वान् सर्वेश्वरस्तदा । आदाय चकरण्या सांमुसुखां
मामभवत्स्वयं । आलिंग्यघ्राय मूर्धानं महादेवो जगद्गुरुः । तवावता
रो दैत्यानां विनाशाय ममात्मजः । देवानामुपकारार्थं द्विजानां ब्रह्मवादिनां ।

इह मूर्त्तिं सह ... त्रैलोक्येण सर्वत्र त्वां हि विघ्नगणेश्वरः । संपूज्यो वंदनीयश्च ॥ ६६

यज्ञश्च दक्षिणाहीनः कृतो येन महीतले । तस्य धर्मस्य विघ्नं च कुरुस्व
पितः स्थितः । अध्यापने चाध्ययने व्याख्याश्रवणमेव वा । योन्यायतः
करोत्यस्मिंस्तस्य प्राणानुसदा हरः । वर्णाश्रमस्थितानां च गणानां गणपुं
गवः । स्वधर्मरहितानां च प्राणानपहर प्रभो । या स्त्रियस्त्वां सदा कालं पु
रुषाश्च विनायकः । यजंति तासां तेषां च तस्मात् हर्तुमर्हसि । भक्तान्स
र्वयत्नेन रक्षमाण गणेश्वरः । यौवनस्थाश्च वृद्धाश्चैव विष्यसि न संश
यः । मां वा नारायणं वापी ब्रह्माणमपि पुत्रकः । यजंति यज्ञैर्वा विप्रैर ग्रे
पूजां न विष्यसि । त्वां मनः सर्वकल्याणं श्रौतं स्मार्त्तं च लौकिकं । कुर्व
ते तस्य कल्याणमकल्याणं न विष्यति । ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैश्च
व गजाननः । संपूज्य च सर्वसिध्यर्थं भक्ष्यभोज्यादिभिः शुभैः । त्वां गंधपु

ष्पधूपाद्यैरनर्घैः र्चजगत्त्रये। देवैरर्पितयान्यैश्च लब्धव्यं नास्ति कुत्रचि
त्। अभ्यर्चयंति ये लोके मां न वा त्वं विनायक। ते वार्चनीयश्चै क्राद्यैर्न
विष्यंति न संशयः। अजं हरिं च मां चापि शक्रमस्यान्सुरानपि। द्विषै
र्वाधियस्य चाग्रे ये नार्चयंति फलार्थिनः। ससर्ज च तदा विघ्नगणं गणपतिं
प्रभुं। गणैः सार्धं नमस्कृत्वा प्रतिष्ठत्तस्य चायतः। तदाप्रभृति लोकेस्मि
न् पूजयंति गणेश्वरं। दैत्यानां धर्मविघ्नं च चकार सो गणेश्वरः। एतत्ते क ३९९
थितं सर्वं स्कंदायजसमुद्भवं। यः पठेच्छृणुयाद्वापि श्रावयेद्वा सुरवीन
सेत्॥ ॥इत्या० द्वित्रर्तमोऽध्यायः॥ ॥ऋषय ऊ॥ ॥नृत्सारं नः कथं त्वं
लोकिमर्थं वा यथा कृतं। वक्तुमर्हसि चास्माकं कृतं स्कंदायजोद्भवः।
॥सूत उ०॥ ॥दारुको दारुसंभूतस्तपसा लब्धविक्रमः। सूदयामा

सकालाग्नीरिव देवान्स द्विजोत्तमां। दारुकेण तदा देवाः पीडितास्ताडि
ता भृशं। ब्रह्माणं च तथेशानं कुमारं विष्णुमेव च। यममिंद्रमनुप्राप्य।
स्त्रीवध्य इवासुरः। स्त्रीरूपधारी जिस्त्वि ते ब्रह्माद्यैर्युधि दानवाः। बा
धितास्तेन ताजिस्ते ब्रह्माणं प्राप्य ते द्विजा। विज्ञाप्य तस्मै तत्सर्वं तेन सार्ध
मुमापतिं। संप्राप्य तुष्टुवुः सर्वे पितामहपुरोगमाः। ब्रह्मा प्राह च देवे
शं प्रणम्य बहुमानदः। दानवो भगवान्बुध्ना वयं तेन विनिर्जिताः।
निहंतुं दारुकं दैत्यं स्त्रीवध्यं त्वमर्हसी। विज्ञप्तिं ब्रह्मणः श्रुत्वा भगवा
न्भगनेत्रहा। देवीमुवाच देवेशो गिरिजां प्रहसन्निव। भवतीं प्रार्थ
यामो घहितार्थं जगतां शुभे। वंधार्थं दारुकस्यास्य स्त्रीवध्यस्य वरा
नने। अथ सा तस्य वचनं निशम्य जगतोद्भणी। विवेशादेहं देवस्य देवे

त्रीजगन्मतत्पदा।। एकेनांशेन देवेशोप्रविष्टां देवसत्तमा।। न विवेद त
दा ब्रह्मा देवैश्चेंद्रपुरोगमाः।। गिरिजां पूर्ववत्तांस्तो दृष्ट्वा पार्श्वे स्थितामि
मां।। माययामोहितस्तस्य सर्वज्ञोपि चतुर्मुखः।। मायाविष्टांततेतस्य
देवदेवस्य पार्वती।। कंठस्थेन विषेणास्य तनुचक्रे तदात्मनः।। तांतु
ज्ञात्वात भया भूतां दृतीयेन क्षणेन वै।। ससर्ज कालीं कौमारीं कालकं
ठाकपर्दिनी।। जातायदा कालिमकालकंठी जाता तदानीं विपुलाज
यश्री।। देवेतराणामजयं स्त्वसिध्या तुष्टिर्नवान्याः परमेश्वरस्य।। जाता
तदानीं सुरसिद्धसंघा दृष्ट्वाभयात्उद्भुवुरग्निकल्पः।। वरांगनाकालम ८००
कालकंठीमुपेंद्रपद्मोद्भवशक्रमुख्याः।। सहैव जाते नयने ललाटे
शीतांशुरेखा च शिरस्सुद्रष्ट्वा।। कंठे च काले सुमिते च शूले करे कपोले च विभ्र

प्रणेमिरे।। सार्धं द्विमोक्षराद्देव्या।। सर्वाभरणभूषिता।। सिद्धाः प्रसिद्धा
स्तथा पिशाचाश्च यज्ञिरे पुनः।। आज्ञया दारुकं तस्याः पार्वत्याः परमे
श्वरीः।। दानवं सूदयामास सूदयंतं सुराधिपान्।। संरंभादिप्रसंगाच्चे
;तस्याः सर्वमिदंजगत्।। क्रोधाग्निनाच विप्रेंद्राः संबभूव तदातुरं। भ
वोपि बालरूपेण श्मशाने प्रेतसंकुले।। रुरोद मायया तस्याः क्रोधाग्नि
पातुमीश्वरः।। तं दृष्ट्वा बालमीशानी मायया तस्य मोहिता।। उत्थाप्याघ्राय
बालाय स्तनं साप्रददौ युवा।। स्तनजेन तदा सार्धं क्रोधमस्यास्य मोहिना
पपौ पुनः।। क्रोधेनानेन वै बालः क्षेत्राणां क्षत्रयोघ्रमुत्।। मूर्त्तिरष्टधा
तस्य क्षेत्रपालस्य धीमतः।। एवं पीतेपि बालेन क्रुद्धा सा क्रोधमूर्छिता।।
कृतमस्याः प्रशांत्यर्थं देवदेवेन तांडवं।। संध्यायां सर्वभूतेंद्रैः प्रीतेप्री

तेनशूलिना॥ पीत्वाचस्सामृतंशंभोराकंठंपरमेश्वरी। ननर्त्तसाचयो
गिन्यःछेतस्थानेयथासुखं। ततःसलेबेकादेवाःसेंद्रोपेंद्राःसमंत
तः। प्रणेमुस्तुष्टुवुःकालींदेवदेवंचपार्वती॥ एवंसंक्षेपतःप्रोक्तौतांड
वंशूलिनःप्रभो। योगानंदेनचविप्रोस्ताण्डवंचापरेविदुः॥ ॥इत्या०
त्रिशततमोध्यायः॥ ३ ॥ऋषयऊ॥ ॥पुरोपमन्युनासूतगाणपत्यं
महेश्वरात्। क्षीरार्णवःकथंलब्धोवक्तुमर्हसिसांप्रतं॥ सूतउ०॥ ॥
एवंकालीमुपागम्यगतेदेवेत्रियंबके। उपमन्युसमभ्यर्च्यतपसालब्ध
वान्फलं। उपमन्युरितिख्यातोमन्युश्चद्विजसत्तमः। कुमारइवतेज ५०१
स्वीक्रीडमानोयदृच्छया। कदाचित्क्षीरमस्यंसपीतवान्मातुलाश्रमे। ई
र्ष्ययामातुलसुतोह्यपिक्षीरमुत्तमं। पीत्वाजलंयथाकामंदृष्ट्वाप्राहच

मातरं। मातर्मातर्महाभागेममदेहिमनस्विनी। गव्यंक्षीरमतिस्वादु
नाल्पमुष्णंनमाम्यहं॥ ॥सूतउ॥ ॥उपलालितवैपुत्रेणपुत्रमालिं
ग्यसादरं। ~~मातर्मातर्महाभागे~~दुःखिताविललापसास्मृत्वानैर्धन्य
मात्मनः। स्मृत्वापुनःपुनःक्षीरमुपमन्युरितिद्विजा। देहिदेहीतितां
माहरोहमानोमहाद्युतिः। उंछवृत्त्यार्जितान्बीजान्तृणजान्पी
ष्ट्वासास्वयं। बीजपिष्टंतदालोड्यतोयेनकलभाषिणी। एह्येहिव
त्सवत्सेतिसामपूर्वंततःशुभा। आलिंग्याकायदुःखार्ताप्रददौकृत्रि
मंपयः। पीत्वावैःकृत्रिमंक्षीरंमात्रादत्तंद्विजोत्तमाः। नैवंक्षीरमितिप्र
हमातरंचार्त्तिविकलः। दुःखितासातदाप्राहसंप्रेक्ष्याघ्रायमूर्धनि।
संमृज्यनेत्रेपुत्रस्यकराभ्यांकमलेक्षणा। क्षीरंवत्सकुतोऽस्माकंवनेनि

वसतां सदा॥ अथ नानां पुरास्मान्नि महादेवो न पूजितः। पूर्वजन्मनि यः द्वं
त्वं त्रिविमुद्दिश्य वैद्विजे। तदेव लग्नं नान्यत्तु विस्मुद्दिष्य वा पतुं। निशम्य व
च नं मातुरूपमन्युर्महामतिः। बालोपि मातरं प्राह प्रणिपत्य तपस्विनी॥ स्व
जशोकं महाभागे महादेवो स्तिचेत्क्वचित्। चिरांद्वाथ चिराद्वापि क्षीरोदे सा
धयाम्यहं। तां प्रणम्यैवमुक्त्वा च तपः कर्तुं प्रचक्रमे। तमाह च तदा माता
पति कुर्वतं त्रातनं। अनुज्ञातस्तया तत्र तपस्तेपे सुदुष्करं। हिमवत्पर्वते प्रा
प्य वायुभक्षः समर्चितः। तपसा तस्य विप्रस्य तूषितेन तमन्नूजगन्नाथः प्रणम्या
दुश्च तत्र सर्वे हरये देवसत्तमाः। श्रुत्वा वाक्यं तदा तेषां भगवान् पुरुषोत्त ४०२
मः। किमिदं त्विति संचिंत्य ज्ञात्वा तत्कारणं विभुः। जगाम मंदरं तूर्णं महे
श्वरं द्विदृक्षया। दृष्ट्वा देवं प्रणम्यैव प्रोवाचेवं कृतांजलिः। भगवन् ब्राह्मणः क

श्चिन् उपमन्युरिति श्रुतः। क्षीरार्थमदहत्सर्वं तपसा तन्निवारय। एत
स्मिन्नंतरे देवः पिनाकी परमेश्वरः। शक्रस्य रूपमास्थाय गंतुं चक्रे
मतिं तदा। अथ जगाम वने मुनौ पोवमं गजवरेणाथ नेन तदा शिवः।
सहसुरासुरसिद्धमहोरगैरमरराजतनुं स्वयमास्थितः। स एव मारु
ह्य वृषं गजाकृतिं विचीयवाजेन्द्र जनं विवस्वान्। वामेन ग्राह्या सहि
तं सुरेंद्रं करेण चान्येन सितातपत्रं। रराज भगवान् सोमः शक्ररूपी
सदाशिवः। सितातपत्रेण यथा चंद्रबिंबेन मंदरः। आस्थायैवं हि शा
क्रस्य रूपं वै परमेश्वरः। जगामानुग्रहं कर्तुं उपमन्योस्तदाश्रमं। तं दृ
ष्ट्वा परमेशानं शक्ररूपधरं शिवं। प्रणम्य शिरसा प्राह कृतिं मुनिवरः
स्वयं प्राप्तश्च शक्रो जगन्नाथो भगवान् मोनु सप्रभः। एवमुक्त्वा स्थितं प्रेक्ष्य
पः वितं चाश्रमं चात्र महादेवश्वरस्त्वयं

कृतांजलिपुटं द्विजाः। प्राह गंभीरया वाचा शक्ररूपधरो हरः। तुष्टोस्मि
ते वरं ब्रूहि तपसानेन सुव्रतः। ददामि चेप्सितान् सर्वान् धौम्याग्रज म
हात्मने। एवमुक्तस्तदा तेन शक्रेण मुनिसत्तमः। वरयामि भवे भक्तिमित्यु
वाच कृतांजलिः। ततो निशम्य वचनं मुनेः कुपितवत्प्रभुः। प्राह सस्मय
मीशानः शक्ररूपधरः स्वयं। मामवजानासि विप्रर्षे देवराजानमीश्व
रं। त्रैलोक्याधिपतिं शक्रं सर्वदेवनमस्कृतं। मद्भक्तो भव विप्रर्षे मामे
वार्चय सर्वदा। ददामि सर्वं भद्रं ते त्यज रुद्रं सुनिर्गुणं। ततः शक्रस्य वच ४०२
नं श्रुत्वा श्रोत्रविदारणं। उपमन्युरिति प्राह जपन् पंचाक्षरीं शुभां। म
न्ये शक्रस्य रूपेणाननमात्रागतस्त्वयं। कर्त्तुं दैत्याधमः कश्चिद्धर्मविघ्न
नं चात्यथा। त्वयैकं कथितं सर्वं भवनिंदारतेन वै। प्रसंगाद्देवदेवस्य

निर्गुणस्त्वं महात्मनः। बहुनात्र किमुक्तेन मयाद्यानुमितं महत्। भवांत
रकृतं पापं श्रुत्वा निंदां हरस्य यः। श्रुत्वा निंदां हरस्येमां न तत्क्षणाद्दे
हं संत्यजेत्। स्वदेहं विनिहत्याशु रुद्रलोकं स गच्छति। यो वाचोत्पा
टयेज्जिह्वां भवनिंदारतस्य तु। आस्तां तावन्ममेच्छयाद्यीव्रतिसुराधमं। २४
निहत्यैनं शिवास्त्रेण त्यजाम्येतत्कलेवरं। मम मात्रानुकथितं तथ्यमेव
न संशयः। पूर्वजन्मनि सोस्माभिर्न पूजित इति प्रभुः। एवमुक्त्वा तु भगवा
नुपमन्युर्निहंतुं तं। शक्रं चक्रे मतिं कर्त्तुं अथर्वास्त्रेण मंत्रवित्। भस्म
धारी महातेजा भस्ममुष्टिं प्रगृह्य च। अथर्वास्त्रं जपंस्तस्मै ससर्जं च
ननाद च। दग्धुं स्वदेहमाग्नेयीं ध्यात्वा वै धारणां तदा। स्थितश्च महा
तेजाः शुष्केंधनमिवाव्ययः। एवं व्यवसिते विप्रे भगवान् भगनेत्रहा। धा

रयामास सौम्यां वै धारणां तस्य योगिनः। अथर्वस्त्रं च संभूतं तेन वै चै
द्रकेतुना। कालाग्निसंज्ञितं रौद्रं नियोगान्नंदिना तथा। रूपं स्वमेव
भगवान् आस्थाय परमेश्वरः। दर्शयामास विप्राय बालेंदुकृतशेख
रः। क्षीरधारासहस्रं च क्षीरोदार्णवमेव तु। दध्योदनार्णवं चैव घृतोदार्ण ध्यो
वमेव च। फलार्णवं च बालस्य भक्ष्यभोज्यार्णवं तथा। अपूपगिरयश्चै
उपमन्यु [illegible] वाच तदा तिष्ठन् सुमंततः। सस्मितो भगवान् बंधुः जनैः समाहूतः। गिरि
जामवलोक्यास्मितं सघृणं च स्वयं तेन तदा गली। भुंक्ष्व भोगान्यथाकामं ४०४
बांधवैर्वत्स पश्य मां। उपमन्यो महाभाग तवेषा बाहि पार्वती। मया पुत्री
कृतो ह्यद्य दत्तः क्षीरार्णवस्तव। क्षीरोदनार्णवश्चैव दध्यन्नार्णव एव
सान्नापोदनार्णवश्चैव फलनर्णवस्तथा। आपूपगिरयश्चैव भक्ष्यभो

ज्यार्णवाः पुत्रः। पिता त्व महातेजाः पिता वै जगतां मुने। माता तव म
हाभागा जगन्माता न संशयः। अमरत्वं मया दत्तं गाणपत्यं च शाश्वतं।
वरान् वरय दास्यामि नात्र कार्या विचारणा। एवमुक्त्वा महादेवः कराभ्यां
परिगृह्य तं। आघ्राय मूर्ध्नि च विभुर्ददौ देव्यास्तदा भवः। देवी तनयं
मालोक्य ददौ तस्मै गिरिजा। योगैश्वर्यं तदा तुष्टा ब्रह्मविद्यां द्विजो
त्तमाः। सोपि लब्ध्वा वरं तस्मात् कुमारत्वं च सर्वदा। तुष्टाव च महादेवं
हर्षगद्गदया गिरा। वरयामास च तदा वरेण्यं वारिजेक्षणं। कृतांजलि
पुटो भूत्वा प्रणिपत्य मुहुर्मुहुः। प्रसीद देवदेवेश त्वयि चाव्यभिचारिणी
ली। श्रद्धा सांब महादेव सान्निध्यं चैव सर्वदा। एवमुक्तस्तदा तेन प्र
हसन्निव शंकरः। दत्वेप्सितं हि विप्राय तत्रैवांतरधीयत॥ ॥इति श्री

लैंगे चतुरधिकशततमोध्यायः॥ ॥ऋषय ऊ॥ ॥दृष्टोसौ वासुदेवेन
कृष्णेनेक्लिष्टकर्मणा। धौम्याग्रजस्ततो लब्धा ज्ञानं पाशुपतव्रतं॥
कथं लब्धं न थोद्दा ज्ञानं तस्मात्कृष्णेन धीमता॥ ॥सूत ऊ॥ ग
स्वेच्छयाह्यवतीर्णोपि वासुदेवः सनातनः। निंदयन्नेव मानुष्यं देह
शुद्धिं चकार सः। पुत्रार्थं गतवान् तस्य तपस्तस्य महामुनेः आश्रमं चो
पमन्योर्वै दृष्टवान् तत्र तं मुनिं। नमश्चकार तं दृष्ट्वा धौम्याग्रजमथो द्वि
जाः। बहुमानेन वै कृष्णः त्रिः कृत्वा वै प्रदक्षिणां। तस्यावलोकनादेव ४०५
मुनेः कृष्णस्य धीमतः। प्रनष्टं च मलं सर्वं पापीयं कर्ममेव च। न स्मने
धृत्वा तं कृष्णमुपमन्युर्महाद्युतिः। तमग्निरिति विप्रेंद्रा वायुरित्यादि
लिंगमात्। दिव्यं पाशुपतं ज्ञानं प्रददौ प्रीतमानसः। मुनेः प्रसादात्मा

न्मान्योसौ कृष्णः पाशुपतैर्द्विजाः। तपसा चैव वर्षांति दृष्ट्वा देवं महेश्व
रं सोमं सगणमव्यग्रो लब्धवान् पुत्रमात्मनः। तदाप्रभृति तं कृष्णं
मुनयः शंसितः व्रताः। दिव्याः पाशुपताः सर्वे तस्थुः संहृष्ट सर्वदा
एतद्वः कथितं सर्वं संक्षेपाच्च न संशयः। यः पठेच्छृणुयाद्वापि विष्णुलो
कं स गच्छति॥ ॥इत्यादि महापुराणे श्रीलैंगे एकादशसाहस्र्यां
पंचशततमोध्यायः॥ २०५ ॥ ॥इति पूर्वभागः समाप्तः॥ ॥
ऋषय ऊ॥ ॥कृष्णस्तुष्यति केनेह सर्वदेवेश्वरेश्वरः। वक्तुमर्ह
सि चास्माकं सूत सर्वार्थविज्ञवान्॥ ॥सूत ऊ॥ ॥पुरा पृष्टो महा
तेजा मार्कंडेयो महामुनिः। अंबरीषेण विप्रेंद्रास्तद्वदामि यथातथं
॥ ॥अंबरीष ऊ॥ ॥मुनेः समस्तधर्माणां परित्राणस्तु महामते मार्कं

ण्डेयपुराणोसि पुराणार्थविशारद। नारायणानां पुण्यानां धर्माणां
श्रेष्ठमुत्तमं। तत्किं ब्रूहि महाप्राज्ञ भक्तानामिह सुव्रत॥ ॥सूत उ०॥
तस्य तद्वचनं श्रुत्वा समुत्थाय कृताञ्जलिः। स्मरन्नारायणं देवं रुक्म
मच्युतमव्ययं॥ ॥मार्कण्डेय उ०॥ ॥शृणु भूप यथान्यायं पुण्यं
नारायणात्मकं। स्मरणं पूजनं चैव प्रणामं भक्तिपूर्वकं। प्रत्येकम
श्वमेधस्य यज्ञस्य सममुच्यते। यद्येकपुरुषः श्रेष्ठः परमेशो महाकृ
तिः। धर्ममेकं च वक्ष्यामीयं दृष्टं विदितं मम। पुरा त्रेतायुगे कश्चित्कै ४०६
शिको नाम वै द्विजः। वासुदेवपरो नित्यं सामगानरतः सदा। भोजनास
नशय्यासु सदा तद्गतमानसः। उदारचरितं विष्णोर्गायमानः पुनः२
विष्णुस्थले समासाद्य हरेः क्षेत्रमनुत्तमं। अगायत हरिं तत्र तदा सा

तलयान्वितं। मूर्छनायोगिनं च तथा श्रुतिमंडलं प्रदिने। भक्तियोग
समापन्नो निद्रामश्नन्न हित न [illegible] वं गायमानं च दृष्ट्वा कश्चिद्द्वि
जः सदा। पद्माख्य इति वि [illegible] स्मै गाने ददौ सदा। स कुटुंबो म
हातेजा ददौ पत्नी हितस्य वै [illegible] को हि तदा हृष्टो गायन्नास्ते हरिं
प्रभुं। स्थ एवन्नास्ते स पद्माख्य कृः [illegible] ते काले निमित्तिनः। कालयोगेन
संप्राप्ताः शिष्या वै कौशिकस्य च। सप्त राजन्यवैश्यानां विप्राणां कुलसं
भवाः। गानविद्याधिकाः शुद्धा वासुदेवपरायणाः। तेषामपि तथा
न्नाद्यं पद्माख्यः प्रददौ स्वयं। शिष्यैश्च सहितो नित्यं करोति प्रीतमान
सः। मालवी नाम भार्यास्य तस्य नित्यं पतिव्रता। गोमयेन समं लिप्य
हरेः क्षेत्रं समंततः। भक्त्याः सहास्ते सुप्रीता श्च एवती गानमुत्तमं। कुर्वास्य

